पू.आ.श्रीविजयरामचन्द्रसूरिस्मृति-संस्कृत-प्राकृतग्रन्थमाला - क्रमाङ्क-२४

याकिनीमहत्तराधर्मसूनु-समर्थशास्त्रकारशिरोमणि-
पूज्याचार्यश्रीमद्-हरिभद्रसूरिविरचितवृत्त्या समन्वितं
युगप्रधानपूज्याचार्यश्रीमद्-जिनभद्रगणिक्षमाश्रमणविरचितं

# ध्यानशतकम्-२

भाग-१ - टीका-टिप्पण-पाठान्तरयुक्तम्

भाग-२ - १ तः ३६ परिशिष्टसमेतम्

-: सम्पादकाः संशोधकाश्च :-
सुविशालतपागच्छाधिपतिपूज्यपादाचार्यश्रीमद्विजयरामचन्द्रसूरीश्वराणां
पट्टप्रभावकवर्धमानतपोनिधिपूज्यपादाचार्यश्रीमद्विजयगुणयशसूरीश्वराणां
चरणचञ्चरीकाः प्रवचनप्रभावकपूज्यपादाचार्यश्रीमद्विजयकीर्तियशसूरीश्वराः

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

पू.आ.श्रीविजयरामचन्द्रसूरिस्मृति-संस्कृत-प्राकृतग्रन्थमाला - क्रमाङ्क-२४

याकिनीमहत्तराधर्मसूनु-समर्थशास्त्रकारशिरोमणि-
पूज्याचार्यश्रीमद्-हरिभद्रसूरिविरचितवृत्त्या समन्वितं
युगप्रधानपूज्याचार्यश्रीमद्-जिनभद्रगणिक्षमाश्रमणविरचितं

# ध्यानशतकम्-२

१ तः ३६ परिशिष्टसमेतम्

-: सम्पादकाः संशोधकाश्च :-

सुविशालतपागच्छाधिपतिपूज्यपादाचार्यश्रीमद्विजयरामचन्द्रसूरीश्वराणां
पट्टप्रभावकवर्धमानतपोनिधिपूज्यपादाचार्यश्रीमद्विजयगुणयशसूरीश्वराणां
चरणचञ्चरीकाः प्रवचनप्रभावकपूज्यपादाचार्यश्रीमद्विजयकीर्तियशसूरीश्वराः

For Private & Personal Use Only ... jainelibrary.org

| | | |
|---|---|---|
| ग्रन्थनाम | : | ध्यानशतकम् |
| ग्रन्थकर्त्तारः | : | युगप्रधानपूज्याचार्यश्रीमद्जिनभद्रगणिक्षमाश्रमणाः |
| टीकाकर्त्तारः | : | समर्थशास्त्रकारशिरोमणिपूज्याचार्यश्रीहरिभद्रसूरीश्वराः |
| सम्पादकाः संशोधकाश्च | : | पूज्यपादाचार्यश्रीमद्विजयकीर्तियशसूरीश्वराः |
| प्रकाशकम् | : | ***सन्मार्गप्रकाशनम्***, अहमदावाद |
| आवृत्तिः | : | प्रथमा |
| प्रकाशनवर्षः | : | वि.सं. २०६६, वि.सं. २५३६, ई.सं. २००९ ज्ञानपञ्चमी |
| प्रतयः | : | ७०० |
| मूल्यम् | : | रूप्यकाणि २७५/- |

ISBN - 978-81-87163-57-2

## सूचनम्

ज्ञाननिधिव्ययेन मुद्रितोऽयं ग्रन्थोऽतो सम्पूर्णं मूल्यं तत्क्षेत्रे दत्त्वैव गृहस्थैः स्वामित्वमस्य करणीयं सुयोग्यं वा शुल्कं (नकरो) दत्त्वैष पठनीयः ।

- ***सन्मार्गप्रकाशनम्***

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

# પ્રકાશકીય

જૈનશાસન શિરતાજ તપાગચ્છાધિરાજ વ્યાખ્યાનવાચસ્પતિ સુવિશાળગચ્છાધિપતિ પૂજ્યપાદ આચાર્યદેવ **શ્રીમદ્ વિજય રામચંદ્રસૂરીશ્વરજી મહારાજા**એ આઠ-આઠ દાયકા સુધી પ્રવચન ગંગાનું વહેણ વહેવડાવી ભારતભરના ભવ્યોને જિનાજ્ઞા-મર્મનું મહાપ્રદાન કર્યું હતું. તેના મૂળમાં તેઓશ્રીમદે આજીવન કરેલી આગમાદિ શ્રુતની અપ્રમત્ત ઉપાસના હતી.

તેઓશ્રીમદ્ની શ્રુતસિદ્ધિ અને શ્રુતવિનિયોગની હાર્દિક અનુમોદનાના બીજરૂપ તેઓશ્રીમદ્ની પુણ્યસ્મૃતિને શાશ્વત બનાવવા કાજે અમોએ તેઓશ્રીમદ્ના મંત્રતુલ્ય નામ સાથે સંકળાયેલ **'પૂ. આ. શ્રી. વિજય રામચંદ્રસૂરિસ્મૃતિ સંસ્કૃત-પ્રાકૃત ગ્રંથમાળા'** પ્રકાશિત કરવાનો શુભ નિર્ણય કર્યો હતો.

તેઓશ્રીમદ્ના પટ્ટાલંકાર સુવિશાલ ગચ્છાધિરાજ પૂ.આ.શ્રી. **વિજય મહોદયસૂરીશ્વરજી મહારાજા**ના આશીર્વાદથી આ શ્રેણીમાં અમો ઠીક-ઠીક આગળ વધી શક્યા હતા. વર્ધમાન તપોનિધિ પૂ.આ.શ્રી.**વિજય ગુણયશસૂરીશ્વરજી** મહારાજની છત્રછાયા અને તેઓશ્રીના શિષ્યપ્રવર પ્રવચન-પ્રભાવક પૂ.આ.શ્રી.**વિજય કીર્તિયશસૂરીશ્વરજી** મહારાજાના શાસ્ત્રીય માર્ગદર્શનને પામી વિવિધ શ્રુત-સેવી મુનિવરો આદિ દ્વારા વિવિધ વિષયના પ્રતાકાર તેમજ પુસ્તકાકાર અનેક ગ્રંથો છપાયા બાદ આ જ શ્રેણીના ૨૩મા પુષ્પ તરીકે **'ધ્યાનશતકમ્-૨'** આગમગ્રંથરત્નનું પ્રકાશન કરતાં અમને સવિશેષ આનંદની અનુભૂતિ થઈ રહી છે. જેના પ્રથમ ભાગમાં ધ્યાનશતકમૂળગ્રંથ-હારિભદ્રીયટીકા-ટિપ્પન-પાઠાંતરોનો સમાવેશ કરાયો છે તથા બીજા ભાગમાં ધ્યાનશતકગ્રંથ સંબંધિ ૧થી ૩૬ પરિશિષ્ટોનો સમાવેશ કરાયો છે. જેમાં અનેક અપ્રગટ ગ્રંથોને પણ સમાવિષ્ટ કરાયા છે.

પરમ યોગીશ્વરશ્રી અરિહંતપ્રભુ અને તેમના આજ્ઞાશાસનના વર્તતા પ્રત્યેક સૂરિ-વાચક-સાધુવૃંદના અનુગ્રહ તેમજ શાસનદેવોની શુભ સહાયથી ધ્યાનયોગસાધનાના પ્રકાશક આવા વધુને વધુ આગમાદિ ગ્રંથોના પ્રકાશનમાં અમે નિમિત્તરૂપ બનીએ એવી ભાવના ભાવવા સાથે સહુ કોઈ અધિકારી બની આવા શ્રુતરત્નોના અભ્યસન દ્વારા પરમાત્મા શ્રી અરિહંત દેવોના યોગસામ્રાજ્યના સ્વામી બની શાશ્વત સુખરૂપ મોક્ષને પામે એ જ શુભકામના.

- સન્માર્ગ પ્રકાશન

Jain Education International For Private & Personal Use Only www.jainelibrary.org

# લાભાર્થી

*સન્માર્ગ પ્રકાશન*

**દ્વારા આયોજિત પૂજ્યપાદ આચાર્ય શ્રી**
**વિજય રામચંદ્રસૂરિ-સ્મૃતિ-સંસ્કૃત-પ્રાકૃત ગ્રંથમાળાના**
**૨૪મા પુષ્પરૂપે**

પ્રકાશિત થતા અનેક મહાપુરુષોની વૃત્તિ તથા અપ્રગટ ગ્રંથો સહિત ૧ થી ૩૯
પરિશિષ્ટોથી વિભૂષિત યુગપ્રધાન પૂજ્યપાદ
આચાર્યવર્ય શ્રીમદ્ **જિનભદ્રગણિ** ક્ષમાશ્રમણ રચિત

# ध्यानशतकम्- भाग-२

જૈન શાસન શિરતાજ, તપાગચ્છાધિરાજ પૂજ્યપાદ ભાવાચાર્ય ભગવંત શ્રીમદ્ વિજય **રામચંદ્રસૂરીશ્વરજી** મહારાજા તથા પ્રશાંતમૂર્તિ સિદ્ધાંત સંરક્ષક પૂજ્યપાદ આચાર્યદેવ શ્રીમદ્ વિજય **શાંતિચંદ્રસૂરીશ્વરજી** મહારાજાના અગણિત ઉપકારોથી ઉપકૃત થયેલ

**સાંચોર (સત્યપુર) નિવાસી શાહ બાબુલાલ કાળુચંદજી કીસનાજી**
**શ્રીશ્રીશ્રીમાળની સુપુત્રી મુમુક્ષુરત્ના કુમારી-રેખાબેન**
**દીક્ષાપછીનું નૂતનનામ-પૂજ્ય સાધ્વીજી શ્રી મોક્ષધ્યેયાશ્રીજી**
**મહારાજની વિ.સ. ૨૦૬૩ વૈશાખ સુદ-૭ની ભવ્ય દીક્ષા પ્રસંગે થયેલી**
**જ્ઞાનખાતાની ઉપજમાંથી પ્રકાશિત થયો છે.**

**જેની**

**અમો હાર્દિક અનુમોદના કરીએ છીએ અને**
**ભવિષ્યમાં પણ તેઓના હાથે ઉત્તરોત્તર ઉત્તમ કક્ષાની**
**શ્રુતભક્તિ થતી રહે એવી શુભકામના કરીએ છીએ.**

*સન્માર્ગ પ્રકાશન*

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org



વયસ્થવિર-જ્ઞાનસ્થવિર-પર્યાયસ્થવિર-સંઘસ્થવિરાદિ ગુણોપેત, તપોનિધાન,
સિદ્ધાંત સંરક્ષક, સંયમમૂર્તિ, વચનસિદ્ધ પરમપૂજ્ય પરમતારક પૂજ્યપાદ

**આચાર્યદેવ શ્રીમદ્ વિજય સિદ્ધિસૂરીશ્વરજી મહારાજા**

(પૂજ્યપાદ શ્રી બાપજી મહારાજ)

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

# સમર્પણમ્

- મારી ચાર વર્ષની ઉંમરથી જ મારા પિતાશ્રીએ મને જેમના ખોળામાં સમર્પિત કર્યો;
- મારા આયંબિલો અને પચ્ચક્ખાણો જેમના સાનિધ્યમાત્રથી અખંડિત રહ્યાં;
- મારા જીવનના 'સ્વપ્નગુરુ' રૂપે એકમાત્ર જેઓનું જ સ્થાન-માન હતું;
- જેઓના કાળધર્મના સમાચારે મારા જીવનમાં ધરતીકંપ જેવી સંવેદના સર્જી હતી;
- જેમની ગેરહયાતીમાં મહિનો માસ સુધી ખાલીપો અને ખાવા-પીવાની અનિચ્છા ઘર કરી ગઈ હતી;
- જેમની આંખોમાં મને મા દેખાતી, જેમના હાથોમાં પિતાનો સ્પર્શ અનુભવાતો અને જેમની મીઠી પ્રેરણા અને મધુર સંબોધનોથી મારા અંગે અંગમાં અધ્યાત્મના રોમાંચ ઊભા થતા;
- જેમની દિવ્ય-કૃપાથી જ મને જગતના સુવિશુદ્ધપ્રરૂપક ગુરુદેવ પૂ.આ. શ્રીમદ્વિજય રામચંદ્રસૂરિરાજનો ભેટો થયો;
- મારી દીક્ષાના સમયે રજોહરણ-પ્રદાનની વેળાએ મેં મારા ગુરુદેવની પાછળ ઉભેલા અને મને ઓઘો આપતા એ મારા બાપજીનાં જાણે કે સાક્ષાત્ દર્શન કર્યાં હતાં;

જીવનની પ્રત્યેક પળે, કસોટીની કપરી ઘડીઓમાં, સાધના માટેનું સંગીન માર્ગદર્શન
જેઓશ્રીના શુભસ્મરણે મને સંપ્રાપ્ત થતું રહ્યું છે તે
સ્વનામધન્ય, વય-પુણ્ય-જ્ઞાન-પર્યાય-સંઘસ્થવિર, વચનસિદ્ધ,
મણિગુરુવિશ્વાસધામ, રાજનગરના લાડીલા, જૈનશાસન જવાહીર,
સૂરિમંત્રસાધક, ધ્યાનમગ્ન પૂજ્યપાદ આચાર્યદેવ શ્રીમદ્વિજય
**સિદ્ધિસૂરીશ્વરજી (બાપજી) મહારાજાની ૫૦મી સ્વર્ગારોહણ તિથિ પ્રસંગે**
તેઓશ્રીમદ્ના પાવન પાણિપદ્મોમાં '**ધ્યાનશતકમ્-૨**' મહાનગ્રંથનું
સાદર સમર્પણમ્
સેવકાણુ - **વિજય કીર્તિયશસૂરિ.**

Jain Education International For Private & Personal Use Only

# [ध्यानशतक - भाग-१]

## प्रस्तावना-अनुक्रमः


| વિષય | પત્રાંક |
|---|---|
| ધ્યાનશતક પ્રથમભાગની અનુક્રમણિકા | ૧ |
| ધ્યાનશતક દ્વિતીયભાગની અનુક્રમણિકા | ૭ |
| સંપાદકીય | ૧૫ |
| ગ્રંથપરિચય | ૨૭ |
| ગ્રંથગાથાપ્રમાણ | ૨૮ |
| ધ્યાનશતક-ગ્રંથવિષય [CHARTS] | ૩૦ |
| આર્તધ્યાન વગેરે ચાર ધ્યાનનું વર્ણન કયા ગ્રંથોમાં ? | ૪૦ |
| चत्वारि आर्त्तध्यानानि | ૪૨ |
| चत्वारि रौद्रध्यानानि | ૪૩ |
| ગ્રંથકારશ્રીનો પરિચય | ૪૪ |
| ગ્રંથકાર અને રચનાકાળ [સં. વિજયકુમાર] | ૪૫ |
| ટીકાશૈલી | ૫૧ |
| ટીકાકારશ્રીનો પરિચય | ૫૨ |
| પ્રસ્તુતગ્રંથ વિશેષપદાર્થો | ૫૭ |
| હસ્તલિખિતપ્રતો [PHOTOS] | ૬૪ |
| હસ્તલિખિત પ્રતોનો વિશેષ પરિચય | ૭૭ |
| ग्रंथ का विषय [पं. बालचन्द्र शास्त्री] | ૮૦ |
| ध्यान के स्वामी [पं. बालचन्द्र शास्त्री] | ૮૮ |
| ध्यानशतक का तुलनात्मक अध्ययन [पं. बालचन्द्र शास्त्री] | ૯૬ |
| ध्यानस्तुति-अधिकार [अध्यात्मसार] | ૧૨૭ |


Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

# ધ્યાનશતક: પ્રથમભાગની અનુક્રમણિકા


| गाथा-क्रमः | विषयः | વિષય | पत्राङ्कः |
|---|---|---|---|
| १. | मङ्गलाचरणम् - | મંગલાચરણ | ૧ |
| | प्रभोः अनुत्तरयोगाः | પ્રભુના અનુત્તર યોગો | ૩ |
| २. | ध्यानाध्यानस्वरूपम् | ધ્યાન અને અધ્યાનનું સ્વરૂપ | ૫ |
| | भावलेश्या जीवपरिणामरूपा | ભાવલેશ્યા એ જીવના પરિણામરૂપ | ૫ |
| | कायोत्सर्गस्य गुणाः | કાયોત્સર્ગના ગુણો | ૬ |
| | कायिक-मानसिक-वाचिकध्यानस्वरूपम् | કાયિક - માનસિક - વાચિકધ્યાન | ૯ |
| | सप्तप्रकारकं ध्यानम् | સાત પ્રકારનું ધ્યાન | ૧૦ |
| | भावना-ऽनुप्रेक्षा-चिन्तास्वरूपम् | ભાવના - અનુપ્રેક્ષા - ચિંતાનું સ્વરૂપ | ૧૧ |
| | सप्तप्रकारिका - चिन्ता | સાત પ્રકારની ચિંતા | ૧૧ |
| ३ | ध्यानस्य कालस्वामिनौ | ધ્યાનનો કાળ તથા ધ્યાનના સ્વામી | ૧૨ |
| | द्विप्रकारकं ध्यानम् | બે પ્રકારનું ધ્યાન | ૧૨ |
| | ध्यानस्वामी उत्तमसंघयण शाली | ધ્યાન ઉત્તમ સંઘયણાવાળાને સંભવે | ૧૩ |
| | योगानां स्वरूपम् | યોગોનું સ્વરૂપ | ૧૪ |
| | अयोगि-सयोगिनोः योगनिरोधरूपध्यानम् | યોગનિરોધ સ્વરૂપ ધ્યાન અયોગિને તથા સયોગિને | ૧૫ |
| ४ | ध्यानादनु चिन्ता ध्यानान्तरं वा | ધ્યાનકાળ પછી ચિંતા અથવા ધ્યાનાંતર૧૫ | |
| | चिरकालीनध्यानस्य घटमानता | ઘણા કાળ સુધી ધ્યાનની ઘટમાનતા | ૧૬ |
| | ध्यानान्तरिका | ધ્યાનાંતરિકા | ૧૬ |
| ५ | ध्यानस्य चतुर्भेदाः | ધ્યાનના આર્ત વગેરે ચાર ભેદો | ૧૬ |
| | आर्त्तध्यानादिनां चतुर्णां स्वरूपम् | આર્તધ્યાન વગેરે ચારનું સ્વરૂપ | ૧૭ |
| | आर्त्तध्यानादिनां फलम् | આર્તધ્યાન વગેરે ચારના ફળ | ૨૧ |
| | नवप्रकारकं ध्यानम् | ધ્યાનના નવ પ્રકાર | ૨૧ |
| | **[आर्त्तध्यानम् ]** | **[આર્તધ્યાન]** | |
| ६ | अनिष्टवियोगचिन्तानाम प्रथमभेदः | પ્રથમ ભેદ : અનિષ્ટવિયોગ ચિંતન | ૨૨ |
| ७ | रोगवियोगचिन्तानाम द्वितीयभेदः | બીજો ભેદ : રોગવિયોગ ચિંતન | ૨૩ |
| ८ | इष्टावियोगचिन्तानाम तृतीयभेदः | ત્રીજો ભેદ : ઈષ્ટઅવિયોગ ચિંતન | ૨૪ |
| ९ | निदानचिन्तानाम चतुर्थभेदः | ચોથો ભેદ : નિદાનચિંતન | ૨૬ |
| | ममत्वमार्त्तध्यानरूपम् | મમત્વ એ આર્તધ્યાન સ્વરૂપ | ૨૬ |


Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

| गाथा-क्रमः | विषयः | વિષય | पत्राङ्कः |
|---|---|---|---|
| १० | संसारवर्धकं तिर्यगगतेश्चमूलमार्त्त ध्यानम् | આર્તધ્યાન એ સંસારને વધારનાર છે, તિર્યંચગતિનું મૂળ છે. | २८ |
| | निदानमनन्तसंसारानुबन्धि | અનંત સંસારનો અનુબંધ કરનાર નિયાણું | २८ |
| | आर्त्तस्य चतुर्भेदानां स्वरूपम् | આર્તધ્યાનના ચાર ભેદોનું સ્વરૂપ | २८ |
| ११ | साधोरार्त्तध्यानं भवति न वा ? | સાધુ સંબંધી આર્તધ્યાનની વિચારણા | ૩૧ |
| १२ | प्रशस्तालम्बनस्य स्वरूपम् | પ્રશસ્ત આલંબનનું સ્વરૂપ | ૩૨ |
| १३ | आर्त्तध्यानं संसारतरुबीजरूपम् | આર્તધ્યાન એ સંસાર વૃક્ષનાં બીજ સ્વરૂપ | ૩૩ |
| १४ | लेश्याः | લેશ્યા | ૩૩ |
| १५ | लिङ्गानि | લિંગો | ૩૪ |
| १६ | लिङ्गानि | લિંગો | ૩૪ |
| १७ | लिङ्गानि | લિંગો | ૩૪ |
| १८ | स्वामी | સ્વામી | ૩૬ |
| | स्वामिनो विचारणा | સ્વામી સંબંધી વિચારણા | ૩૭ |
| | स्वामिसत्कः तात्पर्यार्थः | સ્વામી સંબંધી તાત્પર્યાર્થ | ૩૯ |
| | **[रौद्रध्यानम् ]** | **[રૌદ્રધ્યાન]** | |
| १९ | हिंसानुबन्धीनाम प्रथमभेदः | પ્રથમ ભેદ : હિંસાનુબંધી | ૪૦ |
| २० | मृषानुबन्धीनाम द्वितीयभेदः | બીજો ભેદ : મૃષાનુબંધી | ૪૨ |
| | त्रिप्रकारकमसत्यम् | અસત્યના ત્રણ પ્રકાર | ૪૨ |
| २१ | स्तेयानुबन्धीनाम तृतीयभेदः | ત્રીજો ભેદ : સ્તેયાનુબંધી | ૪૬ |
| २२ | संरक्षणानुबन्धीनाम चतुर्थभेदः | ચોથો ભેદ : સંરક્ષણાનુબંધી | ૪૭ |
| | चतुष्प्रकारकरौद्रस्य स्वरूपम् | ચાર પ્રકારના રૌદ્રધ્યાનનું સ્વરૂપ | ૪૮ |
| २३ | स्वामी | સ્વામી | ૪૯ |
| | स्वामिनो विचारणा | સ્વામી સંબંધી વિચારણા | ૫૦ |
| २४ | संसारवर्धकं तिर्यगगतेश्च मूलं रौद्रध्यानम् | રૌદ્રધ્યાન એ સંસાર વધારનાર તથા નરકગતિનું મૂળ | ૫૧ |
| २५ | लेश्याः | લેશ્યા | ૫૧ |
| २६ | लिङ्गानि | લિંગો | ૫૨ |
| | उसन्न-बहुलादिनां स्वरूपम् | ઉત્સન્ન-બહુલ-નાનાવિધ-આમરણદોષોનું સ્વરૂપ | ૫૨ |
| २७ | लिङ्गानि | લિંગો | ૫૩ |
| | **[धर्मध्यानम् ]** | **[ધર્મધ્યાન]** | |
| २८ | द्वाराणि | દ્વારોના નામ | ૫૪ |
| २९ | द्वाराणि | દ્વારોના નામ | ૫૪ |
| ३० | **(१) भावनाद्वारम्** | **(૧) ભાવનાદ્વાર** | ૫૪ |
| ३१ | ज्ञानभावनायाः स्वरूपं फलानि च | જ્ઞાનભાવનાનું સ્વરૂપ તથા લાભો | ૫૬ |


Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

| गाथा-क्रमः | विषयः | વિષય | पत्राङ्कः |
|---|---|---|---|
| ३२ | दर्शनभावनायाः स्वरूपं फलानि च | દર્શનભાવનાનું સ્વરૂપ તથા લાભો | ૫૮ |
| ३३ | चारित्रभावनायाः स्वरूपं फलानि च | ચારિત્રભાવનાનું સ્વરૂપ તથા લાભો | ૬૦ |
| ३४ | वैराग्यभावनायाः स्वरूपं फलानि च | વૈરાગ્યભાવનાનું સ્વરૂપ તથા લાભો | ૬૧ |
| | अप्रमादैकाग्रादिभावनानां स्वरूपम् | અપ્રમાદ-એકાગ્ર વગેરે ભાવનાઓનું સ્વરૂપ | ૬૧ |
| | वैराग्यस्य स्वरूपम् | વૈરાગ્યનો અર્થ | ૬૨ |
| ३५ | **(२) देशद्वारम्** - अपरिणतयोगिने | **(૨) દેશદ્વાર** - અપરિણતયોગી માટે | ૬૩ |
| ३६ | परिणतयोगिने स्थानम् | સ્થાન - પરિણતયોગી માટે | ૬૪ |
| ३७ | स्थानाय सामान्यनियमाः | સ્થાન માટે સામાન્ય નિયમો | ૬૪ |
| ३८ | **(३) कालद्वारम्** | **(૩) કાળદ્વાર** | ૬૫ |
| ३९ | **(४) आसनद्वारम्** | **(૪) આસનદ્વાર** | ૬૬ |
| ४० | देश-काला-ऽऽसेनष्वनियमस्य कारणम् | દેશ-કાળ-આસનમાં અનિયમનું કારણ | ૬૬ |
| ४१ | ध्यानाय योगसमाधेरावश्यकता | ધ્યાન માટે યોગોની સમાધિની મહત્તા | ૬૭ |
| ४२ | **(५) आलम्बनद्वारम्**-श्रुतधर्मचारित्रधर्मौ | **(૫) આલંબનદ્વાર** - શ્રુતધર્મ તથા ચારિત્રધર્મ | ૬૭ |
| | वाचनादीनां स्वरूपम् | વાચના વગેરેનું સ્વરૂપ | ૬૮ |
| ४३ | सूत्रादेरालम्बनत्वे कारणम् | સૂત્રાદિ આલંબનપણામાં કારણ | ૬૮ |
| ४४ | **(६) क्रमद्वारम्** | **(૬) ક્રમદ્વાર** - ધર્મધ્યાન તથા શુકલધ્યાન | ૬૯ |
| ४५ | **(७) ध्यातव्यद्वारम्** | **(૭) ધ્યાતવ્ય** | ૬૯ |
| | आज्ञाविचयनाम प्रथमभेदः | પ્રથમ ભેદ : આજ્ઞાવિચય | ૬૯ |
| ४६ | आज्ञाविचयनाम प्रथमभेदः | પ્રથમ ભેદ : આજ્ઞાવિચય | ૭૦ |
| ४७ | आज्ञाया अबोधे कारणानि | આજ્ઞા ન સમજાવવાના કારણો | ૭૪ |
| ४८ | आज्ञाया अबोधे कारणानि तत्समयस्य च चिन्तनम् | આજ્ઞા ન સમજાવવાના કારણો તથા તે સમયનું ચિંતન | ૭૪ |
| ४९ | जिनस्य यथार्थवादित्वे कारणानि | પરમાત્મા અન્યથાવાદી ન હોવાના કારણો | ૭૫ |
| ५० | अपायविचयनाम द्वितीयभेदः | બીજો ભેદ : અપાયવિચય | ૭૫ |
| ५१ | विपाकविचयनाम तृतीयभेदः | ત્રીજો ભેદ : વિપાકવિચય | ૭૮ |
| ५२ | संस्थानविचयनाम चतुर्थभेदः | ચોથો ભેદ : સંસ્થાનવિચય | ૮૨ |
| | द्रव्याणां लक्षण-संस्थानादीनां चिन्तनम् | દ્રવ્યોના લક્ષણ, સંસ્થાન, આસન વગેરે | ૮૨ |
| ५३ | लोकस्वरूपचिन्तनम् | લોકનું સ્વરૂપ | ૮૫ |
| ५४ | पृथ्वी-वलयादीनां स्वरूपचिन्तनम् | પૃથ્વી, વલય, દ્વીપ, સાગર વગેરેનું ચિંતન | ૮૬ |
| ५५ | जीवस्वरूपचिन्तनम् | જીવનું સ્વરૂપ | ૮૭ |
| ५६ | संसारसागरस्वरूपचिन्तनम् | સંસારસાગરનું સ્વરૂપ | ૮૮ |


Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

| गाथा-क्रमः | विषयः | વિષય | पत्राङ्कः |
|---|---|---|---|
| ५७ | संसारसागरस्वरूपचिन्तनम् | સંસારસાગરનું સ્વરૂપ | ૮૮ |
| ५८ | चारित्रमहापोतस्वरूपचिन्तनम् | ચારિત્રસ્વરૂપ મહાજહાજનું સ્વરૂપ | ૮૯ |
| ५९ | चारित्रमहापोतस्वरूपचिन्तनम् | ચારિત્રસ્વરૂપ મહાજહાજનું સ્વરૂપ | ૮૯ |
| ६० | चारित्रमहापोतस्वरूपचिन्तनम् | ચારિત્રસ્વરૂપ મહાજહાજનું સ્વરૂપ | ૮૯ |
| ६१ | मोक्षसुखस्वरूपचिन्तनम् | મોક્ષસુખનું સ્વરૂપ | ૯૦ |
| ६२ | सर्वसिद्धान्तपदार्थचिन्तनम् | સર્વ સિદ્ધાંતના પદાર્થોની વિચારણા કરવી | ૯૦ |
| | आज्ञाविचयादीनां स्वरूपम् | આજ્ઞાવિચય વગેરે ચાર ભેદોનું સ્વરૂપ | ૯૧ |
| ६३ | **(८) ध्यातृद्वारम्** | **(૮) ધ્યાતૃદ્વાર** | ૯૫ |
| | ध्यातुरभ्यन्तरस्वरूपम् | ધ્યાતાનું અભ્યંતર સ્વરૂપ | ૯૫ |
| | ध्यातृविचारणा | ધ્યાતાની વિચારણા | ૧૦૨ |
| ६४ | शुक्लध्यानध्यातृस्वरूपम् | શુક્લધ્યાનના ધ્યાતા | ૧૦૩ |
| ६५ | **(९) अनुप्रेक्षाद्वारम्** | **(૯) અનુપ્રેક્ષાદ્વાર** | ૧૦૫ |
| | अनित्यादीनां स्वरूपम् | અનિત્યાદિ બાર ભાવનાઓ | ૧૦૬ |
| ६६ | **(१०) लेश्याद्वारम्** | **(૧૦) લેશ્યાદ્વાર** | ૧૧૦ |
| ६७ | **(११) लिङ्गद्वारम्** | **(૧૧) લિંગદ્વાર-** | ૧૧૧ |
| ६८ | लिङ्गानि | લિંગદ્વાર | ૧૧૧ |
| | निसर्गादीनां सम्यक्त्वभेदानां वर्णनम् | નિસર્ગ વગેરે સમ્યક્ત્વના દશ ભેદોનું વર્ણન | ૧૧૨ |
| | विनयस्वरूपम् | વિનયનું સ્વરૂપ | ૧૧૫ |
| | दानस्वरूपम् | દાનનું સ્વરૂપ | ૧૧૫ |
| | संयमस्वरूपम् | સંયમનું સ્વરૂપ | ૧૧૭ |
| | **[शुक्लध्यानम् ]** | **[શુક્લધ્યાન]** | |
| ६९ | **(५) आलम्बनद्वारम्** | **(૫) આલંબનદ્વાર** | ૧૧૮ |
| | क्षमादीनां स्वरूपम् | ક્ષમા વગેરેનું સ્વરૂપ | ૧૧૮ |
| ७० | **(६) क्रमद्वारम्** | **(૬) ક્રમદ્વાર** | ૧૨૫ |
| ७१ | छद्मस्थेन मनोविषयसंक्षेपीकरणे दृष्टान्तः | છદ્મસ્થ દ્વારા મનના વિષયનું સંક્ષેપીકરણનું દૃષ્ટાન્ત | ૧૨૬ |
| ७२ | उपनयः | ઉપનય | ૧૨૬ |
| ७३ | अन्यदृष्टान्तः | અન્ય દૃષ્ટાન્ત | ૧૨૬ |
| ७४ | उपनयः | દૃષ્ટાંતનો ઉપનય | ૧૨૭ |
| ७५ | तृतीयदृष्टान्तोपनयौ | ત્રીજું દૃષ્ટાંત તથા ઉપનય | ૧૨૭ |
| ७६ | शेषयोगनिरोधविधिः | શેષયોગનિરોધવિધિ | ૧૨૭ |
| ७७ | **(७) ध्यातव्यद्वारम्** | **(૭) ધ્યાતવ્યદ્વાર** | ૧૩૦ |


Jain Education International 2010_02　　For Private & Personal Use Only　　www.jainelibrary.org

| गाथा-क्रमः | विषयः | વિષય | पत्राङ्कः |
|---|---|---|---|
| | पृथक्त्ववितर्कसविचारनाम प्रथमभेदः | પ્રથમભેદ : પૃથકત્વવિતર્કસવિચાર | ૧૩૦ |
| ७८ | पृथक्त्ववितर्कसविचारनाम प्रथमभेदः | પ્રથમભેદ : પૃથકત્વવિતર્કસવિચાર | |
| | प्रथमभेदस्य फलम् | પ્રથમભેદનું ફળ | ૧૩૫ |
| ७९ | एकत्ववितर्काविचारनाम द्वितीयभेदः | બીજો ભેદ : એકત્વવિતર્કઅવિચાર | ૧૩૫ |
| ८० | एकत्ववितर्काविचारनाम द्वितीयभेदः | બીજો ભેદ : એકત્વવિતર્કઅવિચાર | ૧૩૫ |
| | द्वितीयभेदफलम् | બીજા ભેદનું ફળ | ૧૩૭ |
| ८१ | सूक्ष्मक्रियाऽनिर्वर्तिनाम तृतीयभेदः | ત્રીજા ભેદ : સૂક્ષ્મક્રિયાઅનિવર્ત્તિ | ૧૩૯ |
| ८२ | व्युच्छिन्नक्रियाऽप्रतिपातिनाम चतुर्थभेदः | ચોથો ભેદ : વ્યુચ્છિન્નક્રિયાઅપ્રતિપાતિ | ૧૪૪ |
| | चतुर्भेदानां स्वरूपम् | ચારે ભેદનું સ્વરૂપ | ૧૪૫ |
| ८३ | चतुर्षु भेदेषु योगसङ्ख्या | ચારે ભેદમાં યોગ સંખ્યા | ૧૪૭ |
| ८४ | सयोगिनो ध्यानस्य सिद्धिः | સયોગિને ધ્યાનની સિદ્ધિ | ૧૪૯ |
| ८५ | अयोगिनो ध्यानस्य सिद्धिः | અયોગિને ધ્યાનની સિદ્ધિ | ૧૪૯ |
| ८६ | अयोगिनो ध्यानस्य सिद्धिः | અયોગિને ધ્યાનની સિદ્ધિ | ૧૫૦ |
| ८७ | **(९) अनुप्रेक्षाद्वारम्** | **(૯) અનુપ્રેક્ષાદ્વાર** | ૧૫૧ |
| ८८ | अनुप्रेक्षा | અનુપ્રેક્ષાઓ | ૧૫૧ |
| ८९ | **(१०) लेश्याद्वारम्** | **(૧૦) લેશ્યાદ્વાર** | ૧૫૨ |
| ९० | **(११) लिङ्गद्वारम्** | **(૧૧) લિંગદ્વાર** | ૧૫૩ |
| ९१ | अवधासंमोहयोः स्वरूपम् | અવધ અને અસંમોહનું સ્વરૂપ | ૧૫૩ |
| ९२ | विवेकव्युत्सर्गयोः स्वरूपम् | વિવેક અને વ્યુત્સર્ગનું સ્વરૂપ | ૧૫૩ |
| ९३ | **(१२) धर्मध्यानफलम्** | **(૧૨) ધર્મધ્યાનનું ફળ** | ૧૫૪ |
| ९४ | **(१२) शुक्लध्यानफलम्** | **(૧૨) શુક્લધ્યાનનું ફળ** | ૧૫૬ |
| ९५ | धर्मशुक्लध्याने संसाराविरोधिनी | ધર્મ-શુક્લધ્યાન સંસારના વિરોધી | ૧૫૬ |
| ९६ | ध्यानं मोक्षहेतुः | ધ્યાન - મોક્ષ હેતુ | ૧૫૭ |
| ९७ | दृष्टान्तेन सिद्धिः | દૃષ્ટાંત દ્વારા સિદ્ધિ | ૧૫૭ |
| ९८ | दृष्टान्तेन सिद्धिः | દૃષ્ટાંત દ્વારા સિદ્ધિ | ૧૫૭ |
| ९९ | ध्यायिनः कर्मनाशोऽवश्यं भवति | ધ્યાનિને કર્મનાશ અવશ્ય | ૧૫૮ |
| १०० | ध्यानं कर्मनाशकम् | ધ્યાન - કર્મને નાશ કરનાર | ૧૫૮ |
| १०१ | दृष्टान्तेन स्पष्टता | દૃષ્ટાંત દ્વારા સ્પષ્ટતા | ૧૫૮ |
| १०२ | दृष्टान्तेन स्पष्टता | દૃષ્ટાંત દ્વારા સ્પષ્ટતા | ૧૫૯ |
| १०३ | इहलौकिकं ध्यानफलम् | ઈહલૌકિક ધ્યાનફળ | ૧૫૯ |
| १०४ | इहलौकिक ध्यानफलम् | ઈહલૌકિક ધ્યાનફળ | ૧૫૯ |


Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

| गाथा-क्रमः | विषयः | વિષય | पत्राङ्कः |
|---|---|---|---|
| १०५ | सर्वे साध्वाचाराः ध्यानरूपाः | સાધુનો સર્વ આચાર ધ્યાનરૂપ | ૧૬૦ |
| १०६ | ग्रन्थकर्तारः | ગ્રંથકર્તા | ૧૬૦ |
| | **पाठान्तराणि** | **પાઠાંતરની નોંધ** | |
| | गाथाः १ तः ११ | ગાથા ૧ થી ૧૧ | ૧૬૧ |
| | गाथाः १२ तः २२ | ગાથા ૧૨ થી ૨૨ | ૧૬૨ |
| | गाथाः २३ तः ३९ | ગાથા ૨૩ થી ૩૯ | ૧૬૩ |
| | गाथाः ४० तः ५१ | ગાથા ૪૦ થી ૫૧ | ૧૬૪ |
| | गाथाः ५१ तः ६४ | ગાથા ૫૧ થી ૬૪ | ૧૬૫ |
| | गाथाः ६४ तः ७७ | ગાથા ૬૪ થી ૭૭ | ૧૬૬ |
| | गाथाः ७९ तः १०२ | ગાથા ૭૯ થી ૧૦૨ | ૧૬૭ |
| | गाथाः १०३ तः १०६ | ગાથા ૧૦૩ થી ૧૦૬ | ૧૬૮ |


**मोक्ष कर्मक्षयादेव, स चात्मज्ञानतो मतः ।**
**ध्यान साध्यं मतं तञ्च, तद् ध्यानं हितमात्मनः ।।११३।।** *યોગશાસ્ત્ર, પ્ર-૪ ।।*

*કર્મના ક્ષયથી જ મોક્ષની પ્રાપ્તિ, તે કર્મનો ક્ષય આત્મજ્ઞાનથી અને તે આત્મજ્ઞાન ધ્યાનથી સાધ્ય છે. માટે ધ્યાન જ આત્માનું હિત કરનાર છે.*

**भदन्त ! द्वादशाङ्गस्य, किं सारमिति कथ्यताम् ।**
**सूरिः प्रोवाच सारोऽत्र, ध्यानयोगः सुनिर्मलः ।।**
**मूलोत्तरगुणाः सर्वे, सर्वा चेयं बहिष्क्रिया ।**
**मुनीनां श्रावकाणां च, ध्यानयोगार्थमीरिता ।**
**मनःप्रसादः साध्योऽत्र मुक्त्यर्थं ध्यानसिद्धये ।**
**अहिंसादिविशुद्धेन सोऽनुष्ठानेन साध्यते ।।** *ઉપમિતિસારોદ્ધાર, પ્ર. ૮ ।।*

*હે ભગવંત ! દ્વાદશાંગીનો સાર શું છે ? કહો. આચાર્ય ભગવંત જણાવે છે કે, અત્યંત નિર્મળ એવો ધ્યાનયોગ જ દ્વાદશાંગીના સાર સ્વરૂપ છે. સર્વ મૂલગુણો તથા ઉત્તરગુણો અને આ સર્વ સાધુ અને શ્રાવકોનો બાહ્ય ક્રિયાકલાપ ધ્યાનયોગ માટે કહેવાયો છે. મુક્તિ માટે આ ધ્યાન યોગ મનની પ્રસન્નતાથી સાધ્ય છે. વળી, અહિંસા વગેરેથી વિશુદ્ધ એવા અનુષ્ઠાન વડે તે ધ્યાનયોગ સિદ્ધ કરી શકાય છે.*

**सद्धर्मध्यानसन्धान-हेतवः श्रीजिनेश्वरैः ।**
**मैत्रीप्रभृतयः प्रोक्ता-श्चतस्त्रो भावनाः पराः ।।** *- શાંતસુધારસ, પ્ર. ૧૩ ।।*

*શ્રી જિનેશ્વર પરમાત્માઓ વડે મૈત્રી વગેરે ચાર શ્રેષ્ઠ ભાવનાઓને સદ્ ધર્મધ્યાનની પ્રાપ્તિની કારણભૂત કહેવાયી છે.*

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

# ધ્યાનશતક: દ્વિતીયભાગની અનુક્રમણિકા

## परिशिष्टानि, १ तः ३६


| परिशिष्टक्रमः | | विषयः | पत्राङ्कः |
|---|---|---|---|
| १. | A | कालसौकरिककथानकम् । | १ |
| | B | सम्यक्त्वातिचारस्वरूपम् । | ३ |
| | C | पञ्चक्रियास्वरूपम् । | ७ |
| | D | लोकस्वरूपम् । | ११ |
| २. | | आवश्यकचूर्णिगतध्यानस्वरूपम् । | १४ |
| ३. | | ध्यानशतकस्यार्थलेश-दीपिकाऽवचूर्ण्य-वचूरि-टीकाः । | १९ |
| ४. | | ध्यानशतकहारिभद्रीयवृत्तिटिप्पनकम् । | ८५ |
| ५. | A | ध्यानशतकहारिभद्रीयवृत्तिविषमपदपर्यायाः । | ८८ |
| | B | ध्यानशतकहारिभद्रीयवृत्तिविषमपदपर्यायाः । | ८८ |
| ६. | | दशवैकालिकचूर्णिगतध्यानस्वरूपम् । | ८९ |
| ७. | | संबोधप्रकरणा-ध्यात्मसारगतध्यानस्वरूपम् । | ९३ |
| ८. | | दर्शनरत्नरत्नाकरगतध्यानस्वरूपम् । | १०२ |
| ९. | | ध्यानदीपिका । | ११२ |
| १०. | | संवेगरङ्गशालागतध्यानस्वरूपम् । | १२६ |
| ११. | | लोकप्रकाशगतध्यानस्वरूपम् । | १२९ |
| १२. | | धर्मसंग्रहगतध्यानस्वरूपम् । | १३६ |
| १३. | | प्रतिक्रमणसूत्रपदविवृत्तिगतध्यानस्वरूपम् । | १३८ |
| १४. | | श्राद्धदिनकृत्यगतध्यानस्वरूपम् । | १४० |
| १५. | A | आत्मप्रबोधगतध्यानस्वरूपम् । | १४१ |
| | B | विचारसारप्रकरणगतध्यानस्वरूपम् | १४३ |
| १६. | | त्रिषष्टिध्यानकथानककुलकम् । | १४८ |
| १७. | | ध्यानचतुष्टयस्य विचारः । | १५२ |
| १८. | | ध्यानस्वरूपणप्रबन्धः । | १५३ |
| १९. | | ध्यानदीपिकाचतुष्पदी । | १६७ |
| २०. | | नवतत्त्वसंग्रहगतध्यानस्वरूपम् । | २०९ |
| २१. | | पञ्चपरमेष्ठिमंत्रराजध्यानमाला | २१८ |


Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

| परिशिष्टक्रमः | विषयः | पत्राङ्कः |
|---|---|---|
| २२. | जैनेन्द्रसिद्धान्तकोशगतध्यानस्वरूपम् । | २३० |
| २३. | ध्यानशतकगाथानुक्रमणिका । | ३०२ |
| २४. | ध्यानशतकगाथा-उद्धृतानां ग्रन्थानां सूचिः । | ३०६ |
| २५. | ध्यानशतकमूलग्रन्थगतविशिष्टशब्दानुक्रमः । | ३०७ |
| २६. | ध्यानशतकटीकागतविशिष्टशब्दानुक्रमः । | ३१६ |
| २७. | ध्यानशतकटीकागतनिरुक्तशब्दानि । | ३२० |
| २८. | ध्यानशतकटीकागतावतरणवाक्यानि । | ३२२ |
| २९. | टीकानुसारिपाठभेदाः । | ३२४ |
| ३०. | टीकानुसारिमतभेदाः । | ३२४ |
| ३१. | टीकागतग्रन्थनामोल्लेखादि । | ३२४ |
| ३२. | टीकागतन्यायोक्तयः । | ३२५ |
| ३३. | विभिन्नग्रन्थाधारितध्यानशब्दस्य व्याख्याः । | ३२६ |
| ३४. | मुद्रितामुद्रितसाहित्यसूचिः । | ३२८ |
| ३५. | टिप्पन-परिशिष्टोपयुक्तग्रन्थावलिः । | ३२९ |
| ३६. | ग्रन्थसङ्केतसूचिः । | ३३२ |


***सज्झायसंजमतवे वेआवच्चे अ झाणजोगे अ ।***
***जो रमइ नो रमइ असंजमम्मि सो वच्चई सिद्धिं ।।३६६।।*** *- દશવૈકાલિકનિર્યુક્તિ ॥*

*જે સાધક સ્વાધ્યાય, સંયમ, તપ, વૈયાવચ્ચ અને ધ્યાનયોગમાં રમે છે તથા અસંયમની પ્રવૃત્તિઓમાં રમતો નથી તે સાધક સિદ્ધિગતિને પામે છે.*

***यदैव संयमी साक्षात्समत्वमवलम्बते ।***
***स्यात्तदैव परं ध्यानं तस्य कर्मौघघातकम् ।।*** - [ ]

*સંયમી મહાત્મા જ્યારે સાક્ષાત્ સમત્વનું આલંબન ગ્રહણ કરે છે ત્યારે જ સંયમીને કર્મના સમૂહને નાશ કરનાર શ્રેષ્ઠ ધ્યાન પ્રગટ થાય છે.*

***अनादिविभ्रमोद्भूतं रागादितिमिरं धनम् ।***
***स्फुटत्याशु जीवस्य ध्यानार्कः प्रविजृम्भितः ।।*** - [ ]

*પ્રગટ થયેલ ધ્યાનરૂપી સૂર્ય, અનાદિકાળના વિભ્રમથી ઉત્પન્ન થયેલ રાગાદિ અંધકારરૂપ વાદળને જલ્દીથી નષ્ટ કરે છે.*

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

# परिशिष्टम्-१A

[ध्यानशतकस्य गाथा-२६ वृत्तौ रौद्रध्यायिनो लिङ्गाधिकारे **कालसौकरिको** दृष्टान्ततया दर्शितः । तद् दृष्टान्तमत्र कलिकालसर्वज्ञाचार्यश्रीमद्हेमचन्द्रसूरीश्वर-विरचित-**योगशास्त्रस्य द्वितीयप्रकाशस्य** त्रिंशत्तमगाथाया अन्तर्गताभिः ९ तः ४७ गाथाभिरत्र गृहीतम् । - सम्पा०]

**कालसौकरिकोऽप्यूचे** राज्ञा सूनां विमुञ्च यत्। दास्येऽहमर्थमर्थस्य लोभात्त्वमसि सौनिकः ।। १।।
सूनायां ननु को दोषो यया जीवन्ति मानवाः। तां न जातु त्यजामीति कालसौकरिकोऽवदत् ।। २ ।।
सूनाव्यापारमेषोऽत्र करिष्यति कथं न्विति। नृपः क्षिप्त्वाऽन्धकूपे तमहोरात्रमधारयत् ।। ३ ।।
अथ विज्ञपयामास गत्वा भगवते नृपः। सोऽत्याजि सौनिकः सूनामहोरात्रमिदं विभो ।। ४ ।।
सर्वज्ञोऽभिदधे राजन्नन्धकूपेऽपि सोऽवधीत्। शतानि पञ्च महिषान् स्वयं निर्माय मृन्मयान्।। ५ ।।
तद्गत्वा श्रेणिकोऽपश्यत् स्वयमुद्विविजे ततः। धिगहो मे पुरा कर्म्म नान्यथा भगवद्गिरः ।। ६ ।।
पञ्च पञ्च शतान्यस्य महिषान्निघ्नतोऽन्वहम्। कालसौकरिकस्योच्चैः पापराशिरवर्द्धत ।। ७ ।।
इहापि रोगास्तस्यासन्दारुणैरतिदारुणाः। पर्यन्तनरकप्राप्तेरुपर्युत्कलितैरघैः ।। ८ ।।
हा तात हा मातरिति व्याधिबाधाकदर्थितः। वध्यमानः शूकरवत्कालसौकरिकोऽरटत् ।। ९।।
सोऽङ्गनातूलिकापुष्पवीणाक्कणितमार्जिताः । दृष्टित्वग्नासिकाकर्णजिह्वाशूलान्यमन्यत ।। १० ।।
ततस्तस्य सुतस्तादृक् स्वरूपं सुलसोऽखिलम्। जगाद जगदाप्तायाभयायाभयदायिने ।। ११ ।।
ऊचेऽभयस्त्वत्पिता यच्चक्रे तस्येदृशं फलम्। **सत्यमत्युग्रपापानां फलमत्रैव लभ्यते** ।। १२ ।।
तथाऽप्यस्य कुरु प्रीत्यै विपरीतेन्द्रियार्थताम्। अमेध्यगन्धविध्वंसे भवेन्न जलमौषधम् ।। १३ ।।
अथैत्य सुलसस्तं तु कटुतिक्तान्यभोजयत्। अपाययदपोऽत्युष्णास्तप्तत्रपुसहोदराः ।। १४ ।।
भूयिष्ठविष्ठया सुष्ठु सर्वाङ्गीणं व्यलेपयत्। उर्ध्वकण्टकमय्यां च शय्यायां पर्य्यसूषुपत् ।। १५ ।।
श्रावयामास चक्रीवत्क्रमेलकरवान् कटून् । रक्षोवेतालकङ्कालघोररुपाण्यदर्शयत् ।। १६ ।।
तैः प्रीतः सोऽब्रवीत्पुत्रं चिरात्स्वाद्वद्य भोजनम्। शीतं वारि मृदुः शय्या सुगन्धि च विलेपनम् ।। १७ ।।
शब्दः श्रुतिसुधाऽमूनि रुपाण्येकं सुखं दृशोः। भक्तेनापि त्वयाऽस्मात् किं वञ्चितोऽस्मि चिरं सुखात् ।।१८।।
तच्छ्रुत्वा सुलसो दध्याविदमत्रैव जन्मनि। अहो पापफलं घोरं नरके किं भविष्यति ।। १९ ।।

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

सुलसे चिन्तयत्येवं स मृत्वा प्राप दारुणम्। सप्तमे नरके स्थानमप्रतिष्ठानसंज्ञितम् ।। २० ।।

कृतोर्ध्ध्वदेहिकोऽभाणि सुलसः स्वजनैरिति। पितुः श्रयपदं स्याम सनाथा हि त्वया यथा ।। २१ ।।

सुलसस्तानुवाचेदं करिष्ये कर्म न ह्यदः। किञ्चिल्लेभे फलं पित्राऽप्यत्रैवामुष्य कर्मणः ।। २२ ।।

यथा मम प्रियाः प्राणास्तथाऽन्यप्राणिनामपि। स्वप्राणिताय धिगहो परप्राणप्रमारणम् ।। २३ ।।

हिंसाजीविकया जीवेत् कः प्रेक्ष्य फलमीदृशम्। मरणैकफलं ज्ञात्वा किंपाकफलमत्ति कः ।। २४ ।।

अथ ते स्वजनाः प्रोचुः पापं प्राणिवधेऽत्र यत् । तद्विभज्य ग्रहीष्यामो हिरण्यमिव गोत्रिणः ।। २५ ।।

त्वमेकं महिषं हन्या हनिष्यामोऽपरान् वयम्। अत्यल्पमेव ते पापं भविष्यति ततो ननु ।। २६ ।।

आदाय सुलसः पित्र्यं कुठारं पाणिना ततः। तेनाजघ्ने निजां जङ्घां मूर्छितो निपपात च ।। २७ ।।

लब्धसंज्ञस्ततोऽवादीत् साक्रन्दः करुणस्वरम्। हा कुठारप्रहारेण कठोरेणास्मि पीडितः ।। २८ ।।

गृह्णीत बन्धवो यूयं विभज्य मम वेदनाम्। स्यामल्पवेदनो येन पीडितं पात पात माम् ।। २९ ।।

सुलसं खिन्नमनसस्ते च प्रतिबभाषिरे । पीडा कस्यापि केनापि गृहीतुं शक्यते किमु ।। ३० ।।

सुलसो व्याजहारेदं यद् व्यथामियतीमपि । न मे ग्रहीतुमीशिध्वे तत्कथं नरकव्यथाम् ।। ३१ ।।

कृत्वा पापं कुटुम्बार्थे घोरां नरकवेदनाम् । एकोऽमुत्र सहिष्येऽहं स्थास्यन्त्यत्रैव बान्धवाः ।। ३२ ।।

हिंसां तन्न करिष्यामि पैत्रिकीमपि सर्वथा। पिता भवति यद्यन्धः किमन्धः स्यात्सुतोऽपि हि ।। ३३ ।।

एवं व्याहरमाणस्य सुलसस्यातिपीडया। प्रतिजागरणायागादभयः श्रेणिकात्मजः ।। ३४ ।।

परिरभ्य बभाषे तमभयः साधु साधु भोः। सर्वं ते श्रुतमस्माभिः प्रमोदाद्वयमागताः ।। ४५ ।।

पापात्पैत्र्यादपक्रामन् कर्दमादिव दूरतः । त्वमेकः श्लाघ्यसे हन्त पक्षपातो गुणेषु नः ।। ३६ ।।

सुलसं पेशलैरेवमालापैर्धर्मवत्सलः। अनुमोद्य निजं धाम स जगाम नृपात्मजः ।। ३७ ।।

स्वाननादृत्य सुलसो गृहीतद्वादशव्रतः । दौर्गत्यभीतोऽस्थाज्जैनधर्मे रोर इवेश्वरे ।। ३८ ।।

कालसौकरिकसूनुरिवैवं, यस्त्यजेत् कुलभवामपि हिंसाम् ।
स्वर्गसम्पददवीयसि तस्य, श्रेयसामविषयो न हि किञ्चित् ।। ३९ ।।

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

# परिशिष्टम्-१B

['तेषां च स्वरूपं प्रत्याख्यानाध्ययने न्यक्षेण वक्ष्यामः' इति श्रीध्यानशतके गा. ३२ वृत्तौ वृत्तिकारमहर्षि-पूज्याचार्यहरिभद्रसूरिभिः निर्देशितम्। तदनुसारेणात्र प्रत्याख्यानाध्ययनवृत्तिगतं **सम्यक्त्वस्य शङ्कादि-अतिचार**सन्दर्भमुद्धृतम् । - सम्पा०]

१ - **शङ्कनं शङ्का,** भगवदर्हत्प्रणीतेषु पदार्थेषु धर्मास्तिकायादिष्वत्यन्तगहनेषु मतिदौर्बल्यात् सम्यगनवधार्यमाणेषु संशय इत्यर्थः, किमेवं स्यात् नैवमिति । संशयकरणं शङ्का, सा पुनर्द्विभेदा-देशशङ्का सर्वशङ्का च । देशशङ्का देशविषया, यथा किमयमात्माऽसङ्ख्येयप्रदेशात्मकः स्यादथ निष्प्रदेशो निरवयवः स्यादिति । सर्वशङ्का पुनः सकलास्तिकायजात एव किमेवं नैवं स्यादिति । मिथ्यादर्शनं च त्रिविधम्— अभिगृहीताऽनभिगृहीत-संशयभेदात् । तत्र संशयो मिथ्यात्वमेव । यदाह—

पयमक्खरं च एक्कं जो न रोएइ सुत्तनिद्दिट्ठं । सेसं रोयंतो वि हु मिच्छद्दिट्ठी मुणेयव्वो ।।१।। तथा -

सूत्रोक्तस्यैकस्याप्यरोचनादक्षरस्य भवति नरः । मिथ्यादृष्टिः सूत्रं हि नः प्रमाणं जिनाज्ञा च ।।१।।

एकस्मिन्नप्यर्थे सन्दिग्धे प्रत्ययोऽर्हति हि नष्टः । मिथ्यात्वदर्शनं तत् स चादिहेतुर्भवगतीनाम् ।।२।।
तस्मात् मुमुक्षुणा व्यपगतशङ्केन सता जिनवचनं सत्यमेव सामान्यतः प्रतिपत्तव्यम्, संशयास्पदमपि सत्यम्, सर्वज्ञाभिहितत्वात्, तदन्यपदार्थवत्, मतिदौर्बल्यादिदोषात्तु कार्त्स्न्येन सकलपदार्थस्वभावावधारणमशक्यं छद्मस्थेन । यदाह—

न हि नामानाभोगश्छद्मस्थस्येह कस्यचिन्नास्ति । ज्ञानावरणीयं हि ज्ञानावरणप्रकृति कर्म ।।१।।

**इह चोदाहरणम्** – जो संकं करेइ सो विणस्सति, जहा सो पेज्जापायओ, पेज्जाए मासा जे परिभज्जमाणा ते छूढा, अंधगारए लेहसालाओ आगया दो पुत्ता पियंति, एगो चिंतेति—एयाओ मच्छियाओ, संकाए तस्स वग्गुलो वाउ जाओ, मओ य । बिइओ चिंतेइ— न मम माया मच्छिया देइ, जीओ । एते दोसा ।

२ - **काङ्क्षणं काङ्क्षा—** सुगतादिप्रणीतदर्शनेषु ग्राहोऽभिलाष इत्यर्थः, तथा चोक्तम्—'कंखा अन्नन्नदंसणग्गाहो' सा पुनर्द्विभेदा- देशकाङ्क्षा सर्वकाङ्क्षा च । देशकाङ्क्षैकदेशविषया, एकमेव सौगतं दर्शनं काङ्क्षति, चित्तजयोऽत्र प्रतिपादितोऽयमेव च प्रधानो मुक्तिहेतुरित्यतो घटमानकमिदं न दूरापेतमिति । सर्वकाङ्क्षा तु सर्वदर्शनान्येव काङ्क्षति, अहिंसादिप्रतिपादनपराणि सर्वाण्येव कपिल-कणभक्षा-ऽक्षपादादिमतानीह लोके च नात्यन्तक्लेशप्रतिपादनपराण्यतः शोभनान्येवेति, अथवैहिकामुष्मिकफलानि काङ्क्षति, प्रतिषिद्धा चेयमर्हद्भिरतः प्रतिषिद्धानुष्ठानादेनां कुर्वतः सम्यक्त्वातिचारो भवति, तस्मादैकान्तिकमव्याबाधमपवर्गं विहायान्यत्र काङ्क्षा न कार्येति।

**एत्थोदाहरणम्—** राया कुमारामच्चो य आसेणावहिया अडविं पविट्ठा, छुहापरद्धा वणफलाणि खायंति, पडिनियत्ताण राया चिंतेइ-लड्डुय-पूयलगमादीणि सव्वाणि खामि, आगया दोवि जणा, रण्णा सूयारा भणिया- -जं लोए पयरइ तं सव्वं सव्वे रंधेहत्ति, उवट्ठवियं च रन्नो, सो राया पेच्छणयदिट्ठंतं करेइ, कप्पडिया

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

बलिएहिं धाडिज्जइ, एवं मिट्ठस्स अवगासो होहितित्ति कणकुंडगमंडगादीणिवि खइयाणि, तेहिं सूलेण मओ, अमच्चेण वमण-विरेयणाणि कयाणि, सो आभागी भोगाण जाओ, इयरो विणट्ठो ।

**३ - विचिकित्सा मतिविभ्रमः,** युक्त्यागमोपपन्नेऽप्यर्थे फलं प्रति सम्मोहः-किमस्य महतस्तपःक्लेशायासस्य सिकताकणकवलनादेरायत्यां मम फलसम्पद् भविष्यति किं वा नेति, उभयथेह क्रियाः फलवत्यो निष्फलाश्च दृश्यन्ते कृषीवलानाम् । न चेयं शङ्कातो न भिद्यते इत्याशङ्कनीयम्, शङ्का हि सकलासकलपदार्थभाक्त्वेन द्रव्य-गुण विषया, इयं तु क्रियाविषयैव, तत्त्वतस्तु सर्व एते प्रायो मिथ्यात्वमोहनीयोदयतो भवन्तो जीवपरिणामविशेषाः सम्यक्त्वातिचारा उच्यन्ते, न सूक्ष्मेक्षिकाऽत्र कार्येति । इयमपि न कार्या, यतः सर्वज्ञोक्तकुशलानुष्ठानाद् भवत्येव फलप्राप्तिरिति ।

**अत्र चौरोदाहरणम्**-सावगो नंदीसरवरगमणं दिव्वगंधाणं (तं) देवसंघरिसेण मित्तस्स पुच्छणं विज्जाए दाणं साहणं मसाणे चउप्पायं सिक्कगं, हेट्ठा इंगाला खायरो य सूलो अट्ठसयं वारा परिजवित्ता पाओ सिक्कगस्स छिज्जइ, एवं बितिओ तइए चउत्थे य छिण्णे आगासेणं वच्चति, तेण विज्जा गहिया, किण्हचउद्दसिरत्तिं साहेइ मसाणे, चोरो य नगरारक्खिएहिं परिब्भममाणो तत्थेव अतियओ, ताहे वेढेउं सुसाणे ठिया पभाए घिप्पिहितित्ति, सो य भमंतो तं विज्जासाहयं पेच्छइ, तेण पुच्छिओ भणति– विज्जं साहेमि । चोरो भणति- – केण दिण्णा ? सो भणति– सावगेण, चोरेण भणितम्–इमं दव्वं गिण्हाहि विज्जं देहि, सो सड्ढो वितिगिच्छति–सिज्झेज्जा न वत्ति । तेण दिण्णा, चोरो चिंतेइ–सावगो कीडियाएवि पावं नेच्छइ, सच्चमेयं, सो साहिउमारद्धो, सिद्धा, इयरो सड्ढो गहिओ, तेण आगासगएण लोओ भेसिओ ताहे सो मुक्को, सड्ढावं दोवि जाया । एवं निव्वितिगिच्छेण होयव्वं ।

**अथवा विद्वज्जुगुप्सा**-विद्वांसः - साधवो विदितसंसारस्वभावाः परित्यक्तसमस्तसङ्गाः, तेषां जुगुप्सा-निन्दा, तथाहि– तेऽस्नानात् प्रस्वेदजलक्लिन्नमलत्वात् दुर्गन्धिवपुषो भवन्ति, तान् निन्दति– को दोषः स्यात् यदि प्रासुकेन वारिणाऽङ्गक्षालनं कुर्वीरन् भगवन्तः? इयमपि न कार्या, देहस्यैव परमार्थतोऽशुचित्वात् ।

**एत्थ उदाहरणम्**– एको सड्ढो पच्चंते वसति, तस्स धूयाविवाहे कहवि साहवो आगया, सा पिउणा भणिया–पुत्तिगे! पडिलाहेहि साहुणो, सा मंडियपसाहिया पडिलाभेति, साहूण जल्लगंद्धो तीए अग्घाओ, चिंतेइ- -अहो अणवज्जो भट्टारगेहिं धम्मो देसिओ, जइ फासुएग ण्हाएज्जा को दोसो होज्जा ? सा तस्स ठाणस्स अणालोइयऽपडिक्कंता कालं किच्चा रायगिहे गणियाए पोट्टे उववन्ना, गब्भगता चेव अरइं जणेति, गब्भपाडणेहि य न पडइ, जाया समाणी उज्झिया, सा गंधेण तं वणं वासेति, सेणिओ य तेण पएसेण निग्गच्छंइ सामिणो वंदगो, सो खंधावारो तीए गंधं न सहइ, रण्णा पुच्छियं किमेयंति, कहियं दारियाए गंधो, गंतूण दिट्ठा, भणति-एसेव पढमपुच्छत्ति, गओ सेणिओ, पुव्वुद्दिट्ठवुत्तंते कहिते भणइ राया—कहिं एसा पच्चणुभविस्सइ सुहं दुक्खं वा? सामी भणइ—एएण कालेण वेदियं, सा तव चेव भज्जा भविस्सति अग्गमहिसी, अट्ठ संवच्छराणि जाव तुज्झं रममाणस्स पुट्ठीए हंसोवल्लीलीं काही, तं जाणिज्जासि, वंदित्ता गओ, सो य अवहरिओ गंधो, कुलपुत्तएण साहरिया, संवड्ढिया जोव्वणत्था जाया, कोमुइवारे अम्मयाए समं आगया, अभओ सेणिओ (य) पच्छण्णा कोमुइवारं पेच्छंति, तीए दारियाए अंगफासेण अज्झोववण्णो णाममुद्दं दसियाए तीए बंधति,

अभयस्स कहियं—णाममुद्दा हारिया, मग्गाहि, तेण मणुस्सा दारेहिं ठविया, एक्केक्कं माणुस्सं पलोएउं नीणिज्जइ, सा दारिया दिट्ठा चोरोत्ति गहिया, परिणीया य, अण्णया य वज्झुक्केण रमंति, रायाणिउ तेण पोत्तेण वाहेंति, इयरा पोत्तं देंति, सा विलग्गा, रण्णा सरियं, मुक्का य पव्वइया । एयं विउदुगुंछाफलं ।

४ - **परपाषण्डानां सर्वज्ञप्रणीतपाषण्डव्यतिरिक्तानां प्रशंसा,** प्रशंसनं प्रशंसा स्तुतिरित्यर्थः । परपाषण्डानामोघतस्त्रीणि शतानि त्रिशष्ट्यधिकानि भवन्ति। यत उक्तम्—

**असीयसयं किरियाणं अकिरियवाईण होइ चुलसीति ।**
**अण्णाणिय सत्तट्ठी वेणइयाणं च बत्तीसं ।।१।।**

इयमपि गाथा विनेयजनानुग्रहार्थं ग्रन्थान्तरप्रतिबद्धाऽपि लेशतो व्याख्यायते—

**असीयसयं किरियाणं** इति अशीत्युत्तरं शतं क्रियावादिनाम्—तत्र न कर्त्तारं विना क्रिया सम्भवति तामात्मसमवायिनीं वदन्ति ये तच्छीलाश्च ते क्रियावादिनः । ते पुनरात्माद्यस्तित्वप्रतिपत्तिलक्षणाः अनेनोपायेनाशीत्यधिकशतसङ्ख्या विज्ञेयाः- जीवाजीवाश्रव-बन्ध-संवर-निर्जरा-पुण्यापुण्य-मोक्षाख्यान् नव पदार्थान् विरचय्य परिपाट्या जीवपदार्थस्याधः स्व-परभेदावुपन्यसनीयौ, तयोरधो नित्या-नित्यभेदौ, तयोरप्यधः कालेश्वरात्मनियति-स्वभावभेदाः पञ्च न्यसनीयाः, पुनश्चेत्थं विकल्पाः कर्त्तव्याः—अस्ति जीवः स्वतो नित्यः कालत इत्येको विकल्पः, विकल्पार्थश्चायम्- विद्यते खल्वयमात्मा स्वेन रूपेण नित्यश्च कालतः कालवादिनः, उक्तेनैवाभिलापेन द्वितीयो विकल्पः ईश्वरवादिनः, तृतीयो विकल्प आत्मवादिनः 'पुरुष एवेदं सर्वम्' इत्यादि, नियतवादिनश्चतुर्थो विकल्पः, पञ्चमविकल्पः स्वभाववादिनः, एवं स्वत इत्यत्यजता लब्धाः पञ्च विकल्पाः, परत इत्यनेनापि पञ्चैव लभ्यन्ते, नित्यत्वापरित्यागेन चैते दश विकल्पाः, एवमनित्यत्वेनापि दशैव, एकत्र विंशतिर्जीवपदार्थेन लब्धाः, अजीवादिष्वप्यष्टस्वेवमेव प्रतिपदं विंशतिर्विकल्पानामतो विंशतिर्नवगुणा शतमशीत्युत्तरं क्रियावादिनामिति।

**अकिरियवाईण होइ चुलसीतित्ति**—अक्रियावादिनां च भवति चतुरशीतिर्भेदा इति, न हि कस्यचिदवस्थितस्य पदार्थस्य क्रिया समस्ति, तद्भाव एवावस्थितेरभावादित्येवंवादिनोऽक्रियावादिनः, तथा चाहुरेके—

क्षणिकाः सर्वसंस्काराः, अस्थितानां कुतः क्रिया । भूतिर्येषां क्रिया सैव, कारकं सैव चोच्यते ।।१।।

इत्यादि, एते चात्मादिनास्तित्वप्रतिपत्तिलक्षणा अमुनोपायेन चतुरशीतिर्द्रष्टव्याः—एतेषां हि पुण्यापुण्यवर्जित-पदार्थसप्तकन्यासस्तथैव जीवस्याधः स्व-परविकल्पभेदद्वयोपन्यासः, असत्त्वादात्मनो नित्यानित्यभेदौ न स्तः, कालादीनां तु पञ्चानां षष्ठी यदृच्छा न्यस्यते, पश्चाद्विकल्पभेदाभिलापः-नास्ति जीवः स्वतः कालत इत्येको विकल्पः, एवमीश्वरादिभिरपि यदृच्छावसानैः, सर्वे च षड् विकल्पाः, तथा नास्ति जीवः परतः कालत इति षडेव विकल्पाः, एकत्र द्वादश, एवमजीवादिष्वपि षट्सु प्रतिपदं द्वादश विकल्पाः, एकत्र सप्त द्वादशगुणाश्चतुरशीतिर्विकल्पा नास्तिकानामिति ।

**अण्णाणिय सत्तट्ठीत्ति**-अज्ञानिकानां सप्तषष्टिर्भेदा इति, तत्र कुत्सितं ज्ञानमज्ञानं तदेषामस्तीति अज्ञानिकाः, नन्वेवं लघुत्वात् प्रक्रमस्य प्राक् बहुव्रीहिणा भवितव्यं ततश्चाज्ञाना इति स्यात्, नैष दोषः ज्ञानान्तरमेवाज्ञानं मिथ्यादर्शनसहचारित्वात्, ततश्च जातिशब्दत्वाद् गौरखरवदरण्यमित्यादिवदज्ञानिकत्वमिति, अथवा अज्ञानेन

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

चरन्ति तत्प्रयोजना वा अज्ञानिकाः—असञ्चित्य कृतवैफल्यादिप्रतिपतिलक्षणा अमुनोपायेन सप्तषष्टिर्ज्ञातव्याः- – तत्र जीवादिनवपदार्थान् पूर्ववत् व्यवस्थाप्य पर्यन्ते चोत्पत्तिमुपन्यस्याधः सप्त सदादय उपन्यसनीयाः, सत्त्वम् असत्त्वं सदसत्त्वम् अवाच्यत्वम् सदवाच्यत्वम् असदवाच्यत्वं सदसदवाच्यत्वमिति चैकैकस्य जीवादेः सप्त सप्त विकल्पाः, एते नव सप्तकाः त्रिषष्टिः, उत्पत्तेस्तु चत्वार एवाद्या विकल्पाः, तद्यथा— सत्त्वम् असत्त्वं सदसत्त्वम् अवाच्यत्वं चेति, त्रिषष्टिमध्ये क्षिप्ताः सप्तषष्टिर्भवन्ति, को जानाति जीवः सन्नित्येको विकल्पः, ज्ञातेन वा किम् ? एवमसदादयोऽपि वाच्याः, उत्पत्तिरपि किं सतोऽसतः सदसतोऽवाच्यस्येति को जानातीति ? एतन्न कश्चिदपीत्यभिप्रायः ।

**वेणइयाणं च बत्तीसंति**— वैनयिकानां च द्वात्रिंशद् भेदाः, विनयेन चरन्ति विनयो वा प्रयोजनमेषामिति वैनयिकाः, एते चानवधृतलिङ्गाचारशास्त्रा विनयप्रतिपत्तिलक्षणा अमुनोपायेन द्वात्रिंशदवगन्तव्याः—सुर-नृपति-यति-ज्ञाति-स्थविराधम-मातृ-पितृणां प्रत्येकं कायेन वचसा मनसा दानेन च देश-कालोपपन्नेन विनयः कार्य इत्येते चत्वारो भेदाः, सुरादिष्वष्टसु स्थानकेषु, एकत्र मिलिता द्वात्रिंशदिति, सर्वसङ्ख्या पुनरेतेषां त्रीणि शतानि त्रिषष्ट्यधिकानि । न चैतत् स्वमनीषिकाव्याख्यानम्, यस्मादन्यैरप्युक्तम्—

आस्तिकमतमात्माद्या नित्यानित्यात्मका नव पदार्थाः ।
काल-नियति-स्वभावेश्वरात्मकृताः [तकाः] स्व-परसंस्था ।।१।।

काल-यदृच्छा-नियतीश्वर-स्वभावात्मनश्चतुरशीतिः। नास्तिकवादिगणमतं न सन्ति भावाः स्वपरसंस्थाः ।।२।।

अज्ञानिकवादिमतं नव जीवादीन् सदादिसप्तविधान् । भावोत्पत्तिं सदसद्-द्वैतावाच्यां च को वेत्ति ? ।।३।।

वैनयिकमतं विनयश्चेतोवाक्कायदानतः कार्यः । सुरनृपतियतिज्ञातिस्थवि-राधममातृपितृषु सदा ।।४।।

इत्यलं प्रसङ्गेन प्रकृतं प्रस्तुमः, एतेषां प्रशंसा न कार्या–पुण्यभाज एते, सुलब्धमेभिर्यद् जन्मेत्यादिलक्षणा, एतेषां मिथ्यादृष्टित्वादिति।

**अत्र चोदाहरणम्**—पाडलिपुत्ते चाणक्को, चंदगुत्तेणं भिक्खुगाणं वित्ती हरिता, ते तस्स धम्मं कहेंति, राया तूसति चाणक्कं पलोएति, ण य पसंसति ण देति, तेण चाणक्कभज्जा ओलग्गिता, ताए सो करणिं गाहितो, ताधे कथितेण भणितं तेण सुभासियंति, रण्णा तं अण्णं च दिण्णं, बिदियदिवसे चाणक्को भणति-कीस दिन्नं ? राया भणइ—तुज्झेहिं पसंसितं,सो भणइ—ण मे पसंसितं, सव्वारंभपवित्ता कहं लोगं पत्तियाविंतित्ति ! पच्छा ठितो, केत्तिता एरिसा तम्हा ण कायव्वा ।

**५ - परपाषण्डैः अनन्तरोक्तस्वरूपैः सह संस्तवः परपाषण्डसंस्तवः**, इह संवासजनितः परिचयः संवसन-भोजनालापादिलक्षणः परिगृह्यते, न स्तुतिरूपः तथा च लोके प्रतीत एव संपूर्वः स्तौतिः परिचय इति, 'असंस्तुतेषु प्रसभं कुलेषु...' इत्यादाविति, अयमपि न **समाचरणीयः**, तथा हि एकत्र संवासे तत्प्रक्रियाश्रवणात् तत्क्रियादर्शनाच्च तस्यासकृदभ्यस्तत्वादवाप्तसहकारिकारणात् मिथ्यात्वोदयतो दृष्टिभेदः सञ्जायते अतोऽतिचारहेतुत्वान्न समाचरणीयोऽयमिति । **अत्र चोदाहरणं—** सोरट्ठसड्ढगो पुव्वभणितो ।

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

# परिशिष्टम्-१C

['एताः पुनरुत्तरत्र न्यक्षेण वक्ष्यामः' इति श्रीध्यानशतके गाथा-५० वृत्तौ टीकाकारमहर्षिणा ज्ञापितम् । तस्मादत्र प्रतिक्रमणाध्ययनवृत्तिगतं **पञ्चक्रियायाः स्वरूपमृद्धृतम्** । - सम्पा० ।]

**पडिक्कमामि पंचहि किरियाहिं - काइयाए, अहिगरणियाए, पाउसियाए, पारितावणियाए, पाणाइवायकिरियाए।**

वृ.- प्रतिक्रमामि पञ्चभिः क्रियाभिः-व्यापारलक्षणाभिर्योऽतिचारः कृतः, तद्यथा- 'काइयाए' इत्यादि,

१ - चीयत इति कायः, कायेन निर्वृत्ता **कायिकी** तया, सा पुनस्त्रिधा-अविरतकायिकी दुष्प्रणिहितकायिकी उपरतकायिकी [च], तत्र मिथ्यादृष्टेरविरतसम्यग्दृष्टेश्चाऽऽद्या अविरतस्य कायिका-उत्क्षेपणादिलक्षणा क्रिया कर्मबन्धनिबन्धनाऽविरतकायिकी, एवमन्यत्रापि षष्ठीसमासो योज्यः, द्वितीया दुष्प्रणिहितकायिकी प्रमत्तसंयतस्य, सा पुनर्द्विधा- इन्द्रियदुष्प्रणिहितकायिकी नोइन्द्रियदुष्प्रणिहितकायिकी च, तत्राऽऽद्येन्द्रियैः-श्रोत्रादिभिर्दुष्प्रणिहितस्य-इष्टानिष्टविषयप्राप्तौ मनाक्सङ्गनिर्वेदद्वारेणापवर्गमार्गं प्रति दुर्व्यवस्थितस्य कायिकी, एवं नोइन्द्रियेण-मनसा दुष्प्रणिहितस्याशुभसङ्कल्पद्वारेण दुर्व्यवस्थितस्य कायिकी, तृतीयाऽप्रमत्तसंयतस्य-उपरतस्य - सावद्ययोगेभ्यो निवृत्तस्य कायिकी, गता कायिकी ।

२ - अधिक्रियत आत्मा नरकादिषु येन तदधिकरणम्-अनुष्ठानं बाह्यं वा वस्तु चक्रमहादि तेन निर्वृत्ता -**अधिकरणिकी** तया, सा पुनर्द्विधा-अधिकरणप्रवर्तिनी निर्वर्तिनी च, तत्र प्रवर्तिनी चक्रमहःपशुबन्धादिप्रवर्तिनी, निर्वर्तिनी खड्गादिनिर्वर्तिनी, अलमन्यैरुदाहरणैः, अनयोरेवान्तःपातित्वात्तेषां, गताऽधिकरणिकी ।

३ - प्रद्वेषः-मत्सरस्तेन निर्वृत्ता **प्राद्वेषिकी तया,** असावपि द्विधा-जीवप्राद्वेषिक्यजीवप्राद्वेषिकी च, आद्या जीवे प्रद्वेषं गच्छतः, द्वितीया पुनरजीवे, तथाहि- पाषाणादौ प्रस्खलितस्तत्प्रद्वेषमावहति, गता तृतीया ।

४ - परितापनं-ताडनादिदुःखविशेषलक्षणं तेन निर्वृत्ता **पारितापनिकी** तया, असावपि द्विधैव-स्वदेहपारितापनिकी परदेहपारितापनिकी च, आद्या स्वदेहे परितापनं कुर्वतो द्वितीया परदेहे परितापनमिति, तथा च अन्यरुष्टोऽपि स्वदेहपरितापनं करोत्येव कश्चिज्जडः, अथवा स्वहस्तपारितापनिकी परहस्तपारितापनिकी च, आद्या स्वहस्तेन परितापनं कुर्वतः द्वितीया परहस्तेन कारयतः, गता चतुर्थी ।

५ - प्राणातिपातः- प्रतीतः, तद्विषया क्रिया **प्राणातिपातक्रिया** तया, असावपि द्विधा-स्वप्राणातिपातक्रिया परप्राणातिपातक्रिया च, तत्राऽऽद्याऽऽत्मीयप्राणातिपातं कुर्वतः द्वितीया परप्राणातिपातमिति, तथा च कश्चिन्निर्वेदतः स्वर्गाद्यर्थं वा गिरिपतनादिना स्वप्राणातिपातं करोति, तथा क्रोधमानमायालोभमोहवशाच्च परप्राणातिपातमिति, क्रोधेनाऽऽक्रुष्टः रुष्टो वा व्यापादयति, मानेन जात्यादिभिर्हीलितः, माययाऽपकारिणं विश्वासेन, लोभेन शौकरिकः, मोहेन संसारमोचकः स्मार्तो वा याग इति, गता पञ्चमी ।

क्रियाऽधिकाराच्च शिष्यहितायानुपात्ता अपि सूत्रे अन्या अपि विंशतिः क्रियाः प्रदर्श्यन्ते, तंजहा-

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

१- आरंभिया २- पारिग्गहिया ३- मायावत्तिया ४- मिच्छादंसणवत्तिया ५- अपचक्खाणकिरिया ६- दिट्ठिया ७- पुट्ठिया ८- पाडुच्चिया ९- सामंतोवणिवाइया १०- नेसत्थिया ११- साहत्थिया १२- आणमणिया १३- वियारणिया १४- अणाभोगवत्तिया १५- अणवकंखवत्तिया १६- पओगकिरिया १७- समुयाणकिरिया १८- पेज्जवत्तिया १९- दोसवत्तिया २०- ईरियावहिया चेति ।

१ - तत्थ**आरंभिया** दुविहा-जीवारंभिया य अजीवारंभिया य जीवारंभिया-जं जीवे आरंभइ, अजीवारंभिया-अजीवे आरंभइ ।

२ - **पारिग्गहिया** किरिया दुविहा-जीवपारिग्गहिया अजीवपारिग्गहिया य, जीवपारिग्गहिया-जीवे परिगिण्हइ, अजीवपारिग्गहिया-अजीवे परिगिण्हइ ।

३ - **मायावत्तिया** किरिया दुविहा-आयभाववंचणा य परभाववंचणा य, आयभाववंचणा अप्पणोच्चयं भावं गूहइ नियडीमंतो उज्जुयभावं दंसेइ, संजमाइसिढिलो वा करणफडाडोवं दरिसेइ, परभाववंचणा य तं तं आयरंति जेण परो वंचिज्जइ कूडलेहकरणाईहिं ।

४ - **मिच्छादंसणवत्तिया** किरिया दुविहा-अणभिग्गहियमिच्छादंसणवत्तिया य अभिग्गहियमिच्छादंसणवत्तिया य, अणभिग्गहियमिच्छादंसणवत्तिया असंणीण संणीण वि जेहिं न किंचि कुतित्थियमयं पडिवण्णं, अभिग्गहियमिच्छादंसणवत्तिया किरिया दुविहा-हीणाइरित्तदंसणे य तव्वइरित्तदंसणे य, हीणा जहा-अंगुट्ठपव्वमेत्तो अप्पा, जवमेत्तो, सामागतंदुलमेत्तो, वालग्गमेत्तो, परमाणुमेत्तो हृदये जाज्वल्यमानस्तिष्ठति भ्रूललाटमध्ये वा, इत्येवमादि, अहिगा जहा-पंचधणुसइगो अप्पा, सव्वगओ, अकत्ता, अचेयणो इत्येवमादि, एवं हीणाइरित्तदंसणं, तव्वइरित्तदंसणं नास्त्येवाऽऽत्माऽऽत्मीयो वा भावः, नास्त्ययं लोकः, न परलोकः, असत्स्वभावाः सर्वभावा इत्येवमादि ।

५ - **अपच्चक्खाणकिरिया** अविरतानामेव, तेषां न किञ्चिद्विरतिरस्ति, सा दुविहा-जीवअपच्चक्खाणकिरिया अजीवऽपच्चक्खाणकिरिया य, न केसुइ जीवेसु अजीवेसु य वा विरती अत्थित्ति ।

६ - **दिट्ठिया** किरिया दुविहा, तंजहा- जीवदिट्ठिया य अजीवदिट्ठिया य, जीवदिट्ठिया आसाईणं चक्खुदंसणवत्तियाए गच्छइ, अजीवदिट्ठिया चित्तकम्माईणं ।

७ - **पुट्ठिया** किरिया दुविहा पण्णत्ता-जीवपुट्ठिया अजीवपुट्ठिया य, जीवपुट्ठिया जा जीवाहियारं पुच्छइ रागेण वा दोसेण वा, अजीवाहिगारं वा, अहवा पुट्ठियत्ति फरिसणकिरिया, तत्थ जीवफरिसणकिरिया इत्थी पुरिसं नपुंसगं वा स्पृशति, संघट्टेइत्ति भणियं होइ, अजीवेसु सुहनिमित्तं मियलोमाइ वत्थजायं मोत्तिगादि वा रयणजायं स्पृशति ।

८ - **पाडुच्चिया** किरिया दुविहा-जीवपाडुच्चिया अजीवपाडुच्चिया य जीवं पडुच्च जो बंधो सा जीवपाडुच्चिया जो पुण अजीवं पडुच्च रागदोसुब्भवो सा अजीवपाडुच्चिया ।

९ - **सामंतोवणिवाइया** समन्तादनुपततीति सामंतोवणिवाइया। सा दुविहा-जीवसामंतोवणिवाइया य

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

अजीवसामंतोवणिवाइया य, जीवसामंतोवणिवाइया जहा-एगस्स संडो तं जणो जहा जहा पलोएइ पसंसइ य तहा तहा सो हरिसं गच्छइ, अजीवेवि रहकम्माई, अहवा सामंतोवणिवाइया दुविहा-देससामंतोवणिवाइया य सव्वसामंतोवणिवाइया य, देससामंतोवणिवाइया प्रेक्षकान् प्रति यत्रैकदेशेनाऽऽगमो भवत्यसंयतानां सा देससामंतोवणिवाइया, सव्वसामंतोवणिवाइया य यत्र सर्वतः समन्तात् प्रेक्षकाणामागमो भवति सा सव्वसामंतोवणिवाइया, अहवा समन्तादनुपतन्ति प्रमत्तसंजयाणं अन्नपाणं प्रति अवंगुरिते संपातिमा सत्ता विणस्संति ।

१० - **नेसत्थिया** किरिया दुविहा-जीवनेसत्थिया अजीवनेसत्थिया य, जीवनेसत्थिया रायाइसंदेसाउ जहा उदगस्स जंतादीहिं, अजीवनेसत्थिया जहा पहाणकंडाईण गोफणधणुहमाइहिं निसिरइ,अहवा नेसत्थिया जीवे जीवं निसिरइ पुत्तं सीसं वा, अजीवे सूत्रव्यपेतं निसिरइ वस्त्रं पात्रं वा, सृज विसर्ग इति ।

११ - **साहत्थिया** किरिया दुविहा-जीवसाहत्थिया अजीवसाहत्थिया य, जीवसाहत्थिया जं जीवेण जीवं मारेइ, अजीवसाहत्थिया जहा-असिमाईहिं, अहवा जीवसाहत्थिया जं जीवं सहत्थेण तालेइ,अजीवसाहत्थिया अजीवं सहत्थेण तालेइ वत्थं पत्तं वा ।

१२ - **आणमणिया** किरिया दुविहा-जीवआणमणिया अजीवआणमणिया य, जीवाणमणी जीवं आज्ञापयति परेण, अजीवं वा आणवावेइ ।

१३ - **वेयारणिया** दुविहा-जीववेयारणिया य अजीववेयारणिया य, जीववेयारणिया जीवं विदारेइ, स्फोटयतीत्यर्थः, एवमजीवमपि, अहवा जीवमजीवं वा आभासिएसु विक्केमाणो दो भासिउ वा विदारेइ परियच्छावेइ त्ति भणियं होइ, अहवा जीवं वियारेइ असंतगुणेहिं एरिसो तारिसो तुमंति, अजीवं वा वेतारणबुद्धीए भणइ एरिसं एयंति ।

१४ - **अणाभोगवत्तिया** किरिया दुविहा-अणाभोगआदियणा य अणाभोगणिक्खेवणा य, अणाभोगो-अन्नाणं आदियणआ-गहणं निक्खिवणं-ठवणं, तं गहणं निक्खिवणं वा अणाभोगेण अपमज्जियाइ गिण्हइ निक्खिवइत्ति वा, अहवा अणाभोगकिरिया दुविहा-आयाणनिक्खिवणाभोगकिरिया य उक्कमणअणाभोगकिरिया य, तत्थादाणनिक्खिवणाणाभोगकिरिया रओहरणेण अपमज्जियाइ पत्तचीवराणं आदाणं णिक्खेवं वा करेइ, उक्कमणअणाभोगकिरिया लंघणपवणधावणअसमिक्खगमणागमणाइ ।

१५ - **अणवकंखवत्तिया** किरिया दुविहा-इहलोइयअणवकंखवत्तिया य परलोइयअणवकंखवत्तिया य, इहलोयअणवकंखवत्तिया लोयविरुद्धाइं चोरिक्काईणि करेइ जेहिं वहबंधणाणि इह चेव पावेइ, परलोयअणवकंखवत्तिया हिंसाईणि कम्माणि करेमाणो परलोयं नावकंखइ ।

१६ - **पओयकिरिया** तिविहा पण्णत्ता तं० मणप्पओयकिरिया वइप्पओयकिरिया कायप्पओयकिरिया य, तत्थ मणप्पओयकिरिया अट्टरुद्दज्झाई इन्द्रियप्रसृतौ अनियमियमण इति, वइप्पओगो-वायाजोगो जो तित्थगरेहिं सावज्जाई गरहिओ तं सेच्छाए भासइ, कायप्पओयकिरिया कायप्पमत्तस्स गमणागमणकुंचणपसारणाइचेट्ठा कायस्स ।

१७ - **समुदाणकिरिया** समग्गमुपादाणं समुदाणं, समुदाओ अट्ठ कम्माइं, तेसिं जाए उवायाणं कज्जइं

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

सा समुदाणकिरिया, सा दुविहा-देसोवघायसमुदाणकिरिया सव्वोवघायसमुदाणकिरिया, तत्थ देसोवघाएण समुदाणकिरिया कज्जइ कोइ कस्सइ इंदियदेसोवघायं करेइ, सव्वोवघायसमुदाणकिरिया सव्वप्पयारेण इंदियविणासं करेइ ।

**१८ - पेज्जवत्तिया** पेम्म राग इत्यर्थः, सा दुविहा-मायानिस्सिया लोभनिस्सिया य, अहवा तं वयणं उदाहरइ जेण परस्स रागो भवइ ।

**१९ - दोसवत्तिया** अप्रतीतिकारिका सा दुविहा-कोहनिस्सिया य माणनिस्सिया य, कोहनिस्सिया अप्पणा कुप्पइ, परस्स वा कोहमुप्पादेइ, माणणिस्सिया सयं पमज्जइ परस्स वा माणमुप्पाएइ ।

**२० - इरियावहिया** किरिया दुविहा-कज्जमाणा वेइज्जमाणा य, सा अप्पमत्तसंजयस्स वीयरायछउमत्थस्स केवलिस्स वा आउत्तं गच्छमाणस्स आउत्तं चिट्ठमाणस्स आउत्तं निसीयमाणस्स आउत्तं तुयट्टमाणस्स आउत्तं भुंजमाणस्स आउत्तं भासमाणस्स आउत्तं वत्थं पडिग्गहं कंबलं पायपुंछणं गिण्हमाणस्स निक्खिवमाणस्स वा जाव चक्खुपम्हनिवायमवि सुहुमा किरिया इरियावहिया कज्जइ, सा पढमसमए बद्धा बिइयसमए वेइया सा बद्धा पुट्ठा वेइया निज्जिण्णा सेअकाले अकंमंसे यावि भवइ । एयाओ पंचवीस किरियाओ ।।

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

# परिशिष्टम्-१D

['भावार्थश्चतुर्विंशतिस्तवविवरणादवसेयः' इति श्रीध्यानशतके गाथा-५३ वृत्तौ देशितम् । तदनुसारेणात्र चतुर्विंशतिस्तवाध्ययन-वृत्तिगतं **लोकस्वरूपं** समुद्धृतम् । - सम्पा० ।]

अव० तत्र लोकस्योद्योतकरानिति यदुक्तं तत्र लोकनिरूपणायाऽऽह–

**णामं १ ठवणा २ दविए ३ खित्ते ४ काले ५ भवे अ ६ भावे अ ७ ।**
**पज्जवलोगे अ ८ तहा अट्ठविहो लोगणिक्खेवो ।।१०५७ ।। [आव० नि०]**

वृ.– नामलोकः, स्थापनालोकः, द्रव्यलोकः, क्षेत्रलोकः, काललोकः, भवलोकः, भावलोकश्च पर्यायलोकश्च तथा, एवमष्टविधो लोकनिक्षेप इति गाथासमासार्थः ।।

व्यासार्थं तु भाष्यकार एव वक्ष्यति, तत्र नामस्थापने अनादृत्य द्रव्यलोकमभिधित्सुराह–

**जीवमजीवे रूवमरूवी सपएसमप्पएसे अ ।**
**जाणाहि दव्वलोगं णिच्चमणिच्चं च जं दव्वं ।।१९५।। [भा०]**

वृ.- **जीवाजीवावि**त्यत्रानुस्वारोऽलाक्षणिकः, तत्र सुखदुःखज्ञानोपयोगलक्षणो जीवः, विपरीतस्त्वजीवः, एतौ च द्विभेदौ-रूप्यरूपिभेदाद्, आह च–**रूप्यरूपिणावि**ति, तत्रानादिकर्मसन्तानपरिगता रूपिणः- संसारिणः, अरूपिणस्तु कर्मरहिताः सिद्धा इति, अजीवास्त्वरूपिणो धर्माधर्माकाशास्तिकायाः रूपिणस्तु परमाण्वादय इति, एतौ च जीवाजीवावोघतः सप्रदेशाप्रदेशाववगन्तव्यौ, तथा चाह–**सप्रदेशाप्रदेशावि**ति, तत्र सामान्यविशेषरूपत्वात्परमाणुव्यतिरेकेण सप्रदेशाप्रदेशत्वं सकलास्तिकायानामेव भावनीयम्, परमाणवस्त्वप्रदेशा एव, अन्ये तु व्याचक्षते–जीवः किल कालादेशेन नियमात् सप्रदेशः, लब्ध्यादेशेन तु सप्रदेशो वाऽप्रदेशो वेति, एवं धर्मास्तिकायादिष्वपि त्रिष्वस्तिकायेषु परापरनिमित्तं पक्षद्वयं वाच्यम्, पुद्गलास्तिकायस्तु द्रव्याद्यपेक्षया चिन्त्यः, यथा-द्रव्यतः परमाणुरप्रदेशो द्व्यणुकादयः सप्रदेशाः, क्षेत्रत एकप्रदेशावगाढोऽप्रदेशो द्व्यादिप्रदेशावगाढाः सप्रदेशाः, एवं कालतोऽप्येकानेकसमयस्थितिर्भावतोऽप्येकानेकगुणकृष्णादिरिति कृतं विस्तरेण, प्रकृतमुच्यते-इदमेवम्भूतं जीवाजीवव्रातं **जानीहि द्रव्यलोकं** द्रव्यमेव लोको द्रव्यलोक इतिकृत्वा, अस्यैव शेषधर्मोपदर्शनायाऽऽह-**नित्यानित्यं च यद् द्रव्यं** चशब्दादभिलाप्यानभिलाप्यादिसमुच्चय इति गाथार्थः ।।१९५।।

साम्प्रतं जीवाजीवयोर्नित्यानित्यतामेवोपदर्शयन्नाह–

**गइ १ सिद्धा २ भविआया ३ अभविअ ४-१ पुग्गल १ अणागयद्धा य २ ।**
**तीअद्ध ३ तिन्नि काया ४-२ जीवा १ जीव २ ट्ठिई चउहा ।।१९६ ।। [भा०]**

वृ.—अस्याः सामायिकवद् व्याख्या कार्येति, भङ्गकास्तु सादिसपर्यवसानाः, साद्यपर्यवसानाः, अनादिसपर्यवसाना अनाद्यपर्यवसानाः । एवमजीवेषु जीवाजीवयोरष्टौ भङ्गाः। द्वारम् ।।

अधुना क्षेत्रलोकः प्रतिपाद्यते, तत्र—

**आगासस्स पएसा उड्ढं च अहे अ तिरियलोए अ ।**
**जाणाहि खित्तलोगं अणंत जिणदेसिअं सम्मं ।।१९७।। [भा०]**

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

वृ०- **आकाशस्य प्रदेशाः** प्रकृष्टा देशाः प्रदेशास्तान् **ऊर्ध्वं च** इत्यूर्ध्वलोके च **अधश्च** इत्यधोलोके च **तिर्यग्लोके च,** किम् ? **जानीहि क्षेत्रलोकम्,** क्षेत्रमेव लोकः क्षेत्रलोक इतिकृत्वा, लोक्यत इति च लोक इति, ऊर्ध्वादिलोकविभागस्तु सुज्ञेयः, **अनन्तमि**त्यलोकाकाशप्रदेशापेक्षया चानन्तम्, अनुस्वारलोपोऽत्र द्रष्टव्यः, **जिनदेशितम्** इति जिनकथितं **सम्यक्** शोभनेन विधिनेति गाथार्थः ।।१९७।।

साम्प्रतं काललोकप्रतिपादनायाह-

**समयावलिअमुहुत्ता दिवसमहोरत्तपक्खमासा य ।**
**संवच्छरजुगपलिआ सागरओसप्पिपरिअट्टा ।।१९८।। [भा०]**

वृ०- इह परमनिकृष्टः कालः **समयो**ऽभिधीयते, असङ्ख्येयसमयमाना **त्वावलिका,** द्विघटिको **मुहूर्तः,** षोडश मुहूर्ता **दिवसः,** द्वात्रिंश**दहोरात्रम्,** पञ्चदशाहोरात्राणि **पक्षः,** द्वौ पक्षौ **मासः,** द्वादश मासाः **संवत्सरमि**ति, पञ्चसंवत्सरं **युगम्, पल्योपममु**द्धारादिभेदं यथाऽनुयोगद्वारेषु तथाऽवसेयम्, **सागरोपमं** तद्वदेव, दशसागरोपमकोटाकोटिपरिमा**णोत्सर्पिणी,** एवमवसर्पिण्यपि द्रष्टव्या, **परावर्तः** पुद्गलपरावर्तः, स चानन्तोत्सर्पिण्यव-सर्पिणीप्रमाणो द्रव्यादिभेदः, तेऽनन्ता अतीतकालः अनन्त एवैष्यन्निति गाथार्थः ।।१९८।।

उक्तः काललोकः, लोकयोजना पूर्ववद् । अधुना भवलोकमभिधित्सुराह—

**णेरइअदेवमणुआ तिरिक्खजोणीगया य जे सत्ता ।**
**तंमि भवे वट्टंता भवलोगं तं विआणाहि ।।१९९ ।। [भा०]**

वृ०- **नारकदेवमनुष्यास्त**था **तिर्यग्योनिगताश्च ये सत्त्वाः** प्राणिनः **तंमि**त्ति तस्मिन् **भवे वर्तमाना** यदनुभावमनुभवन्ति **भवलोकं तं विजानीहि,** लोकयोजना पूर्ववदिति गाथार्थः ।।१९९।।

साम्प्रतं भावलोकमुपदर्शयति—

**ओदइए १ ओवसमिए २ खइए अ ३ तहा खओवसमिए अ ४ ।**
**परिणामि ५ सन्निवाए अ ६ छव्विहो भावलोगो उ ।। २००।। [भा०]**

वृ०- उदयेन निर्वृत्त **औदयिकः,** कर्मण इति गम्यते, तथोपशमेन निर्वृत्त **औपशमिकः,** क्षयेण निर्वृत्तः **क्षायिकः,** एवं शेषेष्वपि वाच्यम्, ततश्च क्षायिकश्च **तथा क्षायोपशमिकश्च पारिणामिकश्च सान्निपातिकश्च,** एवं **षड्विधो भावलोकस्तु,** तत्र सान्निपातिक ओघतोऽनेकभेदोऽवसेयः, अविरुद्धस्तु पञ्चदशभेद इति, उक्तं च–

"ओदइअखओवसमे परिणामेक्केक्को गइचउक्केऽवि ।
खयजोगेणवि चउरो तदभावे उवसमेणंपि ।। १।।

उवसमसेढी एक्को केवलिणोऽवि य तहेव सिद्धस्स ।
अविरुद्धसन्निवाइयभेया एमेव पण्णरस ।।२।।"त्ति गाथार्थः ।।२००।।

**तिव्वो रागो अदोसो अ, उइन्ना जस्स जंतुणो ।**
**जाणाहि भावलोअं, अणंतजिणदेसिअं सम्मं ।।२०१ ।। [भा०]**

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

वृ०- **तीव्र** उत्कटः **रागश्च द्वेषश्च** तत्राभिष्वङ्गलक्षणो रागः अप्रीतिलक्षणो द्वेष इति, एतावु**दीर्णौ यस्य जन्तोः** यस्य प्राणिन इत्यर्थः, तं प्राणिनं तेन भावेन लोक्यत्वा**ज्जानीहि भावलोकमनन्तजिनदेशितम्** एकवाक्यतयाऽनन्तजिनकथितं **सम्यग्** इति क्रियाविशेषणम्, अयं गाथार्थः ।। २०१ ।।

द्वारं, साम्प्रतं पर्यायलोक उच्यते, तत्रौघतः पर्याया धर्मा उच्यन्ते, इह तु किल नैगमनयदर्शनं मूढनयदर्शनं वाऽधिकृत्य चतुर्विधं पर्यायलोकमाह-

**दव्वगुण १ खित्तपज्जव २ भवाणुभावे अ३ भावपरिणामे ४।**
**जाण चउव्विहमेअं, पज्जवलोगं समासेणं ।।२०२।। [भा०]**

वृ०- **द्रव्यस्य गुणाः** रूपादयः, तथा **क्षेत्रस्य पर्यायाः**-अगुरुलघवः भरतादिभेदा एव चान्ये, **भवस्य** च नारकादेर**नुभावः** तीव्रतमदुःखादिः, यथोक्तम्-

"अच्छिणिमिलीयमेत्तं णत्थि सुहं दुक्खमेव अणुबंधं । णरए णेरइआणं अहोणिसिं पच्चमाणाणं ।।१।।

असुभा उव्वियणिज्जा सद्दरसा रूवगंधफासा य । णरए णेरइआणं दुक्कयकम्मोवलित्ताणं ।। २ ।।" इत्यादि, एवं शेषानुभावोऽपि वाच्यः, तथा **भावस्य** जीवाजीवसम्बन्धिनः **परिणामस्ते**न तेन अज्ञानाद् ज्ञानं नीलाल्लोहितमित्यादिप्रकारेण भवनमित्यर्थः, **जानीहि** अवबुध्यस्व **चतुर्विधमेनमो**घतः **पर्यायलोकं समासेन** संक्षेपेणेति गाथार्थः ।। २०२ ।।

तत्र यदुक्तं द्रव्यस्य गुणा इत्यादि तदुपदर्शनेन निगमयन्नाह-

**वन्नरसगंधसंठाणफासट्ठाणगइवन्नभेए अ ।**
**परिणामे अ बहुविहे पज्जवलोगं विआणाहि ।। २०३ ।। [भा०]**

वृ०- **वर्णरसगन्धसंस्थानस्पर्शस्थानगतिवर्णभेदाश्च**, चशब्दाद् रसादिभेदपरिग्रहः, अयमत्र भावार्थः--वर्णादयः सभेदा गृह्यन्ते, तत्र वर्णः कृष्णादिभेदात् पञ्चधा, रसोऽपि तिक्तादिभेदात्पञ्चधा, गन्धः सुरभिरित्यादिभेदाद् द्विधा, संस्थानं परिमण्डलादिभेदात्पञ्चधैव, स्पर्शः कर्कशादिभेदादष्टधा, स्थानमवगाहनालक्षणं तदाश्रयभेदादनेकधा, गतिः स्पर्शवद्गतिरित्यादिभेदा द्विधा, चशब्द उक्तार्थ एव अथवा कृष्णादिवर्णादीनां स्वभेदापेक्षया एकगुणकृष्णाद्यनेकभेदोपसङ्ग्रहार्थ इति, अनेन किल द्रव्यगुणा इत्येतद्व्याख्यातम् । **परिणामांश्च बहुविधानि**त्यनेन तु चरमद्वारम्, शेषं द्वारद्वयं स्वयमेव भावनीयम्, तच्च भावितमेवेत्यक्षरगमनिका । भावार्थस्त्वयम् - परिणामांश्च बहुविधान् जीवाजीवभावगोचरान्, किम् ? **पर्यायलोकं विजानीहि** इति गाथार्थः ।। २०३ ।।

अक्षरयोजना पूर्ववदिति द्वारम्, साम्प्रतं लोकपर्यायशब्दान्निरूपयन्नाह-

**आलुक्कइ अ पलुक्कइ लुक्कइ संलुक्कई अ एगट्ठा ।**
**लोगो अट्ठविहो खलु तेणेसो वुच्चई लोगो ।। १०५८ ।।**

वृ०- **आलोक्यत** इत्यालोकः, **प्रलोक्यत** इति प्रलोकः, **लोक्यत** इति लोकः, **संलाक्यत** इति च संलोकः, एते **एकार्थिकाः** शब्दाः, **लोकः अष्टविधः खल्वि**त्यत्र आलोक्यत इत्यादि योजनीयम्, अत एवाऽऽह -**तेनैष उच्यते लोको** येनाऽऽलोक्यत इत्यादि भावनीयमिति गाथार्थः ।। १०५८ ।। व्याख्यातो लोकः ।

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

# परिशिष्टम्-२

## पूज्यपादश्रीमज्जिनदासगणिमहत्तरविरचिता
## आवश्यकसूत्राऽन्तर्गतस्य "पडिक्कमामि चउहिं झाणेहिं "सूत्रस्य चूर्णिः ।

जीवस्स एगग्गे जोगाभिनिवेसो झाणं, अंतोमुहुत्तं तीव्रजोगपरिणामस्यावस्थानमित्यर्थः, तस्य सत्त भंगा- १- मानसं, २- अहवा वाइयं, ३- अहवा कायिगं, ४- अहवा माणसं वाइयं च, ५- अहवा वाइगं कायिगं च, ६- अहवा माणसं कायिगं, ७-अहवा मणवयणकायिगं ति ।

एत्थ पढमो भंगो छउमत्थाणं सम्मद्दिट्ठिमिच्छादिट्ठीणं सरागवीतरागाणं भवति, बितितो तेसिं चेव छदुमत्थाणं सजोगिकेवलीणं च धम्मं कथेन्ताणं, काइगं तेसिं चेव छदुमत्थाणं सजोगिकेवलीणं च चरमसमयसजोगित्ति ताव भवति, चउत्थो पंचमो य जथा पढमो, छट्ठो जथा सजोगिकेवलीणं, सत्तमो जथा पढमो ।

**तं झाणं चतुव्विधं- अट्टं रुद्दं धम्मं सुक्कं च ।**

आर्तभावं गतो आर्त्तः आर्तस्य ध्यानम् आर्तध्यानं, रौद्रभावं गतो रौद्रः, धर्मभावं गतो धर्मः, शुक्लभावं गतः शुक्लः । उक्तं च-

"हिंसाणुरंजितं रौद्रं, अट्टं कामाणुरंजितं । धम्माणुरंजितं धम्मं, शुक्लं झाणं निरंजणं ।। १ ।।"

एगेगस्स असंखेज्जाइं ठाणाइं, एतेसु ठाणेसु जीवो अरहट्टघटीविय आएति य जाति य।

**तत्थ संखेवतो अट्टं चतुव्विधं-**

१ - अमणुण्णाणं संजोगाणं वियोगं चिंतेति-काए वेलाए विमुच्चेज्जामि ?, अणागतेऽवि असंप्रयोगाणुसरणं, अतीतेऽवि वियोगं बहु मण्णति,

२ - एवं बीयं मणुण्णाणं वियोगं नेच्छति,

३ - एवं ततियं आयंकस्स केण उवाएण सचित्तादिणा दव्वजातेण तिगिच्छं करेमित्ति चिंतेति,

४ - चउत्थं परिहीणो वित्तेण तं पत्थेंतो वित्तं झायति, दुब्बलो थेरो असमत्थो वा भोत्तुं आंहारं इत्थिं वा कदा भुंजेज्जामित्ति य चिंतेति । **गाहाओ-**

अमणुण्णसंपयोगे मणुण्णवग्गस्स विप्पओगे वा । वियणाए अभिभूतो परइड्डीओ य दट्ठूणं ।। १।।
सद्दा रूवा गंधा रसा य फासा य जे तु अमणुण्णा । बंधववियोगकाले अट्टज्झाणं झियायंति ।। २।।
एवं मणुण्णविसए इड्डीओ चक्कवट्टिमाणदीणं । गहिते विम्हितमनसे पत्थेमाणे झियाएज्जा ।। ३।।
मित्तयनातिवियोगे वित्तविण्णासे तह य गोमहिसे । अट्टं झाणं झायति परितप्पंते सिदंते य ।। ४।।

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

किण्हा नीला काऊ अट्टज्झाणस्स तिण्णि लेसाओ । उव्वज्झति तिरिएसुं भावेण य तारिसेणं तु।।५।।

अट्टं झाणं झियायंतो, किण्हलेसाए वट्टती । उक्किट्ठगंमि ठाणंमि, अचरित्ती असंजतो ।। ६ ।।

अट्टं झाणं झियायंतो, नीललेसाए वट्टती । मज्झिल्लगंमि ठाणंमि, अचरित्ती असंजतो ।। ७ ।।

अट्टं झाणं झियायंतो, काऊलेसाए वट्टती । कणिट्ठगंमि ठाणंमि, अचरित्ती असंजतो ।। ८ ।।

तिव्वकोधोदयाविट्ठो, किण्हलेसाणुरंजितो ।

अट्टं झाणं झियायंतो तिरिक्खत्तं निगच्छती ।। ९ ।। एवं चत्तारिवि कसाया भाणितव्वा ।

मज्झिमकोधोदयाविट्ठो, नीललेसाणुरंजितो ।

अट्टं झाणं झियायंतो, तिरिक्खत्तं निगच्छति ।। १० ।। एवं चत्तारिवि कसाया ।

मंदकोधोदयाविट्ठो, काउलेसाणुरंजितो ।

अट्टज्झाणं झियायंतो, तिरिक्खत्तं निगच्छति ।। ११ ।। एवं चत्तारिवि कसाया ।

**अट्टस्स लक्खणाणि**-कंदणता, सोयणता, तिप्पणता, परिदेवणता। तत्थ कंदणता- हा मात! हा पितेत्यादि, सोयणता- करतलपल्हत्थमुहो दीणदिट्ठी झायति, तिप्पणता-तिहिं जोगेहिं तप्पति, परिदेवणता-एरिसा मम माता वा २ लोगस्स साहति, अहवा वेमाए वायं जोएति वा, अहवा परि २ तप्पति, सरित्ता मातुगुणे सयणवत्थाणि वा घरं वा दमं २ तप्पति-

इंदियगारवसंण्णा उस्सेय रती भयं च सोगं च । एते तु समाहारा भवंति अट्टस्स झाणस्स ।। १ ।।

**रोद्दं चतुव्विधं**-हिंसाणुबंधी, मोसाणुबंधी, तेणाणुबंधी, सारक्खणाणुबंधी।

तत्थ हिंसाणुबंधी हिंसं अणुबंधति, पुणो पुणो तिव्वेण परिणामेणं तसपाणे हिंसति, अहवा पुणो पुणो भणति चिंतेति वा सुट्ठु कतं, अहवा छिद्दाणि वयराणि वा मग्गति, हिंसं अणुबंधति, ण विरमति। एवं मोसेवि, तिण्णेवि, संरक्खणो परागादीणि करोति, जो वा जोइल्लओ खाति तं मारेति, मा अण्णोवि खाहिति, दुट्ठे सासति, सव्वतो य बीभेति, पलित्तमिव मण्णति, उक्खणति, निक्खणति, सव्वं तेलोक्कं चोरमइयं मंणति, परनिंदासु व हिस्सति, रुस्सति, वसणमभिनंदति परस्स, रोद्दज्झाणमतिगतो भवति येव दुक्कडमयीयो, एवं सारक्खणाणुबंधे, सेसं तहेव।

**तस्स चत्तारि लक्खणाणि**-उस्सण्णदोसो, बहुदोसो, अण्णाणदोसो, आमरणंतदोसो,

ओसण्णं हिंसादीणं एगतरं अभिक्खणं २ करेति उस्सण्णदोसो, हिंसादिसु सव्वेसु पवत्तमाणो बहुदोसो, अण्णाणदोसो संसारमोदगादीणं, आमरणंतदोसो जथा पव्वतराई, परिगिलायमाणस्सवि आगतपच्छादेसस्स थोवोऽपि पच्छाणुतावो न भवति, अवि मरणकालेवि जस्स **कालसोयरियस्सेव** ण ताओ उवरती भवति, एस आमरणंतदोसो । **तत्थ गाहाओ—**

अट्ठाए अणट्ठाए निरवेक्खो निद्दयो हणति जीवे । चिंतेतो वावि विहरे रोद्दज्झाणे मुणेतव्वो ।। १ ।।

अलियपिसुणे पसत्तो णाहियवादी तहेवमादी य । अभिसंधाणभिसंदण रोद्दज्झाणं झियायेति ।। २ ।।

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

परदव्वहरणलुद्धो निझंपि य चोरियं तु पत्थेंतो । लुद्धो य रक्खणपरो रुद्दज्झाणे हवति जीवो ।। ३ ।।

किण्हा नीला काऊ रोद्दज्झाणस्स तिण्णि लेसाओ । नरगंमि य उववत्ती रोद्दज्झाणा उ जीवस्स ।। ४ ।।

रोद्दज्झाणं झियायंतो, किण्हलेसाए वट्टती । उक्कस्सगंमि ठाणंमि, अचरित्ती असंजतो ।। ५ ।।
सेसं जथा अट्टे, नवरं गतिं गच्छति दुद्धरं ।

पाणवहमुसावाए अदत्तमेहुणपरिग्गहे चेव। एते तु समाहारा हवंति रोद्दस्स झाणस्स ।। ६ ।।

**धम्मे चतुव्विधे चउप्पडोयारे पण्णत्ते,** तंजथा-झाणे अणुप्पेहाउ लक्खणे आलंबणे, एतं चतुव्विधं, चउप्पडोयारं नाम एक्केक्कं तत्थ चतुव्विधं झाणं, चतुव्विधं तंजथा-आणाविजये अवायविजए विवागविजए संठाणविजये ।

१ - तत्थ आणाविजए आणं विवेएति, जथा पंचत्थिकाए छज्जीवनिकाए अट्ठ पवयणमाता, अण्णे य सुत्तनिबद्धे भावे अबद्धे य पेच्छ कहं आणाए परियाणिज्जंति ?, एवं चिंतेति भासति य, तथा पुरिसादिकारणं पडुच्च किच्छासज्झेसु हेतुविसयातीतेसुवि वत्थुसु सव्वण्णुणा दिट्ठेसु एवमेव सेतंति चिंतंतो भासंतो य आणा विवेयेति,

२ - एवं अवायविजयेति, पाणातिवातेणं निरयं गच्छति अप्पाउओ काणकुंटादी भवति एवमादि त्वाज्ञा, अहवा मिच्छत्त-अविरति-पमाय-कसाय-जोगाणं अवायमणुचिंतेति, णाणदंसणचरित्ताणं वा विराधणावायमणुचिंतेति,

३ - विवागविजयो विविधो पागो विवागो कंमाणुभावोति भणितं होति, सुभासुभा य जे कंमोदयभावा ते चिंतेति,

४ - संठाणविजयो, संठाणाणि विवेचयति, सव्वदव्वाणं संठाणं चिंतेति, जथा लोए सुपत्तिट्ठासंठिते, अलोए सुसिरगोलकसंठिते, नरगा हुंडसंठिता, एवं सव्वदव्वाणं । एत्थ इमाओ चउण्हंपि कारगगाथाओ-

पंचत्थिकाए आणाए, जीवा आणाए छव्विहे । विजए जिणपण्णत्ते, धम्मज्झाणं झियायइ ।। १ ।।

इहलोइए अवाए, तधा य पारलोइए । चिंतयंतो जिणक्खाए, धम्मज्झाणं झियायती ।। २ ।।

इहलोइयं अवायं, बितियं पारलोइयं । अप्पमत्तो पमत्तो वा, धम्मज्झाणं झियायती ।। ३ ।।

सुभमसुभं अणुभावं कंमविवागं विवागविजयंमि । संठाण सव्वदव्वे णरगविमाणाणि जीवाणं ।। ४।।

देहादीयं परीणामं, नारगादीसु णेकधा । लेस्सातिगं च चिंतेति, विवागं तु झियायती ।। ५ ।।

सुभाणं असुभाणं च, कंमाणं जो विजाणती । समुतिण्णाणमप्पाणं, विवागं तु झियायती ।। ६।।

पंचासवपडिविरओ चरित्तजोगंमि वट्टमाणो उ । सुत्तत्थमणुसरंतो धम्मज्झायी मुणेयव्वो ।। ७ ।।

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

तेजोपम्हासुक्कालेसाओ तिण्णि अण्णतरिगाओ । उववातो कप्पतीते कप्पंमि व अण्णतरगंमि ।। ८।।

धम्मज्झाणं झियायंतो, सुक्कलेसाए वट्टती । विक्किट्ठगंमि ठाणंमि, सचरित्ती सुसंजतो ।। ९ ।।

एवं पम्हालेसाए मज्झियगंमि ठाणंमि, तेऊलेसाए कणिट्ठगंमि ठाणंमि ।

कोवनिग्गहसंजुत्तो, सुक्कलेसाणुरंजितो, धम्मझाणं झियायंतो, देवयत्तं निगच्छति ।। १० ।। त्ति ।

एवं माणमायालोभनिग्गहेऽवि, एवं पम्हाएवि, तेऊएवि लेसाए ।

**इमाओ पुण से चत्तारि अणुप्पेहाओ,** तं० अणिच्चताणुप्पेहा एवं असरणता०, एगत्ता०, संसाराणुप्पेहा।

संसारसंगविजयनिमित्तमणिच्चताणुप्पेहमारभते, एवं धंमे थिरतानिमित्तं असरणगत्तं, संबंधिसंगविजयाय एगत्तं, संसारुद्वेगकारणा संसाराणुप्पेहं ।

**लक्खणाणि इमाणि चत्तारि-**आणारुई, निसग्गरुई, सुत्तरुई, ओगाहरुई । आणारुई-तित्थगराणं आणं पसंसति, निसग्गरुई- सभावतो जिणप्पणीए भावे रोयति, सुत्तरुई-सुत्तं पढंतो संवेगमावज्जति, ओगाहणारुई-णयवादभंगगुविलं सुत्तमत्थतो सोतूण संवेगमावन्नसद्धो झायति ।

**आलंबणाणि च से चत्तारि,** जथा-विसमसमुत्तरणे वल्लिमादीणि, तंजथा-वायणा, पुच्छणा, परियट्टणा, अणुप्पेहा । धम्मकहा परियट्टणे पडति । एवं विभासेज्जा ।।

**इदाणिं सुक्कं, सुक्के चतुव्विधे चउप्पडोयारे पण्णत्ते-**१-पुहत्तवितक्के सविचारे, २-एगत्तवितक्के अविचारे, ३-सुहुमकिरिए अणियट्टी, ४-समुच्छिण्णकिरिए अप्पडिवाई ।

सुत्तणाणे उवउत्तो अत्थंमि य वंजणंमि सवियारं । झायति चोद्दसपुव्वी पढमं सुक्कं सरागो तु ।। १।।

सुत्तणाणे उवउत्तो अत्थंमि य वंजणंमि अवियारं । झायति चोद्दसपुव्वी बीयं सुक्कं विगतरागो ।। २ ।।

अत्थसंकमणं चेव, तहा वंजणसंकमं । जोगसंकमणं चेव, पढमे झाणे निगच्छति ।। ३ ।।

अत्थसंकमणं चेव, तहा वंजणसंकमं । जोगसंकमणं चेव, बितिए ज्झाणे वितक्कती ।। ४।।

जोगे जोगेसु वा पढमं, बीयं योगंमि कण्हुयी । ततियं च कायिके जोगे, चउत्थं च अजोगिणो ।। ५।।

पढमं बीयं च सुक्कं, झायंती पुव्वजाणगा । उवसंतेहिं कसाएहिं, खीणेहि व महामुणी ।। ६ ।।

बीयस्स य ततियस्स य अंतरियाए केवलनाणं उप्पज्जति ।

दोण्णी सुत्तणाणीगा झाणा, दुवे केवलणाणिगा । खीणमोहा ज्झियायंती, केवली दोण्णि उत्तमे ।। ७।।

सिज्झितुकामो जाहे कायजोगे निरुभती ताहे, तस्स सुहुमा उस्सासनिस्सासा, तत्थ य दुसमयट्ठितियं परमसातं इरियावधियं कम्मं बज्झति, तत्थ ततियं सुहुमकिरियं अणियट्टीझाणं भवति जोगनिरोधे कते पुव्वपयोगेणं, चउत्थं समुच्छिन्नकिरियमप्पडिवादि झाणं णाणाठाणोदयं जथा तथा झायति, अहवा कुलालचक्केण

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

दिट्ठंतो, जथा दंडपुरिसपयत्तविरामवियोगेण कुलालचक्कं भमति तथा सयोगिकेवलिणा पुव्वारद्धे सुक्कज्झाणे अजोगिकेवलीभावेण **सुक्कज्झायी** भवति ।

पढमबितियाओ सुक्काए, ततियं परमसुक्कियं । लेश्यातीतं उवरिल्लं, होति ज्झाणं वियाहितं ।। ८।।

अणुत्तरेहिं देवेहिं, पढमबीएहिं गच्छती । उवरिल्लेहिं झाणेहिं, सिज्झती निरयो धुवं ।। ९।।

**इमाओ पुण से चत्तारि अणुप्पेहाओ**-अवायाणुप्पेहा, असुभाणुप्पेहा, अणंतवत्तियाणुप्पेहा, विप्परिणामाणुप्पेहा। जधत्थं आसवादिअवायं पेक्खति, संसारस्स असुभत्तं, अणंतत्तं, सव्वभावविपरिणामित्तं ।

**लक्खणाणिवि चत्तारि**-विवेगे, वियोसग्गे, अव्वहे, असंमोहे । विवेगे सव्वसंजोगविवेगं पेक्खति, वियोसग्गे सव्वोवहिमादिविउस्सग्गं करेति, अव्वधे विण्णाणसंपण्णो ण बिहेति ण चलति, असंमोहे सुसण्हेवि अत्थे न संमुज्झतित्ति ।

**आलंबणाणि चत्तारि**-खंती, मुत्ती, अज्जवं, मद्दवंति ।।

**एतेहिं चउहिं झाणेहिं जो मे अतियारो पडिसिद्धकरणे कतो तस्स मिच्छामि दुक्कडं ति।**

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

# परिशिष्टम्-३

।। पूज्यपादाचार्यश्रीमज्जिनभद्रगणिक्षमाश्रमणविरचित-**ध्यानशतकस्य**

पूर्वाचार्यकृत **अर्थलेशः**,

पूज्यपादाचार्यश्रीमाणिक्यशेखरसूरिकृता **दीपिकाटीका**,

पूज्यपादाचार्यश्रीज्ञानसागरसूरिकृता **अवचूर्णिः**,

पूज्यपादमुनिश्रीधीरसुन्दरगणिरचिता **अवचूरिः**,

पूज्यपादाचार्यश्रीतिलकसूरिकृता च **लघुटीका** ।।*

**वीरं सुक्कज्झाणग्गि-दड्ढकम्मिंधणं पणमिऊणं ।**
**जोईसरं सरण्णं, झाणज्झयणं पवक्खामि ।।१।।**

**अर्थलेशः - वीरं गाथा** ।। अहं **ध्यानाध्ययनं प्रवक्ष्यामि ।** किं कृत्वा? **वीरं** श्रीवर्द्धमानं जिनं **प्रणम्य।** किं विशिष्टं वीरम्? **शुक्लध्यानाग्निदग्धकर्मेन्धनं** तथा **योगीश्वरम्** अपरं **शरण्यम्** ।। १।।

**दीपिका -** ध्यानस्वरूपज्ञापनाय श्रीजिनभद्रगणिकृतो ध्यानशतकाख्यो ग्रन्थो व्याख्यायते- **शुक्लध्यानाग्निदग्धकर्मेन्धनम्, योगो** धर्म्यं शुक्लध्यानं सोऽस्ति येषां तैर्योगिभिः **स्मर्यं** ध्येयम्, **शरण्यं** शरणे हितम्, **प्रणम्य ध्यानाध्ययनं प्रवक्ष्यामि** ।।१।।

**अवचूर्णिः -** अस्य च शास्त्रान्तरत्वान्नमस्कारमादावाह -

**अवचूरिः -** असौ शास्त्रान्तरत्वान्नमस्कारमादावाह- **वीरं०** ।। **शुक्लध्यानाग्निदग्धकर्मेन्धनं प्रणम्य योगीश्वरं शरण्यं** ध्यानप्रतिपादकमध्ययनं **ध्यानाध्ययनं प्रवक्ष्ये** ।।१।।

**टीका -** ध्यानान्येव गाथाशतेनाह । तत्रादौ नमस्कारमाह - विशिष्टमनोवाक्काययोगवन्तो **योगिनः** साधवस्तेषा**मीश्वरम्** ।।१।।

**जं थिरमज्झवसाणं, तं झाणं जं चलं तयं चित्तं ।**
**तं होज्ज भावणा वा, अणुपेहा वा अहव चिंता ।।२।।**

**अर्थलेशः - जं थिरं गाथा ।। यत् स्थिरमध्यवसानं** निश्चलो मनःपरिणामः **तद् ध्यानं** स्यात् **यत् चलं** चञ्चलं **तच्चित्तं** भवति । **तच्चित्तं भावनारूपं स्यात् । अनुप्रेक्षारूपं वा** स्यात् । **चिन्तारूपं**

---

* अस्मिन् परिशिष्टे ध्यानशतकस्योपरि रचितानां टीकादीनां समावेशः कृतः, तन्मध्ये **चामुद्रितानामर्थलेश-अवचूरि - टीकानामपि** ग्रहणं कृतमस्ति । सम्पा० ।

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

**वा** स्यात्। तत्र **भावना** अनित्याद्या द्वादशभेदा । **अनुप्रेक्षा** शास्त्रार्थचिन्ता । **चिन्ता** यादृशी तादृशी सांसारिकी धार्म्मिकी वा स्यात् ।। २ ।।

**दीपिका - यत् स्थिरमे**काग्रालम्बन**मध्यवसानं** मनस्त**द्ध्यानम्, यच्चलं** मनस्त**च्चित्तमु**च्यते। **तच्चित्त**मोघतस्त्रिधा **भवेत्। 'भावणा वा'** भाव्यते इति भावना ध्यानाभ्यासक्रिया, अनु - पश्चात्प्रेक्षा स्मृतिर्ध्यानाद् भ्रष्टस्य चित्तचे**ष्टानुप्रेक्षा वा,** उक्तद्विभेदवर्जमनश्चेष्टा **चिन्ताऽथवा** ।।२।।

**अवचूर्णिः - यत् स्थिरमध्यवसानं तद्ध्यानम्, यत्तु चलं तच्चित्तम्, तच्चित्तं भवेद्भावना** ध्यानाभ्यासक्रिया, **अनुप्रेक्षा** अनु-पश्चाद्भावे प्रेक्षणं प्रेक्षा, सा च स्मृतिर्ध्यानाद् भ्रष्टस्य चित्तचेष्टेत्यर्थः, **अथवा चिन्ता** प्रोक्तप्रकारद्वयरहिता चित्रा मनश्चेष्टा सा चिन्ता ।। २ ।।

**अवचूरिः -** ध्यानलक्षणमाह - **जं थिर०** ।। **यत्स्थिरमध्यवसानं** मन एकाग्रालम्बनं **तद्ध्यानम्, यच्चलमन**वस्थितं **तच्चित्तम्,** तच्चोघतस्त्रिधेति दर्शयति । १-**तच्चित्तं भवेत्** भाव्यत इति **भावना** ध्यानायाभ्यासक्रिया, २-**अनुप्रेक्षा** वाऽनु पश्चाद्भावो प्रेक्षणं प्रेक्षा सा च स्मृतिर्ध्यानाद् भ्रष्टस्य चित्तचेष्टेत्यर्थः, **३-अथवा चिन्ता** प्रोक्तप्रकारद्वयरहिता चित्रा मनश्चेष्टा सा चिन्ता ।।२।।

**टीका -** ध्यानाध्यानलक्षणमाह– **यच्चलं तच्चित्तम्** । तच्च त्रिधा । भाव्यत इति **भावना** ध्यानाभ्यासक्रिया, **अनुप्रेक्षा** ध्यानाद् भ्रष्टस्य पुनस्तदनुचिन्तनम्, **अथवा चिन्ता** मनश्चेष्टा ।। २ ।।

**अंतोमुहुत्तमेत्तं, चित्तावत्थाणमेगवत्थुंमि ।**
**छउमत्थाणं झाणं, जोगनिरोहो जिणाणं तु ।। ३ ।।**

**अर्थलेशः - अंतो गाथा ।। छद्मस्थानामन्तर्मुहूर्तमेकवस्तुनि चित्तावस्थानं ध्यानं** स्यात्। **तु** पुन**र्जिनानां योगनिरोधो** ध्यानं भवति ।। ३ ।।

**दीपिका** - इह समाधिस्थैकोच्छ्वासनिःश्वासरूपप्राणसप्तकोत्थस्तोकसप्तकलवः, सप्तसप्ततिलवैर्मुहूर्त्तं तन्मध्य**मन्तमुहूर्त्तं तन्मात्रमेकवस्तुनि चित्तावस्थानं छद्मस्थानां ध्यानम्, जिनानां तु योगाः** मनोवाक्कायास्तेषां **निरोधो** निग्रहः शैलेश्यवस्थायां ध्यानम् ।।३।।

**अवचूर्णिः -** ध्यानलक्षणमुक्त्वा ध्यानमेव कालस्वामिभ्यामाह— **अन्तर्मुहूर्त्तकालं चित्तावस्थानमेकस्मिन् वस्तुनि** यत्तद् **छद्मस्थानां ध्यानम्, योगनिरोध एव जिनानां** केवलिनां ध्यानम्, न तु चित्तावस्थानम्, चित्तस्यैवाऽभावात्, एतदुपरिष्टाद्वक्ष्यामः ।। ३ ।।

**अवचूरिः -** ध्यानाध्यानलक्षणमुक्त्वा ध्यानमेव कालस्वामिभ्यामाह - **अंतो०** ।। **अंतर्मुहूर्त्तमात्रं** कालं **चित्तस्यावस्थानं** निःप्रकम्पतया वृत्तिरित्यर्थः । कस्मिन् ? **वस्तुनि** यत्तत् **छद्मस्थानां ध्यानम् । योग** औदारिकादिशरीरसंयोगसमुत्थआत्मपरिणामविशेषव्यापारस्तेषां **तोरे**वार्थत्वा**न्निरोध एव** न तु चित्तावस्थानम्, चित्तस्यैवाभात् जिनानां यथा चायं योगनिरोधो **जिनानां** ध्यानं यावन्तं च कालमित्येतदुपरिष्ठाद्वक्ष्यामः ।।३।।

**टीका -** अथ कालस्वामिभ्यां ध्यानरूपमाह– त्रिपदी स्पष्टा । **जिनानां** केवलिनां **पुनर्योगनिरोधो ध्यानम्,** तेषां चित्ताभावात् ।। ३ ।।

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

**अंतोमुहुत्तपरओ, चिंता झाणंतरं व होज्जाहि ।**
**सुचिरंपि होज्ज बहुव-त्थुसंकमे झाणसंताणो ।। ४ ।।**

**अर्थलेशः - अंतो गाथा ।। अन्तर्मुहूर्तात् परतः चिन्ता** सांसारिकी धार्मिकी वा **स्यात्** । **ध्यानान्तरं वा** स्यात् । **बह्वर्थसङ्क्रमे** सति **सुचिरमपि** बहुकालमपि **ध्यानसन्तानः स्यात्** ।।४।।

**दीपिका -** छद्मस्थाना**मन्तर्मुहूर्त्त**मात्रध्याना**त्परतः चिन्ता** प्रागुक्तरूपा **ध्यानान्तरं** भावनानुप्रेक्षात्मकं **वा भवेत्** । एतच्चोत्तरकालभाविनि ध्याने सति स्यान्नान्यथा । तत्रापि ध्यानादूर्ध्वं चिन्ता **ध्यानान्तरं** वेत्याद्येवं **सुचिरमपि बहुवस्तुसङ्क्रमे ध्यानसन्तानो भवेत्** ।। ४ ।।

**अवचूर्णिः -** छद्मस्थानामन्तर्मुहूर्तात्परतो यत्स्यात्तदाह- **भिन्नमुहूर्त्तादूर्ध्वं चिन्ता** प्रागुक्तस्वरूपा **ध्यानान्तरं वा भवेद्**भावनानुप्रेक्षात्मकं चेतः, **सुचिरमपि** कालं **भवेद् बहुवस्तुसङ्क्रमे ध्यानसन्तानो** ध्यानप्रवाहः, **बहूवस्तूनि** चात्मगतानि मनःप्रभृतीनि, परगतानि द्रव्यादीनि, तेषु **सङ्क्रमः** सञ्चरणम् ।।४।।

**अवचूरिः -** छद्मस्थानामन्तर्मुहूर्तपरतो यत्स्यात्तदाह - **अंतो०** ।। **अन्तर्मुहूर्तात्परत** इति भिन्नमुहूर्तादूर्ध्वं **चिन्ता** प्रागुक्तस्वरूपा तथा **ध्यानान्तरं वा** । इह न ध्यानादन्यद् ध्यानं ध्यानान्तरं गृह्यते । किं तर्हि ? भावनानुप्रेक्षात्मकं चेतः । इदं च ध्यानान्तरं तदुत्तरकालभाविनि ध्याने सति स्यात् । तत्राप्ययमेव न्याय इतिकृत्वा ध्यानसंतानप्राप्तिः यतः, अतस्तमेव कालमानं वस्तुसंक्रमद्वारेणाह **सुचिरमपि** प्रभूतमपि कालं भवेत्, **बहुवस्तुसंक्रमे** सति **ध्यानसंतानो** ध्यानप्रवाह **बहुवस्तूनि** चात्मगतानि मनःप्रभृतीनि, परगतानि द्रव्यादीनि तेषु **संक्रमः** संचरणम् ।।४।।

**टीका -** अन्तर्मुहूर्त्तात्परतः किमित्याह- स्पष्टा ।।४।।

**अट्टं रुद्दं धम्मं, सुक्कं झाणाइ तत्थ अंताइं ।**
**निव्वाणसाहणाइं, भवकारणमट्टरुद्दाइं ।। ५ ।।**

**अर्थलेशः - अट्टं गाथा ।। ध्यानानि** चत्त्वारि स्युः । कथम्? १-**आर्तं,** २-**रौद्रं,** ३-**धर्म्मं,** ४-**शुक्लम्** । **तत्र अन्त्यध्याने** धर्म्म-शुक्लरूपे **निर्वाणसाधके** भवतः। **आर्त्तरौद्रे भवसाधने** संसारकारणे स्तः ।। ५ ।।

**दीपिका -** १-ऋतं-दुःखं तत्र भवम् आर्तम्, २-क्रौर्यानुगतं रोदयति जीवं नरके इति रौद्रम्, ३-चरण-श्रुतधर्म्मानुगतं धर्म्यम् , ४-शोधयत्यष्टकर्म्माणि शुचं क्लमयतीति शुक्लम् । **तत्रान्ते** इति धर्म्यशुक्ले ।।५।।

**अवचूर्णिः -** इत्थं ध्यानस्य सामान्येन लक्षणमुक्त्वा विशेषत आह -

**अवचूरिः -** इत्थं ध्यानस्य सामान्येन लक्षणमुक्त्वा विशेषत आह - **अट्टं०** ।। १-ऋतं दुःखं तन्निमित्तो दृढोऽध्यवसाय ऋते भव**मार्त्तम्,** २-हिंसाद्यतिक्रौर्यानुगतं **रौद्रम्,** ३-श्रुतचरणधर्मानुगतं **धर्मम्,** ४-शुचं क्लमयति **शुक्लम् । तत्रान्ते** ध्याने धर्मशुक्ले **निर्वाणसाधने भवकारणमार्त्तरौद्रे, भव**ग्रहणादिह तिर्यग्नारकभवग्रहः ।।५।।

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

**टीका** - उक्तं ध्यानसामान्यलक्षणम् । विशेषमाह - स्पष्टा ।। ५ ।।

## [अथ आर्तध्यानम्]

**अमणुण्णाणं सद्दा-इविसयवत्थूण दोसमइलस्स ।**
**धणियं विओगचिंतण-मसंपओगाणुसरणं च ।। ६ ।।**

**अर्थलेशः - अमणु गाथा ।।** आर्त्तादीनि चत्वार्यपि प्रत्येकं चतुर्भेदानि स्युः। तत्रार्त्तध्यानस्य चत्वारो भेदा यथा । जीवस्य **द्वेषमलिनस्य। अमनोज्ञानां शब्दादिविषयवस्तूनां** पञ्चानामपि **धनिकम-**त्यर्थ**वियोगचिन्तनम्,** तथा **असम्प्रयोगानुस्मरणं च** प्रथम आर्त्तध्यानभेदः। एतेषां शब्दादीनां विरूपाणां कदा वियोगो भविष्यति । रक्षे [?] एते शब्दादयो विरूपाः कदापि [न] मिलन्तीति भावार्थः ।। ६ ।।

**दीपिका** - चत्वार्यपि चतुर्द्धा, तत्राद्यभेदानाह - **अमनोज्ञानां शब्दादिविषया**धार**वस्तूनां द्वेषमलिनस्य** जीवस्य **'धणियं'** अत्यर्थं **वियोगचिन्तनम्,** यथा कथमेभिः सह वियोगः स्यादिति वर्त्तमानग्रहः, सति च वियोगेऽ**सम्प्रयोगानुस्मरणम्,** सदैवैभिः सहासम्प्रयोगो -वियोगो भूयादित्यनेनैष्यत्कालग्रहः **च**शब्दात्पूर्वमपि वियोगायोगयोर्मतत्वादतीतकालग्रहः ।। ६ ।। इति अनिष्टसम्प्रयोगनामा प्रथमो भेदः १।

**अवचूर्णिः** - आर्त्तध्यानं चतुर्द्धा, तत्राद्यं भेदमाह - **अमनोज्ञानां** [शब्दादयः] विषया इन्द्रियगोचरा वस्तूनि च तेषां **शब्दादिविषयवस्तूनां** सम्प्राप्तानां सताम्, **'धणियं'** अत्यर्थं **वियोगचिन्तनं** कथमेभिर्वियोगः स्यात्? अनेन वर्त्तमानकालग्रहः, तथा सति वियोगेऽ**सम्प्रयोगानुस्मरणम्,** कथमेभिः सह सदैव सम्प्रयोगाभावः? अनेनानागतकालग्रहः, **च**शब्दात् पूर्वकालमपि वियुक्तासम्प्रयुक्तयोर्बहुमतत्वेनातीतकालग्रहः, किंविशिष्टस्य सत इदं वियोगचिन्तनादि? **द्वेषमलिनस्य** तदाक्रान्तमूर्त्तेर्जन्तोः ।।६।।

**अवचूरिः** - आर्त्तध्यानं चतुर्द्धा, तत्राद्यं भेदमाह - **अम०** ।। **अमनोज्ञानाम**निष्टानां **विषया** इन्द्रियगोचरा **वस्तूनि** तु तदाधारभूतानि रासभादीनि ततश्च **शब्दादिविषयवस्तूनां** संप्राप्तानां सताम् [**'धणियं'** अत्यर्थं **वियोगचिन्तनं** कथं नु नाम ममैभिर्वियोगः स्यादनेन वर्तमानकालग्रहः, तथा वियोगेऽ**सम्प्रयोगानुस्मरणं** कथमेभिः सदैव सम्प्रयो] गाभावोऽनेन चानागतकालग्रहणम्, **च**शब्दात्पूर्वमपि वियुक्तासंयुक्तयोर्बहुमतत्वेनातीतकाल संयुज्य वियुक्त आदित एव न संयुक्तस्तत्सुंदरमभूदित्येवमतीतमनुमोदमानस्यातीतकालविषयमप्यार्त्तः स्यादित्यर्थः । किं विशिष्टस्य सत इदं वियोगचिन्तनादि ? **द्वेषमलिनस्य** अप्रीतिलक्षणो **द्वेषस्तेन मलिनस्य** तदाक्रान्तमूर्त्ते जीवाः ।।६।।

**टीका** - अथार्त्तध्यानं चतुर्धा तस्याद्यभेदमाह - **अमनोज्ञानाम**निष्टानां **शब्दादीनां विषयाणां वस्तूनां** रासभादीनाम्, **द्वेषमलिनस्य** द्वेषाक्रान्तमूर्त्तेः। **धणियमत्यर्थं वियोगचिन्तनं** कदा ममैभिर्वियोगः स्यादिति। **असम्प्रयोगानुस्मरणम्,** अनागतकालेपि कथं ममैभिरसम्प्रयोगः स्यादित्यनुस्मरणं च ।। ६ ।।

**तह सूलसीसरोगा-इवेयणाए विजोगपणिहाणं ।**
**तदसंपओगचिंता, तप्पडियाराउलमणस्स ।। ७ ।।**

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

**अर्थलेशः – तह गाथा ।। तथा** यस्य जीवस्य **शूलशीर्षरोगादिवेदनाया वियोगप्रणिधानं** स्यात् । तथा **तदसम्प्रयोगचिन्तनं** च तेषां रोगाणामसम्प्रयोगः अनुत्पत्तिस्तस्याश्चिन्तनं च स्यात् । किं विशिष्टस्य जीवस्य? **तत्प्रतीकाराकुलमनसः।** तेषां रोगाणां प्रतीकाराय आकुलचित्तस्य एष द्वितीय आर्त्तध्यानभेदः। रोगचिकित्साकुल[म]नानाम् मम रोगा कदा यास्यन्ति । रक्षे (?) नवीना उत्पद्यन्ते इति चिन्ताव्याकुलस्यायं भेदः ।। ७ ।।

**दीपिका - तथा**ऽत्यर्थं **शूलशीर्षरोगादिवेदनाया वियोगे प्रणिधानं** दृढोऽभिप्रायः इति वर्त्तमानकालग्रहस्तथा **तस्या** वेदनाया अभावे **सत्यसम्प्रयोगचिन्ता** वियोगचिन्ता **तत्प्रतिकाराकुलमनसो** जीवस्य स्यात् । भविष्यातीतकालावत्र स्वयं ज्ञेयौ । वेदनाऽसम्प्रयोगनामा द्वितीयो भेदः २ ।।७।।

**अवचूर्णिः - द्वितीयमाह - तथा**ऽत्यर्थमेव, **शूलशिरोरोगादिवेदनाया वियोगप्रणिधानं** वियोगे दृढाध्यवसाय इति वर्त्तमानग्रहः, **तदसम्प्रयोगचिन्ता** तस्याः-वेदनायाः कथञ्चिदभावे सति असम्प्रयोगचिन्ता, कथं ममाऽनयाऽऽयत्यां सम्प्रयोगो न स्यादिति, चिन्ताध्यानमित्यनागतकालग्रहः, पूर्ववदतीतग्रहोऽपि ज्ञेयः, **तत्प्रतीकारे** वेदनाप्रतीकारे चिकित्साया**माकुलं,** व्यग्रं **मनो** यस्य स तथाविधस्तस्य, वियोगप्रणिधानाद्यार्त्तध्यानम् ।। ७ ।।

**अवचूरिः -** द्वितीयमाह - **तह०** ।। **तथा**ऽत्यर्थमेव **शूलशिरोरोगादिवेदनाया वियोगप्रणिधानं** वियोगे दृढाध्यवसाय इत्यर्थः, अनेन वर्त्तमानकालग्रहः । **तदसंप्रयोगचिन्ता** तस्या वेदनायाः कथंचिदभावे सति असंप्रयोगचिन्ता, कथं ममानया आयत्यां संप्रयोगो न स्यादिति चिन्ताध्यानम् इत्यनागतग्रहः, पूर्ववदतीतमिहापि विज्ञेयः । **तत्प्रतीकारे** वेदनाप्रतीकारे चिकित्साया**माकुलं** व्यग्रं **मानसं** यस्य तथाविधस्तस्य वियोगप्रणिधानाद्यार्त्तध्यानम् ।।७।।

**टीका -** द्वितीयमाह – स्पष्टा । नवरं **'तयसंपओगचिंतणं'** तेषां रोगाणां तत्कालमसम्प्रयोगचिन्तनम्। असम्प्रयोगानुस्मरणं चानागतकालेपि ।। ७ ।।

**इट्ठाणं विसयाईण, वेयणाए य रागरत्तस्स ।**
**अवियोगऽज्झवसाणं, तह संजोगाभिलासो य ।। ८ ।।**

**अर्थलेशः - इट्ठाणं गाथा ।।** यस्य जीवस्य **रागरक्तस्य** रागरञ्जितचित्तस्य **इष्टानां विषयादीनामिष्टाया वेदनाया** सातवेदनरूपाया **अवियोगाध्यवसानम**वियोगचिन्तारूपं स्यात् । **तथा संयोगाभिलाषश्च** स्यात् । एते स्त्र्यादयपदार्था इष्टास्तेषां वियोगो मा भवतु । संयोगस्तु सदास्तु इति चिन्तारूपं तृतीय आर्त्तध्यानभेदः इष्टसंयोगचिन्तानामको ज्ञेयः ।।८।।

**दीपिका - इष्टानां विषयादीनाम्,** आदिशब्दाद्वस्तूनाम्, इष्टाया **वेदनायाश्च** सातवेद्यरूपाया **रागरक्तस्यावियोगाध्यवसानं** दृढोऽभिप्रायः, अनेन वर्त्तमानातीतकालौ गृहीतौ, **तथा** इष्टविषयादीनां सातवेदनायाश्च **संयोगाभिलाषश्च** । अनेनैष्यत्कालग्रहः ।। ८ ।। इष्टसम्प्रयोगनामा तृतीयो भेदः ३।

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

**अवचूर्णिः** - तृतीयमाह - **इष्टानां** मनोज्ञानां विषयादीनामादिशब्दाद्वस्तुग्रहः, तथा **वेदनायाश्चे**ष्टाया **अवियोगाध्यवसानमि**ति वर्त्तमानग्रहः, **तथा** धणियं **संयोगाभिलाषश्चा**यत्यामित्यनागतग्रहः, **रागो**ऽभिष्वङ्गस्तेन **रक्तस्य** जन्तोः ।। ८ ।।

**अवचूरिः** - तृतीयमाह - **इट्टा०** ।। **इष्टानां** मनोज्ञानां **विषयादीनामादि**शब्दाद्वस्तुग्रहः । तथा **वेदनायाश्चे**ष्टाया इति वर्त्तते । **अवियोगाध्यवसानम**विप्रयोगे दृढोऽध्यवसायः । अनेन वर्त्तमानग्रहः **तथे**त्यत्यर्थं **संयोगाभिलाषः** कथं ममैभिर्विषयादिभिरायत्यां सम्बन्ध इतीच्छा इत्यनागतग्रहः **च**शब्दात्प्राग्वदतीतग्रहः । **रागो**ऽभिष्वङ्गस्तेन **रक्तस्य** तद्भावितमूर्त्तेः ।।८।।

**टीका** - तृतीयमाह - **रागरक्तस्य** प्रेमभावितचेतसः। **वेदना** इहेष्टा ज्ञेया ।। ८ ।।

**देविंदचक्कवट्टि-त्तणाइं गुणरिद्धिपत्थणमईयं ।**
**अहमं नियाणचिंतण-मण्णाणाणुगयमच्चंतं ।। ९ ।।**

**अर्थलेशः — देविंद गाथा ।।** यस्य जीवस्य **अधमं निदानचिन्तनं** स्यात्। किं विशिष्टं निदानचिन्तनम्? **देवेन्द्रचक्रवर्तित्वादिप्रार्थनामयम्** । पुनः किं विशिष्टं निदानम् ? **अत्यन्ताज्ञानानुगतम्** अज्ञानत्वेन सहितमित्यर्थः। एष आर्त्तध्यानस्य चतुर्थो भेदो निदानचिन्तानामको ज्ञेयः ।। ९ ।।

**दीपिका - देवेन्द्रादीनां गुणा** रूपादयः, **ऋद्धिर्वि**भूतिस्तत्**प्रार्थनामयम**नेन तपसा देवेन्द्रः स्यामित्यादिरूपं **निदानचिन्तनम्। अज्ञानैरनुगतमा**श्रित**मत्यन्तम्** ।। ९ ।। निदाननामा चतुर्थो भेदः४।

**अवचूर्णिः** - चतुर्थमाह - **देवेन्द्रचक्रवर्त्यादीनां गुणर्द्धयः**, तत्र **गुणाः** सुरूपादयः, **ऋद्धिस्तु** विभूतिः, **तत्प्रार्थनात्मकं तदधमं** जघन्यं **निदानचिन्तनम्**, अहमनेन तपस्त्यागादिना देवेन्द्रः स्यामित्यादिरूपम्, यस्मा**दज्ञानानुगतमत्यन्तम्**, नाज्ञानिनो विहाय सांसारिकसुखेष्वन्येषामभिलाषः ।। ९ ।।

**अवचूरिः** - चतुर्थमाह - **देविं०** ।। **देवेन्द्रचक्रवर्त्यादीनां गुणर्द्धयः** गुणा सुरूपादयः ऋद्धिस्तु विभूति**स्तत्प्रार्थनात्मकम्**, किम् ? **तदधमं** जघन्यं **निदानचिन्तनम**हमनेन तपस्त्यागादिना देवेन्द्रः स्यामित्यादि-रूपम् । यस्मा**दज्ञानानुगतमत्यन्तम्**, 'नो ज्ञानिनो विहाय सांसारिकसुखेष्वन्येषामभिलाषः' ।।९।।

**टीका** - चतुर्थमाह - **देवेन्द्राश्च**मरादयः, **चक्रवर्तिनः** प्रतीताः। आदिशब्दाद्वासुदेवाद्यास्तेषां **गुणा** रूपाद्याः संसारसुखाभिलाषरूपत्वात् । **निदानचिन्तनमत्यन्तमज्ञानानुगतम्**, न हि ज्ञानिनो निदानं कुर्वते ।। ९ ।।

**एयं चउव्विहं, रागद्दोसमोहंकियस्स जीवस्स ।**
**अट्टज्झाणं संसारवद्धणं तिरियगइमूलं ।। १० ।।**

**अर्थलेशः - एयं गाथा । एतत् चतुर्विधमार्त्तध्यानं रागद्वेषमोहाङ्कितस्य जीवस्य** भवति । किं विशिष्टम् आर्त्तध्यानम्? **संसारवर्द्धनं** तथा **तिर्यग्गतिमूलम्** ।।१०।।

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

**दीपिका - चतुर्विधमार्त्तध्यानं रागद्वेषमोहैरङ्कितस्य** लाञ्छितस्य **जीवस्य** ओघतः **संसारवर्द्धनं** विशेषत**स्तिर्यग्गतिमूलम्** ।।१०।।

**अवचूर्णिः - संसारवर्द्धनम**ोघतः, **तिर्यग्गतिमूलं** विशेषतः ।। १० ।।

**अवचूरिः - एअं० ।। एतत्चतुर्विधं रागद्वेषमोहाङ्कितस्य** रागादिलाच्छितस्य **आर्त्तध्यानं संसारवर्द्धनम**ोघतः, **तिर्यग्गतिमूलं** विशेषतः ।।१०।।

**टीका** - तदेतत्कस्य किं फलं च स्यादित्याह - स्पष्टा ।।१०।।

**मज्झत्थस्स उ मुणिणो सकम्मपरिणामजणिमेयंति ।**
**वत्थुस्सभावचिंतणपरस्स समं सहंतस्स ।। ११ ।।**

**दीपिका** - ननु साधोरपि रोगेऽसमाधानं १ चिकित्साकृतौ च तद्वियोगध्यानापत्तेः २ स्तथा तपःसंयमासेवने च संसारदुःखवियोगध्यानाद् ३ आर्त्तध्यानाप्तिः, उच्यते, सा रागादिवशगस्य स्यान्नान्यस्येत्याह - **मध्यस्थस्यैव मुनेस्तुर**वधारणे नान्यस्य, **स्वकर्म्मपरिणामजनितमेतद्दुःखमिति वस्तुस्वभावचिन्तनपरस्य सम्यक् सहतः** कुतोऽसमाधिः? अपि तु धर्म्यं ध्यानमेव ।। ११ ।।

**अवचूर्णिः** - आह - साधोरपि शूलाद्यभिभूतस्याऽसमाधानात्तत्प्रतीकारकरणे च तद्विप्रयोगप्रणिधानापत्तेः, तथा तपःसंयमासेवने च सांसारिकदुःखवियोगप्रणिधानादार्त्तध्यानप्राप्तिः, अत्रोच्यते, रागादिवशवर्त्तिनः स्यादेव, न पुनरन्यस्य इत्याह च- **स्वकर्मपिरणामजनितमेतत्**-शूलादि, **इत्येवं वस्तुस्वभावचिन्तनपरस्य सम्यक्सहमानस्य** सतः कुतोऽसमाधानम्? अपि तु धर्म्यमनिदानम् ।। ११ ।।

**अवचूरिः** - आह- साधोरपि शूलवेदनाद्यभिभूतस्यासमाधानात्तत्प्रतीकारकरणे च तद्विप्रयोगप्रणिधानापत्तेस्तथा तपःसंयमासेवने च नियमतः सांसारिकदुःखवियोगप्रणिधानादार्त्तध्यानप्राप्तिरिति । अत्रोच्यते - रागादिवशवर्त्तिनः स्यादेव, न पुनरन्यस्य । आह च - **मज्झ०** ।। **मध्यस्थस्यैव** नान्यस्य **मुनेः 'स्वकर्मपरिणामजनितमेतत्** शूलादि' इत्येवं **वस्तुस्वभावचिन्तनपरस्य सम्यक्सहमानस्य** सतः कुतोऽसमाधानमपि तु धर्म्यम् ।।११।।

**टीका** - परः - साधोरपि रोगप्रतीकारकरणे तद्वियोगस्य, तपःसंयमासेवने च सांसारिकदुःखवियोगस्य प्रणिधानापत्तेरार्त्तध्यानं स्यादित्यत्रोत्तरमाह- ।। ११ ।।

**कुणओ व पसत्थालंबणस्स पडियारमप्पसावज्जं ।**
**तवसंजमपडियारं च, सेवओ धम्ममणियाणं ।। १२ ।।**

**अर्थलेशः - मज्झत्थ गाथा ।। कुणउ गाथा** ।। अत्र मुनेः चिकित्सां कारयतो धर्म्मफलं स्वर्गादिवाञ्छां कुर्वत आर्त्तध्यानं भवेदिति । शिष्याशङ्कामाशङ्क्याह - **मध्यस्थस्य मुनेः प्रशस्तालम्बनस्य अल्पसावद्यप्रकारं कुर्वतो** धर्मध्यानमेव भवति। अपर**मनिदानं तपःसंयमप्रतीकारं सेवमानस्य**

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

**धर्म्मध्यानमेव भवति** । किं विशिष्टस्य मुनेः ? **एतद्** रागादिकं **स्वकर्म्मपरिणामजनितमि**ति ध्यायन् तथा **वस्तुस्वभावचिन्तनपरस्य** वस्तूनां देहादीनां स्वभावमनित्यतादिकं तस्य चिन्तनं स्मरणं तत्र परस्य तत्परस्य अपरं सम्यक्सहमानस्य ।। ११-१२ ।। एष चतुर्थ आर्त्तध्यानभेदो निदाननामको ज्ञेयः। एवमार्त्तध्यानस्य चत्वारो भेदाः कथिताः ।

**दीपिका** - द्वितीयतृतीयपक्षावाश्रित्याह – **प्रशस्तालम्बनस्य** ज्ञानार्थालम्बनवतोऽ**ल्पसावद्यं प्रतीकारं कुर्वतो** वाऽ**निदानं** धर्म्यध्यानमेवेति सम्बन्धः, सूत्रे उत्सर्गापवादयोरुक्तत्वात्, अन्यथा परलोकस्य साधयितुमशक्यत्वाच्च । तथा **तपःसंयमावेव प्रतीकारौ** भवदुःखानाम्, तं मोक्षे**प्यनिदानं** निदानरहितं यथा भवति **सेवमानस्य धर्म्यमे**व, तथा तत्त्वतो मोक्षेच्छापि निदानमेव परं भावनायामपरिणतं सत्त्वमाश्रित्य व्यवहारात् सा अदुष्टा, अनेनैव प्रकारेण तच्चित्तशुद्धेर्भावात् क्रियायाः प्रवृत्तियोगाच्च ।।१२।।

**अवचूर्णिः - कुर्वतो वा प्रशस्तालम्बनस्य प्रतीकारमल्पसावद्यम्, अल्प**शब्दोऽभाववचनः स्तोकवचनो वा, धर्म्यमनिदानमेव, तथा **तपःसंयमावेव प्रतीकारः** सांसारिकदुःखानामिति गम्यते, तं च **सेवमानस्य धर्म्यं** धर्मध्यानमेव, **अनिदानमि**ति क्रियाविशेषणम्, देवेन्द्रादिनिदानरहितंम् ।। १२।।

**अवचूरिः -** परिहृत आशंकागतः प्रथमपक्षः, द्वितीयतृतीयावधिकृत्याह - **कुण०** ।। **कुर्वतो वा प्रशस्तं** ज्ञानाद्युपकारक**मालम्बनं** यस्य एतस्य प्रशस्तालम्बनस्य **प्रतीकारम्, अल्पसावद्यम**भाववचनः स्तोकवचनो वाऽ**ल्पश**ब्दः । तथा **तपःसंयमावेव प्रतीकारस्त**पःसंयमप्रतीकारः सांसारिकदुःखानामिति गम्यते । तं च **सेवमानस्य च**शब्दात् प्रागुक्तप्रतीकारं च किम् ? **धर्म्यं** धर्मध्यानमेव स्यात् । कथं सेवमान**स्यानिदानमि**ति क्रियाविशेषणं देवेन्द्रादिनिदानरहितमित्यर्थः ।।१२।।

**टीका - कुर्वतो वा प्रशस्तालम्बनस्य** 'काहं अच्छित्तिमि'त्याद्यालम्बनवतः **प्रतीकारं** रोगचिकित्सनम् **अल्पसावद्यम**सावद्यम्, **तपःसंयमरूपं च प्रतीकारं** संसारदुःखानां **सेवतो धर्मं** धर्मध्यानमेव नार्त्तम् **अनिदानं** राज्याद्यनभिलाषत्वात् ।। १२ ।।

**रागो दोसो मोहो य, जेण संसारहेयवो भणिआ ।**
**अट्टंमि य ते तिण्णिवि, तो तं संसारतरुबीयं ।।१३।।**

**अर्थलेशः -** अथार्त्तध्यानवतो लेश्या आह - **रागो गाथा** ।। **येन** कारणेन लेश्याया कारणं **रागो द्वेषो मोहश्च** संसारकारणं **संसारहेतवो भणिताः** । **आर्त्तध्याने ते** रागादयः **त्रयोऽपि** भवन्ति । **ततः** तस्मात् कारणात् **तदार्त्तध्यानं संसारतरुबीजं** स्यात् ।।१३।।

**दीपिका - येन** कारणेन **रागादयः संसारहेतवो भणिताः । ते च त्रयोऽप्यार्त्ते** भवन्ति, **ततस्तदार्त्तं संसारतरुबीजम्** ।।१३।।

**अवचूर्णिः -** आह - कथमार्त्तं संसारवर्द्धनम् ? उच्यते - ।। १३।।

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

**अवचूरिः** - आह - कथमार्त्तं संसारवर्द्धनमुच्यते - **रागो०** ।। **रागो द्वेषो मोहश्च येन संसारहेतव उक्ताः, आर्त्ते च ते त्रयोऽपि** सम्भवन्ति, यत**स्ततस्तत्संसारतरुबीजम्** । आह - यद्येवमोघत एव संसारतरुबीजं ततश्च तिर्यग्गतिमूलमिति किमभिधीयते ? उच्यते, तिर्यग्गतावेव प्रभूतसत्त्वसंभवात् स्थितिबहुत्वाच्च संसारोपचारः ।।१३।।

**टीका** - इदं च संसारबीजमित्याह - स्पष्टा ।। १३ ।।

**कावोयनीलकालालेस्साओ णाइसंकिलिट्ठाओ ।**
**अट्टज्झाणोवगयस्स कम्मपरिणामजणिआओ ।। १४ ।।**

**अर्थलेशः - कावोय गाथा** ।। **आर्त्तध्यानोपगतस्य** जीवस्य १-**कापोत,** २-**नील,** ३-**कृष्ण,** तिस्रो **लेश्या** स्युः। किं विशिष्टा लेश्याः? **नातिसङ्क्लिष्टाः** नात्यन्ताऽशुभपरिणामाः । पुनः किं लक्षणा लेश्याः? **कर्म्मपरिणामजनिताः** ।।१४।।

**दीपिका - कापोतनीलकृष्णलेश्या नातिसंक्लिष्टा** रौद्रध्यानलेश्यापेक्षया **आर्त्तध्यानमुपगतस्य** प्राप्तस्य भवन्ति । तत्र कृष्णादिद्रव्यसाचिव्यजनिता जीवपरिणामा लेश्या उच्यन्ते । ताः स्व**कर्म्मपरिणामजनिताः**। चूर्णौ कषाया अप्यार्त्तध्यानम् ।।१४।।

**अवचूर्णिः** - अथ आर्त्तध्यायिनो लेश्या आह – **नातिसंक्लिष्टाः** रौद्रध्यानलेश्यापेक्षया नात्यशुभानुभावाः स्युः ।।१४।।

**अवचूरिः** - अथार्त्तध्यायिनो लेश्या आह - **कावो०** ।। **कापोतनीलकृष्णलेश्या नातिसंक्लिष्टा** रौद्रध्यानलेश्यापेक्षया नाऽत्यशुभानुभावाः स्युः । **आर्त्तध्यानोपगतस्य कर्मपरिणामजनिताः** ।।१४।।

**टीका** - आर्त्तध्यायिनो लेश्या आह— स्पष्टा ।। १४ ।।

**तस्सऽक्कंदणसोयणपरिदेवणताडणाइं लिंगाइं ।**
**इट्ठाणिट्ठविओगाविओगवियणानिमित्ताइं ।। १५ ।।**

**अर्थलेशः - तस्स गाथा** ।। **तस्यार्त्त**ध्यानस्य एतानि **लिङ्गानि** भवन्ति। एतानि कानि ? **आक्रन्दनं** रोदनम्, **शोचनम्** शोककरणम्, **परिदेवनं** गाढस्वरेण रोदनम्, **ताडनं** हृदयादीनां कुट्टनमित्यादीनि। किं विशिष्टानि लिङ्गानि ? **इष्टवियोग-अनिष्टावियोग**-अनिष्टवस्तुसंयोगरोगा**दिवेदनानिमित्तानि** ।।१५।।

**दीपिका - तस्य** आर्त्तध्यानस्य **लिङ्गानि- १-आक्रन्दन,** २- शोचन, ३- परिदेवन, ४- ताडनादीनि, क्रमात् १-विलाप, २- साश्रुत्व, ३- दैन्यभाषण, ४- शीर्षादिकुट्टनरूपाणि । 'इट्ठा' कोऽर्थः? **इष्टवियोगानिष्टावियोगौ वेदनानिमित्तं** कारणं येषां तानीष्टानिष्टवियोगावियोगवेदनानिमित्तानि ।।१५।।

**अवचूर्णिः** - आर्त्तध्यायिनो लिङ्गान्याह - **तस्यार्त्त**ध्यायिनः **आक्रन्दनं** महता शब्देन रोदनम्,

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

**शोचनं** त्वश्रुपूर्णनयनस्य दैन्यम्, **परिदेवनं** क्लिष्टभाषणम्, **ताडनम्** उरः-शिरःकुट्टनकेशलुञ्चनादि, एतानि **लिङ्गानि** चिह्नानि, अमूनि च **इष्टानिष्टवियोगावियोगवेदनानिमित्तानि** इष्टवियोगनिमित्तानि तथानिष्टावियोगनिमित्तानि वेदनानिमित्तानि च ।। १५ ।।

**अवचूरिः -** आर्त्तध्यायिनो लिङ्गान्याह- **तस्स०** ।। **तस्यार्त्तध्यायिन आक्रन्दनं** महता शब्देन रोदनम्, **शोचनं** चाश्रुपूर्णनयनस्य दैन्यम्, **परिदेवनं** पुनः क्लिष्टभाषणम्, **ताडनमुरः**शिरःकुट्टनकेशलुञ्चनादि एतानि **लिङ्गानि** चिह्नानि, अमूनि च **इष्टानिष्ट-वियोगावियोगवेदनानिमित्तानि** इष्टवियोगनिमित्तानि, अनिष्टावियोगनिमित्तानि वेदनानिमित्तानि च ।।१५।।

**टीका -** आर्त्तध्यानलिङ्गान्याह - **आक्रन्दनं** महता शब्देन रोदनम्, **शोचनं** साश्रुनेत्रस्य दैन्यवचनम्, **परिदेवनं** क्लिष्टभाषणम् ।।१५।।

**निंदइ य नियकयाइं, पसंसइ सविम्हओ विभूईओ ।**
**पत्थेइ तासु रज्जइ, तयज्जणपरायणो होइ ।। १६ ।।**

**अर्थलेशः - निंदइ गाथा** ।। आर्त्तध्यानवान् **निजकृतानि** कार्याणि **निन्दति** । पर**विभूतीर्**दृष्ट्वा **सविस्मयः** सन् मत्सरेण **प्रशंसति** । ताः परविभूतीः **प्रार्थयति** । **तासु** परविभूतिषु **रज्यन्ते** रागं करोति । मम एवंविधा विभूत्यो भवन्त्विति । अपरं **तदर्जनपरायणो भवति** ।।१६।।

**दीपिका - निजकृतान्य**ल्पफलविफलानि कार्याणि **निन्दति, प्रशंसति** स्तौति च **सविस्मयः** पर**विभूतीः**, **प्रार्थयते** च परविभूतीः - परर्द्धी**स्तास्विति** प्राप्तासु ऋद्धिषु **रज्यति । तदर्जने** तस्या ऋद्धेरर्जने **परायण**स्तत्परो भवति ।। १६ ।। १५ भेदा आद्यभेदे, रोगादीनां त्रैकाल्यवियोगचिन्तनेन द्वितीये ३, तृतीये इष्टानां विषयानां सद्वेदनायाश्च त्रिकालेन १८ भेदाः, तूर्ये निदाने ९ भेदाः, एवं सर्वे ४५ ।

**अवचूर्णिः -** किञ्चान्यत्— **निन्दति निजकृतानि** अल्पफलविफलानि कर्मशिल्पकलावाणिज्यादीनि, तथा **प्रशंसति सविस्मयो विभूतीः** परसम्पदः, तथा **प्रार्थयते** परविभूतीः, **तासु** प्राप्तासु, **तदर्जनपरायणः स्यात्** ततश्चैवम्भूतोऽप्यार्त्तध्यायी ।।१६।।

**अवचूरिः -** किञ्चान्यत् - **निंद०** ।। **निन्दति च निजकृतान्या**त्मकृतानि अल्पफलविफलानि कर्मशिल्पकलावाणिज्यादीनि इति गम्यम् । तथा **प्रशंसति सविस्मयो विभूतीः** परसंपदः तथा **प्रार्थयते** परविभूतीः तथा प्राप्तासु **तासु रज्यते** विभूतिषु रागं गच्छति, तथा **तदर्जनपरायणः स्यात्** ततश्च य एवंभूतोऽसौऽप्यार्त्तध्यायी ।।१६।।

**टीका -** किञ्चान्यत्— **निजकृतानि** वाणिज्यादीनि, **विभूतयः** परश्रियः तथा ताः **प्रार्थयते, तासु** प्राप्तासु **रज्यते, तदर्जनपरायणो भवति।** सोऽप्यार्त्तध्यायी ।

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

**सद्दाइविसयगिद्धो, सद्धम्मपरम्मुहो पमायपरो ।**
**जिणमयमणवेक्खंतो, वट्टइ अट्टंमि झाणंमि ।। १७ ।।**

**अर्थलेशः - सद्दाइ गाथा** ।। एवंविधो जीव **आर्त्तध्याने वर्त्तते** । किं लक्षणो जीवः? **शब्दादिपञ्चविषयेषु गृद्ध** आसक्तः, तथा **सद्धर्मपराङ्मुखः**, अपरं **प्रमादपर**जीवः। किं कुर्वन् ? **जिनमतमनवेक्षन्न**विचारयन् ।।१७।।

दीपिका - **शब्दादिविषयगृद्धो** लम्पटः, **सद्धर्म्मो** जिनधर्म्मस्तस्मिन् **पराङ्मुखः प्रमादपरो** जीवो **जिनमतमनपेक्षमाण आर्त्तध्याने वर्त्तते** ।। १७ ।।

**अवचूर्णिः** - किञ्च – **जिनमतम्** आगमरूपम्, त**दनपेक्षमाणः** ।। १७ ।।

**अवचूरिः** - किञ्च – **सद्दा०** ।। **शब्दादिविषयगृद्धः सद्धर्मपराङ्मुखः प्रमादपरो जिनमतमनपेक्षमाणो वर्त्तते आर्त्तध्याने** ।।१७।।

**टीका** - किञ्च – स्पष्टा ।। १७ ।।

**तदविरयदेसविरयापमायपरसंजयाणुगं झाणं ।**
**सव्वप्पमायमूलं, वज्जेयव्वं जइजणेणं ।। १८ ।।**

**अर्थलेशः - तद गाथा** ।। बुधै**स्तदार्त्तध्यानं** प्रयत्नेन **वर्जनीयम्** । किं विशिष्टमार्त्तध्यानम् ? **अविरतदेशविरतप्रमादपरसंयतानुगतम्** । अपरं **सर्वप्रमादमूलम्** ।।१८।। आर्त्तध्यानं समाप्तम् ।

**दीपिका - तदा**र्त्तध्यान**मविरतदेशविरतप्रमादपरसंयतानामनुगं** पृष्ठतो लग्नं विद्यते । न तु अप्रमत्तादीनामाश्रितमित्यर्थः ।। १८ ।। आर्त्तध्यानं समाप्तम्।

**अवचूर्णिः** - आर्त्तध्यानं यदनुगतं यदनर्हं च स्यात्तदाह— **तद्** आर्त्तध्यान**मविरताः** मिथ्यादृष्टयः सम्यग्दृष्टयश्च, **देशविरताः** श्रावकाः, **प्रमादपरसंयता**स्ताननुगच्छतीति, नैवाप्रमत्तसंयतानामिति भावः, **यतिजनेन** श्राद्धजनेन च ।। १८ ।।

**अवचूरिः** - आर्त्त**ध्यानं** यदनुगतं यदनर्हं च स्यात्तदेतदाह - **तद०** ।। **तदार्त्तध्यानमविरता** मिथ्यादृष्टयः सम्यग्दृष्टयश्च, **देशविरताः** श्रावकाः, **प्रमादपराश्च** ते **संयताश्च** प्रमादपरसंयतास्ताननुगच्छती**त्यविरतदेशविरतप्रमादपरसंयतानुगम्** । इदं च स्वरूपतः **सर्वप्रमादमूलं** यतोऽतो **वर्जयितव्यं यतिजनेनो**पलक्षणत्वात् श्रावकजनेन च ।।१८।।

**टीका** - तत्कस्य स्यादित्याह – **तदा**र्त्तध्यानं **वर्जयितव्यं यतिजनेन** उपलक्षणत्वात् श्रावकजनेन च ।। १८ ।।

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

## [अथ रौद्रध्यानम्]

**सत्तवहवेहबंधणडहणंकणमारणाइपणिहाणं ।**
**अइकोहग्गहघत्थं, निग्घिणमणसोऽहमविवागं ।। १९ ।।**

**अर्थलेशः - सत्त गाथा** ।। **निर्घृणमनसो** निर्दयचित्तस्य जीवस्य एवंविधं रौद्रध्यानं स्यात् । किं विशिष्टं रौद्रध्यानम्? **सत्ववधवेधबन्धनदहनाङ्कनमारणादिप्रणिधानं** सत्त्वानां **वधो** विनाशः, **वेधो** नासिकादीनाम्, **बन्धनं** रज्ज्वादिना, **दहनं** तप्तशलाकया, **अङ्कनमङ्क**पातना, **मारणं** दण्डादिना इत्यादिषु परिणामकरणम् । तथा **अतिकोपग्रहग्रस्तं** तथा **अधमविपाकं** रौद्रध्यानस्य प्रथमो भेदो जीववधादिविषयो ज्ञेयः ।।१९।।

**दीपिका** - रौद्रं हिंसानृतास्तेयविषयसंरक्षणानुबन्धिभेदाच्चतुर्धा, क्रमेणाह - **सत्त्वा** जीवास्तेषां **वधादिप्रणिधानम्** । तत्र **वधस्ता**डनम्, **वेधो** नासिकादौ, **बन्धनं** रज्वादिना, **दहनम**ग्निना, **अङ्कनं** लाञ्छनम्, **मारणं** घातः, **आदि**तो गाढपरितापपाटनादि, एषु **प्रणिधानम्** अकुर्वतोऽपि (करणं प्रति) दृढं ध्यानम्, **अतिक्रोधग्रहग्रस्तं** क्रोधादानान्मानादयोऽपि ज्ञेयाः, **निर्घृणमनसो** निर्दयमनसो**ऽधमो विपाको** नरकफलो यस्य। हिंसानुबन्धिनामा प्रथमो भेदः १ ।। १९ ।।

**अवचूर्णिः** - अथ रौद्रं चतुर्धा, १-हिंसानुबन्धि, २-मृषानुबन्धि, ३- स्तेयानुबन्धि, ४- विषयसंरक्षणानुबन्धि च । तत्राद्यमाह - **सत्त्वाः** पञ्चेन्द्रियास्तेषां **वधः** करकशलतादिभिः ताडनम्, **वेधः** आरादिभिः, **बन्धनं** रज्ज्वादिभिः, **दहनमु**ल्मुकादिभिः, **अङ्कनं** लाञ्छनं श्वशृगालचरणादिभिः, **मारणं** प्राणवियोजनमसिशक्त्यादिभिः, **आदि**शब्दादागाढपरितापनादिग्रहः, एतेषु **प्रणिधानम्** अकुर्वतोऽपि करणं प्रति दृढाध्यवसानम्, रौद्रध्यानम्, **अतिक्रोधग्रहस्तम्** अतिक्रोधग्रहणाच्च मानादयोऽपि गृह्यन्ते, **निर्घृणमनसः** सतः, **अधमो** नरकादिप्राप्तिलक्षणो **विपाको** यस्य तत्तथाविधम् ।। १९ ।।

**अवचूरिः** - अथ रौद्रं चतुर्धा हिंसानुबन्धि १, स्तेयानुबन्धि २, मृषानुबन्धि ३, विषयसंरक्षणानु-बन्धि ४ । तत्राद्यमाह- **सत्त०** ।। **सत्त्वा** एकेन्द्रियादयस्तेषां **वधस्ता**डनं करकशलतादिभि**र्वेधो** नासिकादिवेधनमाराधंदिभिः, **बंधनं** रज्जुनिगडादिभिः, **दहनमु**ल्मुकादिभिः, **अङ्कनं** लाञ्छनं श्वशृगालचरणादिभिः, **मारणं** प्राणवियोजनमसिशक्त्यादिभिः, आदिशब्दादागाढपरितापनादिग्रहः । एतेषु **प्रणिधानम**कुर्वतोऽपि करणं प्रति दृढाध्यवसानमित्यर्थः, रौद्रध्यानमिति गम्यम् । **अतीवो**त्कटो यः **क्रोधः** स एवऽपायहेतुत्वाद् **ग्रह** इव ग्रहस्तेन **ग्रस्तम**भिभूतं क्रोधग्रहणान्मानादयोऽपि गृह्यते । कस्य ? **निर्घृणमनसः** सतो**ऽधमो** नरकादिप्रप्तिलक्षणो **विपाकः** परिणामो यस्य तत्तथाविधम् ।।१९।।

**टीका** - उक्तमार्त्तध्यानम्, रौद्रमाह - तदपि चतुर्धा हिंसानृतस्तेयानुबन्धविषयसंरक्षणभेदात् । आद्यभेदमाह - **सत्त्वाः** प्राणिनस्तेषां **वधवेधबन्धनदहनाङ्कनमारणादिप्रणिधानम्,** अतिक्रोधग्रहग्रस्तस्येदम् **अतिक्रोधग्रहग्रस्तं** रौद्रध्यान**मधमविपाकं** नरकप्रदम्, **निर्घृणमनसः** प्रकृत्या निर्दयचेतसः ।। १९ ।।

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

**पिसुणासब्भासबभूयभूयघायाइवयणपणिहाणं ।**
**मायाविणोऽइसंधणपरस्स पच्छन्नपावस्स ।। २० ।।**

**अर्थलेशः - पिसुणा गाथा । मायाविनो** जीवस्य असत्याख्याननामकं द्वितीयं रौद्रध्यानं स्यात्। किं विशिष्टं रौद्रध्यानम्? **पिशुनासभ्यासद्भूतभूतघातादिवचनप्रणिधानं पिशुनं** परदोषवचनम् । **असभ्यं-** दुर्वाक्कथनम्, **असद्भूतं** त्रिधा, **अभूतोद्भावनं** १-यथा सर्वग आत्मा, २-**भूतनिन्हवो** यथा नास्ति आत्मा, **३- विपरीतकथनं** गामऽश्वं वदतः । **भूतघातो** यथा अमुकं जीवं विविधदुष्टवाक्यैः पीडयिष्यामि इत्यादिषु दुष्टवचनपरिणामरूपम् । किं विशिष्टस्य जीवस्य? **अतिसन्धानपरस्य** वञ्चनतत्परस्य, तथा **प्रच्छन्नपापस्य** । रौद्रध्यानस्य द्वितीयो भेदः ।।२०।।

**दीपिका - पिशुनम**निष्टसूचकम् । **असभ्यम**वाच्यम् । **असद्भूतं** व्यवहारात्त्रिधा - अभूतोद्भावनं यथा १- सर्वग आत्मा, २- भूतनिह्नवो - नास्त्यात्मा, ३- अर्थान्तराख्यानं गाम् अश्वमित्यादि वदतः **भूतानां घातो** यत्र तत् छिन्द्धि भिन्द्धीत्यादि वचनं प्रति अप्रवृत्तस्यापि ध्यानम् । **मायाविनो** वणिगादे**रतिसन्धना** वञ्चना तत्**परस्य, प्रच्छन्नपापस्य** कूटप्रयोगकारिणः, यद्वा धिग्जातिककुतीर्थिकादेरन्येषां पुरतोऽगुणमपि स्वं गुणवन्तं वदतः, यतोऽगुणः स्वं गुणित्वं वक्ति स महान् प्रच्छन्नपापः ।। २० ।। मृषानुबन्धिनामा द्वितीयो भेदः २।

**अवचूर्णिः** - द्वितीयमाह— **पिशुनम**निष्टसूचकम् । **असभ्यं** जकारमकारादि । असद्भूतं त्रिधा - अभूतोद्भावनं- १-सर्वगत आत्मेत्यादि, २-भूतनिह्नवो-नास्त्यात्मेत्यादि, ३-गामश्वमित्यादि ब्रुवतोऽर्थान्तराभिधम्, **भूतघातादि** छिन्द्धि भिन्द्धि व्यापादयेत्यादि । तत्र पिशुनादिवचनेष्वप्रवर्त्तमानस्यापि प्रवृत्तिं प्रति **प्रणिधानं** रौद्रध्यानम्, **मायाविनो** वणिजादेः, तथा**ऽतिसन्धानपरस्य** परवञ्चनाप्रवृत्तस्य तथा **प्रच्छन्नपापस्य** कूटप्रयोगकारिणः ।। २० ।।

**अवचूरिः - द्वितीयभेदमाह - पिसु०** ।। अनिष्टस्य सूचकं **पिशुनम्,** सभायां साधु सभ्यं न सभ्य**मसभ्यं** जकारमकारादि, **असद्भूतम**नृतं तच्च त्रिधा - अभूतोद्भावनं सर्वगतोऽयमात्मेत्यादि, भूतनिह्नवो नास्त्येवात्मेत्यादि, गामश्वमित्यादि वदतोऽर्थान्तराभिधानम्, **भूतानां** सत्त्वाना**मुपघातो** यस्मिंस्तद्भूतोपघातं छिन्द्धि भिन्द्धि व्यापादयेत्यादि । **आदि**शब्दः प्रतिभेदं स्वगतानेकभेददर्शनार्थः । तत्र पिशुनादिवचनेष्वप्रवर्त्तमानस्यापि प्रवृत्तिं प्रति **प्रणिधानं** दृढाध्यवसानं रौद्रध्यानमिति गम्यम् । किं विशिष्टमतः **मायाविनो** वणिजादेः तथा **अतिसंधनपरस्य** परवञ्चनाप्रवृत्तस्य तथा **प्रच्छन्नपापस्य** कूटप्रयोगकारिणः ।।२०।।

**टीका** - द्वितीयमाह— **पिशुनम्** अनिष्टसूचकम् । **असभ्यं** प्रतीतम् । **असद्भूतं** त्रिधा- १-अभूतोद्भावनं सर्वग आत्मेत्यादि, २-भूतनिह्नवो - नास्त्यात्मेत्यादि, ३-अर्थान्तराभिधानं - गामश्वं ब्रुवतः, **भूतघातादि**वचनं छिन्द्धि - भिन्द्धीत्यादि । तेषां **प्रणिधानं** रौद्रध्यानं **मायाविनः अतिसन्धनं** वञ्चनं तत्**परस्य** । **प्रच्छन्नपापस्य** कूटप्रयोगकारिणः ।। २० ।।

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

**तह तिव्वकोहलोहाउलस्स भूओवघायणमणज्जं ।**
**परदव्वहरणचित्तं, परलोयावायनिरविक्खं ।। २१ ।।**

**अर्थलेशः - तह गाथा** ।। जीवस्य **परद्रव्यहरणं** प्रति **चित्त**परिणमनं तृतीयो रौद्रध्यानभेदः स्यात्। किं विशिष्टं चित्तपरिणमनम्? **अनार्यं** विरूपम् । किं विशिष्टस्य जीवस्य ? तथा लोकप्रसिद्धप्रकारेण **तीव्रक्रोधलोभाकुलस्य** । किं विशिष्टं चित्तपरिणमनम् ? **भूतोपघातनं** जीवादिविनाशपरिणामरूपम् । तथा **परलोकापायनिरपेक्षं** परलोकनरकादिदुःखचिन्तारहितम्। तृतीयो रौद्रध्यानभेदः ।।२१।।

**दीपिका - भूतानां** जीवानाम**मुपघातनं** क्लेशकारकम् **अनार्यं** पापमयम्, किं तत् ? **परद्रव्यहरणचित्तं परलोकेऽपायः** कष्टं **तन्निरपेक्षम्** ।। २१ ।। स्तेयानुबन्धिनामा तृतीयो भेदः ३।

**अवचूर्णिः** - तृतीयमाह - **तीव्रक्रोधलोभाकुलस्य** जन्तोः, भूतानामुपहननं **भूतोपहननम्, अनार्यम्, परद्रव्यहरणचित्तम्,** रौद्रध्यानम् ।। २१ ।।

**अवचूरिः** - तृतीयमाह - **तह०** ।। **तथा तीव्रक्रोधलोभाकुलस्य** जन्तोरिति गम्यम् । **भूतानामुप** सामीप्येन **हननं** भूतोपहनन**मनार्यं** किं तदेवंविधमित्यत आह - **परेषां द्रव्यं** सचित्तादि तद्विषयं **हरणचित्तं** किंभूतम् ? **परलोकापायनिरपेक्षं** रौद्रध्यानं गम्यम् ।।२१।।

**टीका** - तृतीयमाह – **तथेति** समुच्चये । **परलोकापायो** नरकगत्यादिः ।। २१ ।।

**सद्दादिविसयसाहणधणसंरक्खणपरायणमणिट्ठं ।**
**सव्वाभिसंकणपरोवघायकलुसाउलं चित्तं ।। २२ ।।**

**अर्थलेशः - सद्दादि गाथा** ।। एवंविधं **चित्तं** चतुर्थो रौद्रध्यानभेदः स्यात्। किं विशिष्टं चित्तम् ? **शब्दादिविषयसाधनधनसंरक्षणपरायणं** शब्दादिपञ्चविषयानां **साधनानि** उपकरणानि, यथाक्रमं १- वीणादीनि, २- प्रासादादीनि, ३- कर्पूरादीनि, ४- मोदकादीनि, ५- स्त्र्यादीनि एतेषु, अपरं धनसंरक्षणतत्परम् । तथा **अनिष्टं** विरूपम्, अपरं **सर्वाभिशङ्कनपरोपघातकलुषाकुलं सर्वाभिशङ्कनं** सर्वत्राविश्वासः, **परोपघातः** परस्य विरूपकरणम्, अनेन प्रकारेण **कलुषो** दुष्टपरिणामस्तेन **आकुलं** व्याप्तमेषश्चतुर्थो रौद्रध्यानस्य भेदः ।।२२।।

**दीपिका - शब्दादिविषयानां साधनं** हेतुः, तच्च तद्धनं च तत्**संरक्षणपरायणमनिष्टम् । 'सव्वा०'** न वेद्मि कः किं कर्त्ता, तस्मात्सर्वेषां घातः श्रेयान् इति **सर्वाभिशङ्कनेन परोपघातेन च कलुषाः** कषायास्तै**श्चाकुलं चित्तम्** ।। २२ ।। विषयसंरक्षणनामा चतुर्थो भेदः ४।

**अवचूर्णिः** - चतुर्थमाह - **शब्दादयश्च** ते **विषयाश्च** ते, **साधनं** कारणं तच्च **तद्धनं** च, तत्**संरक्षणे परायणम्,** तथा**ऽनिष्टं** सताम्, **सर्वेषामभिशङ्कनेन** न विद्मः कः किं करिष्यतीत्यादिलक्षणेन, तस्मात्सर्वेषामुपघातः श्रेयानित्येवं **परोपघातेन** च, तथा **कलुषाः** कषायास्तै**राकुलं** व्याप्तं यत्तथा, **चित्तं** तत् रौद्रध्यानम् ।। २२।।

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

**अवचूरिः** - चतुर्थमाह - **सद्दा०** ।। **शब्दादयश्च** ते **विषयाश्च** तेषां **साधनं** कारणं च **तद्धनं** च **तत्संरक्षणे परायणं** तथाऽ**निष्टं** सतामनभिलषणीयम् **सर्वेषामभिशङ्कनेन** न विद्मः कः किं करिष्यतीत्यादिलक्षणेन तस्मात्सर्वेषां यशाशक्त्योपघात एव श्रेयानित्येवं **परोपघातेन कलुषाः** कषायास्तै**श्चाकुलं** व्याप्तं यत्तथा **चित्तं** तद् रौद्रध्यानम् ।।२२।।

**टीका** - चतुर्थमाह— **शब्दादिविषयसाधनं धनसंरक्षणपरायणमनार्यं सर्वेभ्यो** येभ्योऽ**भिशङ्कनं** तेषां **परेषामुपघातो** हननपरिणामस्तेन **कलुषमाकुलं चित्तं** रौद्रध्यानम् ।। २२ ।।

**इय करणकारणाणुमइविसयमणुचिंतणं चउब्भेयं ।**
**अविरयदेसासंजयजणमणसंसेवियमहण्णं ।। २३ ।।**

**एयं चउव्विहं, रागदोसमोहांकियस्स जीवस्स ।**
**रोद्दज्झाणं संसारवद्धणं नरयगइमूलं ।। २४ ।।**

**कावोयनीलकालालेसाओ तिव्वसंकिलिट्ठाओ ।**
**रोद्दज्झाणोवगयस्स, कम्मपरिणामजणियाओ ।।२५।।**

**अर्थलेशः** - **ईय गाथा** ।। **इति अधन्यम**नुत्तमं **चतुर्भेदं** रौद्रध्यानं स्यात् । किं विशिष्टं रौद्रध्यानम्? **करणकारणानुमतिविषयानुचिन्तनम्,** अपर**मविरतदेशविरतजनमनसंसेवितम्** ।।२३।। **रागद्वेषमोहाङ्कितस्य जीवस्य, एतत् रौद्रध्यानं चतुर्विधं संसारवर्धनं नरकगतिमूलं** भवति ।।२४।। **रौद्रध्यानोपगतस्य १-कापोत, २-नील, ३-कृष्णा**ख्यास्तिस्रो **लेश्याः तीव्रसङ्क्लिष्टा** अत्यन्ताशुभपरिणामाः, **कर्म्मपरिणामजनिताः** स्युः ।। २५।।

**दीपिका** - **एवं चतुर्भेदम**नुचिन्तनं **करणादिविषयं** रौद्रम्, **देशाः संयताः** श्राद्धाः। **अधन्यं** पापं **एतद्रौद्रध्यानं चतुर्विधमि**त्यादि प्राग्वत्, **'नरयगइ'** नरकगतिः ।। २३-२४ ।।

**कापोतनीलकृष्णलेश्यास्तीव्रसंक्लिष्टा** अतिसंक्लिष्टाः स्युः ।। २५ ।।

**अवचूर्णिः** - एवं **करणं** स्वयमेव, **कारणमन्यैः**, कृतानुमोदन**मनुमतिरे**ता एव **विषयो** यस्य तत्करणकारणानुमतिविषयम्, **अनुचिन्तनं** पर्यालोचनम्, **चतुर्भेदं** हिंसानुबन्ध्यादि रौद्रध्यानम्, **अविरताः** सम्यग्दृष्टयः , इतरे च **देशसंयताः** श्रावकास्त एव **जनास्तेषां मनांसि** तैः **संसेवितम्, अधन्यम-** श्रेयस्करम् ।। २३ ।।

**तीव्रसङ्क्लिष्टाः** ।। २४-२५।।

**अवचूरिः** - **इय० एवं करणं** स्वयमेव, **कारणमन्यैः**, कृतानुमोदन**मनुमतिरे**ता एव **विषयो** यस्य तत्करणकारणानुमतिविषय**मनुचिन्तनं** पर्यालोचनं हिंसानुबन्ध्यादि **चतुर्भेदं** रौद्रध्यानम् । इदमेव

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

स्वामिद्वारेणाह - **अविरताः** सम्यग्दृष्टयश्च इतरे वा, **देशासंयताः** श्रावकास्ते एव **जनास्तेषां मनांसि** तैः **संसेवितमधन्यम**श्रेयस्करम् ।।२३।।

**एयं०** ।। **कावो०** ।। **तीव्रसंक्लिष्टा** अतिसंक्लिष्टाः ।।२४-२५।।

**टीका** - इदमुपसंहरन्नाह - तथा स्पष्टे ।। २३-२४ ।।

रौद्रध्यानिनो लेश्या आह - स्पष्टा ।। २५ ।।

**लिङ्गाइं तस्स उस्सण्णबहुलनाणाविहामरणदोसा ।**
**तेसिं चिय हिंसाइसु, बाहिरकरणोवउत्तस्स ।। २६।।**

**अर्थलेशः - लिंगाइं गाथा** ।। **तस्य** रौद्रध्यानस्य चत्वारि **लिङ्गानि** स्युः। कानि ? **१-उत्सन्नदोषः** उत्सन्नं प्रायः प्रतिदिवसम् एतानि सत्ववधादीनि चिन्तयति । तदा **२-बहुलानि** कदाचित् द्वे, कदाचित् त्रीणि, कदाचित् चत्वार्यपि चिन्तयति । **३-नानाविधदोषि** नानाप्रकारै अमुकं जीवममुकप्रकारेण वधेन बन्धादिना ताडयिष्यामि इति चिन्तयति । **४-आमरणदोषो** यावज्जीवो मरणकालेऽपि रौद्रध्यानं न मुञ्चति । **तेषु च हिंसादिषु** मनसा चिन्तितस्य **बाह्यकरणोऽपयुक्तस्य** - बाह्यजीववधादिकरणतत्परस्य एतद् रौद्रध्यानं स्यात् ।।२६।।

**दीपिका - दोष**शब्दः प्रत्येकं सम्बध्यते । १-उत्सन्नदोषः, २-बहुलदोषः ३-नानाविधदोषः, ४- आमरणदोषः । तत्र १-उत्सन्नमनुपरतं हिंसादीनामन्यतरस्मिन् दोषे प्रवर्त्तते **इत्युत्सन्नदोषः** । २- सर्वेष्वप्येवं प्रवर्त्तते इति **बहुलदोषः** । ३-नानाविधेषु त्वक्तक्षणाक्ष्युत्खननादिहिंसाद्युपायेषु असकृदप्येवं प्रवर्त्तते **नानाविधदोषः** । ४-महदापद्गतोऽपि स्वतो महदापद्गतेऽपि चान्यस्मिन्नामरणं पश्चातापं नाधत्ते स **आमरणदोषः** । एते दोषा**स्तस्य** रौद्रध्यायिनो **लिङ्गानि,** किम्भूतस्य **तेष्वेव हिंसादिषु** आदिशब्दान्मृषावादादिषु **बाह्यकरणाभ्यां** वाक्कायाभ्या**मुपयुक्तस्य** प्रवृत्तस्य ।। २६।।

**अवचूर्णिः - तस्य** रौद्रध्यायिनः, **दोष**शब्दः प्रत्येकं योज्यः, ततो हिंसानुबन्ध्यादीनामन्यतरस्मिन् प्रवर्त्तमान उत्सन्नमनुपरतं बाहुल्येन प्रवर्त्तत **इत्युत्सन्नदोषः,** सर्वेष्वपि चैवं प्रवर्त्तत इति **बहुलदोषः,** नानाविधेषु त्वक्तक्षणनयनोत्खननादिषु हिंसाद्युपायेषु असकृदप्येवं प्रवर्त्तत इति **नानाविधः** दोषः, महदापद्गतो[ऽपि स्वतः महादापद्गते]ऽपि च परे आमरणादसञ्जातानुताप **इत्यामरणदोषः, तेष्वेव हिंसादिषु** हिंसानुबन्ध्यादिषु **बाह्यकरणोपयुक्त**स्य सत उत्सन्नादिदोषलिङ्गानि, बाह्यकरणशब्देनेह वाक्कायौ गृह्येते, ततश्च ताभ्यामपि तीव्रमुपयुक्तस्य ।। २६ ।।

**अवचूरिः - लिंगा०** ।। **लिङ्गानि** चिह्नानि **तस्य** रौद्रध्यायिनः **उत्सन्न-बहुल-नानाविधा-मरणदोषा** इत्यत्र **दोष**शब्दः प्रत्येकं संबध्यते । तत्र हिंसानुबन्ध्यादीनामन्यतरस्मिन् वर्त्तमान उत्सन्नमनुपरतं बाहुल्येन प्रवर्त्तते **इत्युत्सन्नदोषः** । सर्वेष्वपि चैवमेव प्रवर्त्तत इति **बहुलदोषः** । नानाविधेषु त्वक्तक्षण-

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

नयनोत्खननादिषु हिंसाद्युपायेष्वसकृदेवं प्रवर्त्तत इति **नानाविधदोषः** । महापद्गतोऽपि स्वतः महापद्गतेऽपि च परे आमरणादसंजातानुतापः कालसौकरिकादिवद् अपि तु असमाप्तानुतापानुशयपर **इत्यामरणदोषः** । **तेष्वेव** हिंसानुबन्ध्यादिषु **बाह्यकरणोपयुक्तस्य** सत उत्सन्नादिदोषा लिङ्गानि । **बाह्यकरण**शब्देनेह वाक्कायौ गृह्येते ततश्च ताभ्यामपि तीव्रमुपयुक्तस्य ।।२६।।

**टीका** - अथ तल्लिङ्गान्याह– **उत्सन्नबहुलनानाविधामरणदोषा दोष**शब्दः प्रत्येकं योज्यः। **उत्सन्नदोषः** उत्सन्नमनुपरतं हिंसादौ प्रवृत्तेः। **बहुलदोषो** बहुलं प्राचुर्येण पुनः पुनः तत्र प्रवृत्तेः । **नानाविधदोषो** नानाविधेषु त्वक्तक्षणनयनोत्खननादिषु हिंसाद्युपायेष्वसकृत् प्रवृत्तेः। **आमरणदोषो** हिंसादिषु कृतेष्वामरणादपि नानुतापो यस्य कालसौकरिकस्येव स तथा । **तेष्वेव हिंसादिषु बाह्यकरणोपयुक्तस्य** वाक्काययोगाभ्यां प्रसक्तस्य ।।२६।।

**परवसणं अभिनंदइ, निरविक्खो निद्दओ निरणुतावो ।**
**हरिसिज्जइ कयपावो, रोद्दज्झाणोवगयचित्तो ।।२७।।**

**अर्थलेशः - परवसणं गाथा** ।। **रौद्रध्यानोपगतचित्तो** जीवः **परव्यसनं** परकष्टम् **अभिनन्दति** स्तौति, **निरपेक्षः** स्यात् कस्यापि चिन्तां न करोतीत्यर्थः, तदा[था] **निर्दयः** स्यात्, अपरं **निरनुतापः** स्यात्-पापं कृत्वा पश्चात्तापं न करोतीत्यर्थः, अपरं **कृतपापः** सन् **हृष्यति** ।।२७।। ।। रौद्रध्यानं समाप्तम् ।।

**दीपिका - परस्य व्यसनं** कष्टम् **अभिनन्दति** प्रशंसति, परव्यसने **निरपेक्षः, निर्दयः, निरनुतापः** पश्चातापरहितः, **कृतपापो हृष्यति** ।। २७।। रौद्रध्याने प्रथमभेदे १-वध २-वेध ३-बन्धन ४-दहन ५-अङ्कन ६-मारणानि ६ । द्वितीये १ पिशुन २ असभ्य ३ असद्भूत ४ भूतघाताः । तृतीये तुर्ये एकैको भेदः, एवं १२, करणादित्रिगुणिताः ३६, ते चतुःकषायैः १४४, एते रागद्वेषमोहैः ४३२, एते कालत्रयेण गुणिताः १२९६ । उक्तं रौद्रम् ।

**अवचूर्णिः** - किञ्च– **अभिनन्दति** बहुमन्यते, तथा **निरपेक्षः** इहान्यभविकापायरहितः ।। २७ ।।

**अवचूरिः - पर०** ।। **परस्य व्यसनमा**पत् तत् **अभिनन्दति** बहुमन्यते, तथा **निरपेक्ष** इहान्यभविकापायभयरहितः, **निर्दयः, निरनुतापः, तुष्यति कृतपापः** सन् अमूनि च लिङ्गानि ।।२७।।

**टीका** - किञ्च– स्वयं **कृतपापो हृष्यति** सिंहमारकवत् । उक्तं रौद्रध्यानम् ।। २७ ।।

## [अथ धर्मध्यानम्]

**झाणस्स भावणाओ, देसं कालं तहाऽऽसणविसेसं ।**
**आलंबणं कमं झाइयव्वयं जे य झायारो ।।२८।।**

**तत्तोऽणुप्पेहाओ, लेस्सा लिंगं फलं च नाऊणं ।**
**धम्मं झाइज्ज मुणी, तक्कयजोगो तओ सुक्कं ।।२९।।**

**अर्थलेशः - झाणस्स गाथा ।। तत्तो गाथा ।। मुनिः** एतस्य धर्म्मध्या**नस्य** एतानि द्वाराणि **ज्ञात्वा धर्म्मध्यानं ध्यायेत्।** एतानि कानि ? **१-भावना २-देशं ३-कालं ४-तथा आसनविशेषम् ५-आलम्बनं** ६-च अन्यत् **क्रमं ७-ध्यातव्यं ८-ये च ध्यातारः ९-ततो अनुप्रेक्षा १०-लेश्या ११-लिङ्गम्** १२-अन्य**त्फलं ततो** अनन्तरं-धर्म्मध्यानानन्तरं **तत्कृतयोगः** तेन धर्म्मध्यानेन कृतो योगो मुनिः **शुक्लं** ध्यानं ध्यायति ।।२८-२९।।

**दीपिका -** अथ धर्मध्यानस्य द्वारगाथे— १ **ध्यानस्य भावनाः** २ **देशं** ३ **कालम्** ४ **आसनम्** ५ **आलम्बनं** ६ **क्रमं** ७ तथा **ध्यातव्यं** ८ **ये च ध्यातारः** ९ **ततोऽनुप्रेक्षा** ध्यानोपरमादनुभाविन्योऽनित्यत्वाद्यालोचनारूपाः १० **लेश्याः** ११ **लिङ्गं** १२ **फलं** १३ **च ज्ञात्वा मुनिर्धर्म्मं ध्यायेत् । 'तक०' तत्कृतयोगो** धर्म्मध्यानकृताभ्यास**स्ततः शुक्लध्यानं** ध्यायेत ।।२८-२९।।

**अवचूर्णिः -** अथ धर्मध्यानाभिधित्सया द्वारगाथाद्वयमाह— **भावना** ज्ञानाद्या **ज्ञात्वे**ति योगः, **आलम्बनं** वाचनादि, **क्रमं** मनोनिरोधादि, **ध्यातव्यमाज्ञादि** ।।२८।। **अनुप्रेक्षा** ध्यानोपरमकालभाविन्योऽनित्यत्वाद्यालोचनरूपाः, **तत्कृतयोगः** धर्मध्यानकृताभ्यासः ।।२९।।

**अवचूरिः -** अथ धर्मध्यानाभिधित्सयादौ द्वारगाथाद्वयमाह - **झाण० ।। तत्तो० ।। ध्यानस्य भावना** ज्ञानाद्याः १, **देशं** तदुचित्तम् २, **कालम्** ३, **आसनविशेषम्** ४, **आलम्बनं** वाचनादि ५, **क्रमं** मनोनिरोधादि ६, **ध्यातव्यं** ध्येयम्, ७, **ये च ध्यातारोऽ**प्रमादादियुक्ताः ८ ।। **ततोऽनुप्रेक्षा** ध्यानोपरमकालभाविन्योऽनित्यत्वाद्यालोचनारूपाः ९, **लेश्या** १०, लिङ्गम् ११, **फलं** १२, **ज्ञात्वा धर्मध्यानं ध्यायेन्मुनिः । तत्कृतयोगो** धर्मध्यानकृताभ्यास**स्ततः** पश्चात् **शुक्लं** शुक्लध्यानं ध्यायेत् ।।२८-२९।।

**टीका -** अथ धर्मध्यानम्, तत्रादौ द्वारगाथाद्वयमाह— **ध्यानस्य भावना** ज्ञानाद्याः। **देशं कालं तथाऽऽसनविशेषं** ध्यानोचितम्, **आलम्बनं** वाचनादि, **क्रमं** मनोनिरोधादि, **ध्यातव्यमा**ऽऽज्ञादि, **ये च ध्यातारो**ऽप्रमत्ताः, **ततोऽनुप्रेक्षा** ध्यानकालेऽनित्यत्वाद्यालोचनरूपा, **लेश्याः** शुद्धाः, **लिङ्गं** श्रद्धानादि, **फलं** स्वर्गादि, एत**ज्ज्ञात्वा धर्म**ध्यानं **ध्यायेन्मुनिः। तत्कृतयोगो** धर्मध्यानकृताभ्यासः **ततः शुक्लम्** ।। २८-२९।।

**पुव्वकयब्भासो भा-वणाहिं झाणस्स जोग्गयमुवेइ ।**
**ताओ य नाण-दंसण-चरित्त-वेरग्गजणिया[नियता]ओ ।। ३०।।**

**अर्थलेशः - पुव्व गाथा** ।। जीवः **पूर्वं भावनाभिः कृताभ्यासो ध्यानस्य योग्यतामुपैति । ताश्च** भावनाः १-**ज्ञान** २-**दर्शन** ३-**चारित्र** ४-**वैराग्याः** । एतैश्चतुर्भिः प्रकारैः **जनिता** भवन्ति ।।३०।।

**दीपिका -** ध्याना**त्पूर्वं भावनाभिः कृताभ्यासो ध्यानस्य योग्यतामुपैति । ताश्च ज्ञान-दर्शन-चारित्र-वैराग्यजनिताः** ।।३०।। तद्यथा–

**अवचूर्णिः - पूर्वं** ध्यानात् **कृतोऽभ्यासः** आसेवनालक्षणो येन स तथाविधः, **भावनाभिः** ।।३०।।

**अवचूरिः** - आद्यद्वारमाह - **पुव्व०** ।। **पूर्वं** ध्यानात्प्रथमं **कृतोऽभ्यास** आसेवनारूपो येन स तथा काभि**र्भावनाभिः** करणभूताभिः **ध्यानस्य** धर्मस्य **योग्यतामुपैति । ताश्च** भावना **ज्ञानदर्शनचारित्रवैराग्यनियताः** परिच्छिन्नाः ।।३०।।

**टीका** - आद्यद्वारमाह— स्पष्टा ।।३०।।

**णाणे णिच्चब्भासो, कुणइ मणोधारणं विसुद्धिं च ।**
**नाणगुणमुणियसारो झाइ सुनिच्चलमईओ ।।३१।।**

**अर्थलेशः - नाणे गाथा** ।। **ज्ञाने नित्याभ्यासः** क्रियमाणो **मनोधारणां** मनःस्थिरताम् अन्यच्च **विशुध्यं** मनसः शुध्यं **करोति** । ततोऽनन्तरं **ज्ञानगुणज्ञातसारः सुनिश्चलमतिः** धर्म्मध्यानं **ध्यायति** ।।३१।।

**दीपिका - ज्ञाने** श्रुतज्ञाने **नित्याभ्यासो**ऽशुभचिन्तारोधेन, **मनोधारणं विशुद्धिं च** सूत्रार्थयोः **कुरुते** एव । **ज्ञानेन गुणानां** जीवाजीवाश्रितानां चेतनादीनां पर्यायाणां च क्रमभाविनां **ज्ञातसारस्**तत्त्वं नित्यानित्यादिरूपं येन स तादृक्, ततः **सुनिश्चलमतिर्ध्यायति** ।। ३१ ।। १-ज्ञानभावना

**अवचूर्णिः - ज्ञाने** श्रुतज्ञाने, **नित्यं** सदा, **अभ्यासः** आसेवनालक्षणः, **करोति मनसो धारणम्** अशुभव्यापारनिरोधेनावस्थानम्, तथा **विशुद्धिं च** सूत्रार्थयोः, **चशब्दा**द्भवनिर्वेदं च, एवं **ज्ञानगुणेन** ज्ञानमाहात्म्येन **ज्ञातः सारो** विश्वस्य येन स तथाविधः, **सुनिश्चला** सम्यग्ज्ञानतोऽन्यथाप्रवृत्तिकम्परहिता **मतिर्यस्य** स तथाविधः ।।३१।।

**अवचूरिः** - ज्ञानभावनामाह - **नाणे०** ।। ज्ञाने श्रुतज्ञाने **नित्यं** सदा **अभ्यास** आसेवनालक्षणः **करोति। मनसो धारणम**शुभव्यापारनिरोधेनाऽवस्थानं तथा **विशुद्धिं च** विशोधनं सूत्रार्थयोरिति गम्यम् । **चशब्दा**द्भवनिर्वेदं च । एवं **ज्ञानगुणेन** ज्ञानमाहात्म्येन **ज्ञातः सारो** विश्वासेन स तथाविधः । ततश्च पश्चाद् **ध्यायति सुनिश्चला** सम्यग्ज्ञानतोऽन्यथाप्रवृत्तिकम्परहिता **मतिर्यस्य** स तथाविधः सन् ।।३१।।

**टीका** - ज्ञानभावनामाह— **ज्ञाने** श्रुतज्ञाने **कृताभ्यासः करोति मनसो धारणम्** अशुभव्यापारनिरोधेनावस्थानम् । **विशुद्धिं च** सूत्रार्थयोः। **ज्ञानगुणेन ज्ञातः सारो** विश्वस्य येन स तथा। ततो **ध्यायति सुनिश्चलमतिकः** ।। ३१ ।।

**संकाइदोसरहिओ, पसमथेज्जाइगुणगणोवेओ ।**
**होइ असंमूढमणो, दंसणसुद्धीए झाणंमि ।।३२।।**

**अर्थलेशः - संकाइ गाथा** ।। जीवो **दर्शनशुद्ध्या** धर्म्मध्याने **असम्मूढमना** अमोहितमना **भवति।** किं लक्षणो जीवः? **शङ्कादिदोषरहितः** तथा **प्रशमस्थैर्यादिगुणगणोपेतः** ।। ३२।।

**दीपिका** - प्रश्रमः स्वान्यशास्त्रे **प्रशमो** वा तेन **स्थैर्यादिगुणगणैश्चोपेतो दर्शनशुद्ध्या ध्यानेऽसम्मूढमना भवति** ।। ३२ ।। २ - दर्शनभावना

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

**अवचूर्णिः - प्रशमादिना स्थैर्यादिना** च **गुणगणेनोपेतः** प्रशमस्थैर्यादिगुणोपेतः, इत्थम्भूतः स्या**दसम्मूढमनास्त**त्त्वान्तरेऽभ्रान्तचितः ।। ३२।।

**अवचूरिः -** दर्शनभावनामाह - **संका०** ।। **शङ्कादिदोषरहितः** प्रकर्षेण श्रमः **प्रश्रमः** खेदः स्वपरसमयतत्वाधिगमरूपः । **स्थैर्यं** जिनशासने निःकम्पता **आदि**शब्दात् प्रभावनादिग्रहः प्रश्रमस्थैर्यादय एव **गुणगणास्तेनोपेता**ऽथवा प्रशमादिना स्थैर्यादिना च गुणगणेनोपेतः । इत्थंभूतः स स्या**दसंमूढमना** तत्त्वान्तरेऽसंभ्रान्तचित्तो **दर्शनशुद्ध्यो**क्तया क्व ? **ध्याने** ।।३२।।

**टीका -** दर्शनभावनामाह - **प्रशमादिः** प्रशमसंवेगनिर्वेदानुकम्पाऽऽस्तिक्यरूपः, **स्थैर्यं** जिनशासने निश्चलत्वं **तदादिर्गुणगणस्तेनोपेतः, दर्शनशुद्ध्या ध्यानेऽसम्मूढमना भवति** ।। ३२।।

**नव्वकम्माणायाणं, पोराणविणिज्जरं सुभायाणं ।**
**चारित्तभावणाए, झाणमयत्तेण य समेइ ।। ३३।।**

**अर्थलेशः - नव गाथा** ।। **चारित्रभावनया नवकर्म्मानादानं** नवकर्म्मणामग्रहणं स्यात् । **पुरातनानां** भवान्तरसञ्चितानां कर्म्मणां **निर्जरणं** क्षपणं स्यात् । **शुभानां** कर्म्मणाम् **आदानं** ग्रहणं स्यात्। अपरं धर्म्म**ध्यानमयत्नेन** उपक्रमं विनापि **उपैति** ।।३३।।

**दीपिका - चारित्रभावनया नवकर्म्मणामनादानम**ग्रहणम्, **पुराणानां विनिर्जरं** क्षपणम्, **शुभानि** पुण्यकर्म्माणि सातवेद्यादीनि तेषा**मादानं** ग्रहणम्, तथा **अयत्नेन ध्यानं समेति** लभते।।२३।। ३ चारित्रभावना

**अवचूर्णिः - चारित्रभावनया** सर्वसावद्ययोगनिवृत्तिरूपक्रियाभ्यासेन, **ध्यानं नवकर्मानादानादि चायत्नेन समेति** प्राप्नोति ।।३३।।

**अवचूरिः -** चारित्रभावनामाह - **नव०** ।। **नवकर्मानादानम्, पुराणविनिर्जरां** चिरन्तनक्षपणाम्, **शुभं** सातसम्यक्त्वादि **तस्यादानं चारित्रभावनया** सर्वसावद्ययोगनिवृत्तिरूपक्रियाभ्यासेन **ध्यानं** चशब्दान्नवकर्मानादानादि **चायत्नेन समेति** प्राप्नोति ।।३३।।

**टीका** - चारित्रभावनामाह - **नवानां कर्मणामनादानं** यस्मात् तत् तथा **पुराणविनिर्जरम्, शुभानां** पुण्यशातादीनां **चादानम्, चारित्रभावनया ध्यानमयत्नेन समेति** प्राप्नोतीत्यर्थः ।।३३।।

**सुविदियजगस्सभावो, निस्संगो निब्भओ निरासो य ।**
**वेरग्गभावियमणो, झाणंमि सुनिच्चलो होइ ।।३४।।**

**अर्थलेशः - सुवि गाथा** ।। जीवो **वैराग्यभावितमनाः ध्याने सुनिश्चलो भवति** । किं विशिष्टो

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

जीवः? **सुविदितजगत्स्वभावः** सुज्ञातजगत्स्वरूपः, अपरं **निस्सङ्गः** स्नेहरहितः, अपरं **निर्भयः** तथा **निरासः** तृष्णारहितः ।।३४।।

**दीपिका - सुष्ठु विदितो** ज्ञातो **जगत्स्वभावो**ऽनित्यतादिरूपो येन, **निःसङ्गो** नीरागः **निराशो**ऽतृष्णः, **चशब्दा**दक्रोधादिः, य एवंविधो **वैराग्यभावितमना** भवति स खल्वज्ञानाद्युपद्रवरहितत्वाद् **ध्याने सुनिश्चलो भवती**ति गाथार्थः ।।३४।। ४-वैराग्यभावना

**अवचूर्णिः - निराशंसश्च** इहपरलोकाशामुक्तः, **चशब्दा**त्क्रोधादिरहितश्च ।।३४।।

**अवचूरिः** - वैराग्यभावनामाह - **सुवि०** ।। **सुविदितजगत्स्वभावः, निःसंगः, निर्भयो निराशश्चे**हपरलोकाशाविमुक्तः **चशब्दात्** क्रोधादिरहितश्च य एवं **वैराग्यभाविनमना** स **ध्याने सुनिश्चलः स्यात्** ।।३४।।

**टीका** - वैराग्यभावनामाह - **निस्सङ्गो** विषयस्नेहरहितः, **निर्भयः** सप्तभयवर्जितः, **निराशः** इहपरलोकाशाविमुक्तः, शेषं स्पष्टम् । उक्ता भावनाः ।।३४।।

**निच्चं चिय जुवइपसूनपुंसगकुसीलवज्जियं जइणो ।**
**ठाणं वियणं भणियं, विसेसओ झाणकालंमि ।।३५।।**

**अर्थलेशः** - भावनाद्वारं व्याख्यातम्, देशद्वारमाह – **निच्चं गाथा** ।। **यतेः** साधो**र्नित्यमपि युवतिपशुनपुंसककुशीलवर्ज्जितं स्थानं भणितं** भवति । किं विशिष्टं स्थानम् ? **विजनं** लोकरहितं **ध्यानकाले विशेषतः** । एवंविधं स्थानं भणितम् ।।३५।।

जूईय-रसोल-मेंठा वट्टा उब्भामगादिणो जे य ।
एए होंति कुसीला वज्जेयव्वा पयत्तेणं ।।३६।।

**जूइय गाथा** ।। **एते कुशीला भवन्ति** । साधुना एते **यत्नेन परिवर्जयितव्याः** । एते के? **द्यूती** द्यूतकारो युवतिर्वा । **रसोला** राज्ञो रसवतीकाराः, तत्र मांसादिसंस्कारादेते कुशीलाः। **मिंठा** हस्तिपालाः, **चट्टा** लेखशालिका ते हास्यशीला अतः कुशीलाः । **उद्भ्रामकाः** तालाकुट्टनकारिणः यद्वा नटविटाः इत्यादयो ये धर्म्मरहितास्ते कुशीलाः स्युः ।।३६।।

**दीपिका** - अथ देशद्वारम् - **यतेर्नित्यमपि युवत्यादिवर्जितं विजनं स्थानं भणितम्, विशेषतो ध्यानकाले** । तत्र **कुशीला** द्यूतिमुख्याः, उक्तं च,

'जूइयरसोलमिंठा, चट्टा उब्भामगाइणो जे य । एए हुंति कुसीला, वज्जेयव्वा पयत्तेणं'।१।

द्यूतिनो - द्यूतकाराः, रसोलाः - स्थानपाला आरक्षकाद्याः, रसोलाः - कल्पपाला वा , मिंठा -

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

अश्वेभाद्युपासकाः। चट्टाश्छात्रदासादयः। उद्भ्रामकाः - स्वैरिणः, आदिशब्दाद् याचकादयश्च, एते कुशीला उच्यन्ते । एतदवशीकृतयोगानां स्थानम् ।। ३५ ।।

**अवचूर्णिः -** देश[द्वार]माह– **नित्यमेव,** न केवलं ध्यानकाले, **कुशीलाः** द्यूतकारादयः, **स्थानं** युवत्यादिव्यतिरिक्तशेषजनापेक्षया विगतजनं **विजनम्** ।।३५।।

**अवचूरिः -** मूलद्वारं गतम्, देशमाह - **निच्चं०** ।। **नित्यमेव** न केवलं ध्यानकाले **युवति-पशुनपुंसककुशीलपरिवर्ज्जितं** कुशीला द्यूतकारादयो **यतेः** साधोः **स्थानं** युवत्यादिव्यतिरिक्तशेषजनापेक्षया विगतजनं **विजनं भणितम**र्हद्भिः । इदमेवंभूतं नित्यमेव **विशेषतो ध्यानकाले** परिणतो योगादिनाऽन्यत्र ध्यानस्याराधयितुमशक्यत्वात् ।।३५।।

**टीका** - देशद्वारमाह– स्पष्टा ।। ३५।।

**थिरकयजोगाणं पुण मुणीण झाणे सुनिच्चलमणाणं ।**
**गामंमि जणाइण्णे, सुण्णे रण्णे व ण विसेसो ।।३६।।**

**अर्थलेशः - थिर गाथा** ।। **पुनर्मुनीनां ध्याने सुनिश्चलमनसां जनाकीर्णे** लोकव्याकुले **ग्रामे शून्यगृहे** वा **अरण्ये वा** शून्यवनमध्ये **विशेषो न** भवति। किं विशिष्टानां मुनीनाम्? **स्थिरकृतयोगानां** निश्चलीकृतमनोवाक्कायव्यापाराणाम् ।।३७।।

**दीपिका - स्थिराः** संहननधृतिभ्याम्, तथा **कृता योगा** ज्ञानादिभावनादिव्यापाराः सत्त्वसूत्रतपोमुख्या वा यैस्ते अभ्यस्तयोगा इत्यर्थः । स्थिराश्च ते कृतयोगाश्च तेषाम्, **मुनीनां ध्याने, सुष्ठु निश्चलमनसाम्, जनैराकीर्णे** पूर्णे **ग्रामे शून्येऽरण्ये वा न विशेषः** ।। ३६ ।।

**अवचूर्णिः - स्थिराः** संहननधृतिभ्यां बलवन्तः, **कृताः** अभ्यस्ताः **योगाः** ज्ञानादिभावनादिव्यापारा यैस्ते स्थिरकृतयोगास्तेषां, **ग्रामे जनाकीर्णे शून्येऽरण्ये वा** ।। ३६ ।।

**अवचूरिः -** इत्थमपरिणतयोगादीनामुक्तमथ परिणतयोगादीनधिकृत्य विशेषमाह – **थिर०** ।। **स्थिराः** संहनन-मनोधृतिभ्यां बलवन्तः **कृता** अभ्यस्ता **योगा** ज्ञानादिभावनाव्यापाराः स च सूत्रतपप्रभृतयो यैस्ते तथा स्थिराश्च ते योगाश्च तेषां **मुनीनां ध्याने** धर्मध्याने **सुनिश्चलमनसां** स्थानं प्रति **ग्रामे जनाकीर्णे शून्येऽरण्ये वा न विशेषः** ।।३६।।

**टीका -** इदमकृतध्यानाभ्यासानां स्थानमुक्तम्, कृताभ्यासानां त्वाह - **स्थिरा** धृतिसंहननाभ्यां बलवन्तः **कृतयोगाः** स्वभ्यस्तज्ञानादिभावनाव्यापारास्तेषां **मुनीनां ध्याने सुनिश्चलमतीनाम्** ।। ३६।।

**तो जत्थ समाहाणं, होज्ज मणोवयणकायजोगाणं ।**
**भूओवरोहरहिओ, सो देसो झायमाणस्स ।। ३७ ।।**

Jain Education International 2010_02  For Private & Personal Use Only  www.jainelibrary.org

**अर्थलेशः - तो जत्थ गाथा ।। ततः** कारणाद् **यत्र** स्थाने **मनोवाक्काययोगानां समाधानं** समाध्यानं- समाधिप्रापणं **भवेत्** । **ध्यानकर्तुः स देशः** स्थानकविशेषो योग्यो भवति । किं लक्षणो देशः? **भूतोपरोधरहितः भूतानि** पृथ्व्यादयो जीवास्ते**षामुपरोधो** विनाशस्तेन रहित इत्यर्थः ।।३८।।

**दीपिका - यत्र** देशे **मनोवचनकाययोगानां समाधानं** स्वास्थ्यं **भवेत्** । ननु मनःसमाधिरस्तु, वाक्कायसमाधिभ्यां तु किम्? तन्मयध्यानाभावात्, उच्यते, तयोः समाधिर्मनोयोगोपकारीति ध्यानं तदात्मकं स्यादेव, यथेदृग्वाग् वाच्येति ध्यात्वा वक्तुर्वाचिकं ध्यानम्, संलीनाङ्गस्याऽस्याऽयतनात्यागः कायिकम्। तथा यो **भूतानामुपरोधः** संघट्टनादिस्तद्रहितश्च, यथा **स देशो ध्यायत** उचितः ।।३७।।

**अवचूर्णिः -** आह– वाक्काययोगसमाधानमत्र क्वोपयुज्यते? उच्यते, तत्समाधानं मनोयोगोपकारकम्, ध्यानमपि तदात्मकं स्यादेव, यथा–

'एवंविहा गिरा मे वत्तव्वा एरिसि न वत्तव्वा ।
इअ वेआलिअवक्कस्स भासओ वाइअं झाणं ।। १।।' तथा–
'सुसमाहिअकरपायस्स अकज्जे कारणंमि जयणाए ।
किरिआकरणं जं तं काइअझाणं भवे जइणो ।।२।।'

**भूतोपघातरहितः, भूतानि** पृथिव्यादीनि **उपरोधः** तत्संघट्टनादिलक्षणस्तेन रहितो यः, तथा अनृतादत्तादानमैथुनपरिग्रहाद्युपरोधरहितश्च **स देशो ध्यायत** उचितः ।।३७।।

**अवचूरिः - तो ज० ।। ततो यत्र** ग्रामादौ स्थाने **समाधानं** स्वास्थ्यं **स्यान्मनोवाक्काययोगानाम् ।** आह - मनोयोगसमाधानमस्तु वाक्काययोगसमाधानं तत्र क्वोपयुज्यते, न हि तन्मयं ध्यानं भवत्यत्रोच्यते - तत्समाधानं तावन्मनोयोगोपकारकम्, ध्यानमपि च तदात्मकं स्यादेव, यथोक्तम् -

"एवंविहा गिरा मे वत्तव्वा एरिसी न वत्तव्वा । इअ वेआलिअवक्कस्स भासउ वाइअं झाणं ।।१।। तथा -

सुसमाहिअकरपायस्स अकज्जे करणंमि जयणाए । किरिआकरणं जं तं काइअझाणं तु भवे जइणो ।।२।। **भूतानि** पृथिव्यादीनि **उपरोधस्तं** घट्टनादिलक्षणस्तेन **रहितः** । एकग्रहे तज्जातीयग्रहणेऽनृतादत्तादानमैथुनपरिग्रहाद्युपरोधरहितश्च यः **स देशो ध्यायत** उचित इति शेषः ।।३७।। द्वार-२

**टीका -** यतश्चैवमत आह– **भूतोपरोधरहितः भूतानां** प्राणिनां **उपरोधः** उपघातस्तेन रहितः। उपलक्षणत्वादनृतादत्तादानमैथुनपरिग्रहोपघातरहितश्च । गतं देशद्वारम् ।। ३७ ।।

**कालोऽवि सोच्चिय, जहिं जोगसमाहाणमुत्तमं लहइ ।**
**न उ दिवसनिसावेलाइनियमणं झाइणो भणियं ।।३८।।**

**अर्थलेशः -** देशद्वारं व्याख्यातम्, कालद्वारमाह **कालो गाथा ।। ध्यानकर्तुः स एव कालो** योग्यः स्याद् **यत्र** काले **उत्तमं योगसमाधानं** मनोवाक्कायव्यापाराणां समाधिप्रापणं **लभते तु** पुनः ध्यानकर्तुः

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

**दिवसनिशादिवेलानियमनं** निश्चयकरणं न विद्यते **न भणितम्** ।।३९।।

**दीपिका** - अथ कालद्वारम्– **कालोऽपि स एव** ध्यानार्हः **यत्र** ध्याता **योगानां समाधानमुत्तमं लभते, न तु दिवसनिशादिवेलाया नियमनं** नियन्त्रणं **ध्यायिनो भणितम्,** ।। ३८ ।। द्वा० ३

**अवचूर्णिः** - **कालोऽपि स एव** ध्यानोचितः ।। ३८ ।।

**अवचूरिः** - कालमाह- **कालो०** ।। **कालोऽपि स एव** ध्यानोचित इति गम्यम् । **यत्र** काले **योगसमाधानं** मनोयोगादिस्वास्थ्यं **प्रधानं लभते, न तु** नैव **दिवसनिशावेलानियमनं ध्यायिनो भणितम्** ।।३८।। गतं द्वारम् ३ ।

**टीका** - गतं देशद्वारम्, कालद्वारमाह— स्पष्टा, नवरं **वेला** मुहूर्तादि ।। ३८ ।।

**जच्चिय देहावत्था, जिया ण झाणोवरोहिणी होइ ।**
**झाइज्जा तदवत्थो, ठिओ निसण्णो निवण्णो वा ।।३९।।**

**अर्थलेशः** - कालद्वारं व्याख्यातम्, अथासनविशेषद्वारमाह - **जच्चिय गाथा** ।। **जीवानां यैव देहावस्था** - पर्यंकाद्यासनस्थितिः **ध्यानोपरोधिनी** ध्यानसाधनकारणं **भवति।** साधुः **तदवस्थः** तस्याम् अवस्थायां पर्यङ्काद्यासनरूपायां **स्थितः** सन् स्थित ऊर्ध्वस्थानेन **निषन्नु**पविष्टो वा **निविण्णः** शयितो **वा ध्यायेद्** ध्यानं कुर्यात् ।।४०।।

**दीपिका** - अथासनद्वारम् – **यैव** निषण्णतादिरूपा **देहावस्था, जिता**ऽभ्यस्ता, **ध्यानस्योपरोधिनी** पीडाकारिणी **न स्यात्,** सैवावस्था यस्य स **तदवस्थः, स्थितः** कायोत्सर्गे, **निषण्ण** उपविष्टः, **निर्विण्णः**- शयितो **वा ध्यायेत्** ।। ३९ ।।

**अवचूर्णिः** - आसनमाह— **यैव देहावस्था** निषण्णादिरूपा **जिता**ऽभ्यस्ता तथानुष्ठीयमाना, **न ध्यानोपरोधिनी स्यात्** नाधिकृतधर्म्मध्यानपीडाकारी स्यात्, **स्थितः** कायोत्सर्गेण ईषन्नतादिना, **निषन्नः** उपविष्टः वीरासनादिना, **निर्विन्नः** शयितो दण्डायतादिना, **वा** विकल्पार्थे ।।३९।।

**अवचूरिः** - आसनविशेषमाह - **जच्चि०** ।। **यैव देहावस्था** निषण्णतादिरूपा **जिता** अभ्यस्ता तथाऽनुष्ठीयमाना **न ध्यानोपरोधिनी भवति** नाधिकृतधर्मध्यानपीडाकारी स्यादिति **ध्यायेत् तदवस्थः स्थितः** कायोत्सर्गेण ईषन्नतादिना **निषण्ण** उपविष्टो वीरासनादिना **निविण्णः** शयितो दण्डायतादिना **वा** विकल्पार्थः ।।३९।।

**टीका** - आसनविशेषद्वारमाह— **यैव देहावस्था जिता**ऽभ्यस्ता **न ध्यानोपरोधिनी** ध्यानावारिका **भवति, तदवस्थो** ध्यानं **ध्यायेद्** ध्यानं कुर्वीत। **स्थितः** कायोत्सर्गेण **निषण्ण** आसीनो वीरासनादिना, **निवन्नः** सुप्तो दण्डायतादिना ।। ३९ ।।

**सव्वासु वट्टमाणा, मुणओ जं देसकालचेट्ठासु ।**
**वरकेवलाइलाभं, पत्ता बहुसो समियपावा ।। ४० ।।**

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

**अर्थलेशः - सव्वासु गाथा** ।। **यद्** यस्मात् कारणाद् **मुनयः सर्वासु देशकालावस्थासु वर्तमाना वरकेवलादिलाभं प्राप्ताः**। तत्र **देशो** ग्रामादिः, **कालो** घटिकादि, **चेष्टा** पर्यङ्काद्यासनरूपा ज्ञेया । किं विशिष्टा मुनयः? **बहुशो** बहून् वारान् ध्यानबलेन **शमितपापाः** ।।४१।।

**दीपिका - यतः चेष्टा** देहावस्था उच्यन्ते । देशश्च कालश्च चेष्टाश्च **देशकालचेष्टास्तासु, सर्वासु** देशकालचेष्टासु **वर्त्तमानाः शान्तपापाः** सन्तो **मुनयो वरकेवल**ज्ञानमनोज्ञा**नादिलाभं प्राप्ता बहुशः,** केवलज्ञानवर्जमनेकवारान् ।।४०।।

**अवचूर्णिः -** अथ- किं देशकाला[सना]नामनियमः? उच्यते- **सर्वासु देशकालचेष्टासु, चेष्टा** देहावस्था, **वर्त्तमाना मुनयो यद्** यस्मात्कारणात् **प्रधानकेवलादिलाभं प्राप्ताः, आदेर्मन**ःपर्यायादिग्रहः, केवलवर्जं **बहुशो**ऽनेकशः, **शमितपापाः** सन्तः ।।४०।।

**अवचूरिः -** किं देशकालासनानामनियमः ? उच्यते- **सव्वा०** ।। **सर्वासु वर्तमाना मुनयो यद्** यस्माद् **देशकालचेष्टासु चेष्टा** देहावस्था गृह्यते । **वरकेवलादिलाभं प्राप्ता शमितपापाः** ।।४०।।

**टीका -** कथं ध्यानस्य देशादीनामनियम इत्याह - स्पष्टा । नवरं **चेष्टा** देहावस्था ।।४०।।

**तो देसकालचेट्ठानियमो झाणस्स नत्थि समयंमि ।**
**जोगाण समाहाणं, जह होइ तहा पयइयव्वं ।।४१।।**

**अर्थलेशः - तो देस गाथा । ततः** कारणात् । **समये** सिद्धान्ते **ध्यानस्य देशकालचेष्टानियमो नास्ति । यथा योगानां समाधानं भवति तथा** ध्यानकर्त्रा **प्रयतितव्यम्** ।।४२।।

**दीपिका - योगानां** मनोवाक्कायानां **समाधानं** भवति **यथा, प्रयतितव्यम्** ।।४१।।

**अवचूर्णिः - तस्माद्** ।।४१।।

**अवचूरिः - तो दे०** ।। **ततो देशकालचेष्टानियमो ध्यानस्य नास्ति समये** आगमे किन्तु **योगानां समाधानं यथा स्यात् तथा प्रयतितव्यम्** ।।४१।। द्वार-४

**टीका-** [स्पष्टा] ।।४१।।

**आलंबणाइ वायण-पुच्छण-परियट्टणा-णुचिंताओ ।**
**सामाइयाइयाइं सद्धम्मावस्सयाइं च ।।४२।।**

**अर्थलेशः -** आसनविशेषद्वारं व्याख्यातम्, आलम्बनद्वारमाह - **आलंबणा गाथा** ।। धर्म्मध्यानस्य तानि **आलम्बनानि** भवन्ति । एतानि कानि? १-**वाचना** २-**पृच्छना,** ३-**परिवर्त्तना,** ४-**अनुप्रेक्षा,** ५-**तु**शब्दाद्धर्म्मकथा । एतानि सम्यक्त्वसामायिकश्रुतसामायिकयोरालम्बनानि स्युः, तैर्हेतुभूतैः तयोर्लभ्यमानत्वात् । **सामायिकादीनि सद्धर्म्मावश्यकानि च** । देशविरतिसामायिक-सर्वविरतिसामायिकयोरालम्बनानि स्युः। तैस्तत् प्राप्तेः ।।४३।।

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

**दीपिका** - अथालम्बनद्वारम् - १-**धर्म्मध्यानालम्बनानि** - सूत्रार्थदानं **वाचना,** २-शङ्किते सूत्रादौ **प्रश्नः** ३-गुणनं **परिवर्त्तना** ४-मनसा सूत्रार्थचिन्तनम् **अनुचिन्ता,** अमूनि श्रुतधर्म्माश्रितानि । अथ चरणधर्म्माश्रितान्याह - **'सामा' आदितः** प्रतिलेखनादीनि, **सद्धर्म्मश्चा**रित्रधर्म्म**स्तस्यावश्यकानि** ।।४२।।

**अवचूर्णिः** - आलम्बनद्वारमाह - **वाचना** विनेयाय सूत्रार्थदानम्, शङ्किते सूत्रादौ गुरुप्रच्छनं **प्रश्नः, परावर्त्तनं** पूर्वाधीतस्यैव सूत्रादेरभ्यासकरणम्, **अनुप्रेक्षा** मनसैवाविस्मरणादिनिमित्तं सूत्रानुस्मरणम्, एतानि श्रुतधर्म्मानुगतानि वर्त्तन्ते, तथा **सामायिकादीनि सद्धर्म्मावश्यकानि च,** अमूनि चरणधर्म्मानु-गतानि, सामायिकं प्रतीतमादिशब्दान्मुखवस्त्रिकाप्रत्युपेक्षणादिसामाचारीपरिग्रहः, सन्ति च तानि चारित्रधर्म्मावश्यकादीनि चेति विग्रहः, **आवश्यकानि** नियमतः करणीयानि ।।४२।।

**अवचूरिः** - आलम्बनद्वारमाह - **आलं०** ।। धर्मध्यानारोहणार्थमालम्ब्यन्त **इत्यालम्बनानि, वाचना** विनेयाय सूत्रर्थदानम्, शङ्किते सूत्रादौ गुरुप्रच्छनं **प्रश्नः, परावर्त्तनं** पूर्वाधीतस्यैव सूत्रादेरभ्यासकरणम्, **अनुप्रेक्षा** मनसैवाविस्मरणनिमित्तं सूत्रानुस्मरणम् । एतानि श्रुतधर्मानुगतानि वर्तन्ते तथा **सामायिकादीनि सद्धर्मावश्यकानि च** इति विग्रहः । आवश्यकानि नियमतः करणीयानि ।।४२।।

**टीका** - धर्मध्यानावलम्बनान्याह— धर्मध्यानारोहणार्थमालम्ब्यते **इत्यालम्बनानि, सद्धर्म**श्चारित्र-धर्म**स्तस्यावश्यकान्य**वश्यकृत्यानि। शेषं स्पष्टम् ।।४२।।

**विसमंमि समारोहइ, दढदव्वालंबणो जहा पुरिसो ।**
**सुत्ताइकयालंबो, तह झाणवरं समारुहइ ।।४३।।**

**अर्थलेशः - विसमंमि गाथा** ।। **यथा पुरुषो विषमम**पि प्रासादादिकं **दृढद्रव्यालम्बनः** सन् **दृढं** निश्चलं **द्रव्यं** काष्ठरज्ज्वादिरालम्बनं यस्य स एवंविधः **समारोहति** । **तथा** साधुरपि **सूत्र**वाचना**दिकृतालम्बनः** सन् **ध्यानवरं** धर्म्मध्यानं **समारोहति** ।।४४।।

**दीपिका - विषमे** दुर्गादौ, **समारोहति** सम्यगपरिक्लेशेनोर्ध्वं याति, कः? **दृढं** बलवत् **द्रव्यं** रज्ज्वादि, **सूत्रादिकृतालम्बनो ध्यानवरं** धर्म्यम्, ।। ४३ ।। द्वा० ५

**अवचूर्णिः** - **दृढद्रव्यं** रज्ज्वादि ।।४३।।

**अवचूरिः - विस०** ।। **विषमे** दुःसञ्चरे **समारोहति** ऊर्ध्वं याति । **दृढं** बलवद् **द्रव्यं** रज्ज्वाद्या**लम्बनं** यस्य स **तथा**विधः **सूत्रादिकृतालम्बनो** वाचनादिकृतालम्बनो **ध्यानवरं** धर्मध्यानमित्यर्थः ।।४३।। द्वार-५

**टीका** - एषामालम्बनत्वे दृष्टान्तमाह— **दृढद्रव्यं** रज्ज्वादि ।।४३।।

**झाणप्पडिवत्तिकमो, होइ मणोजोगनिग्गहाईओ ।**
**भवकाले केवलिणो, सेसाण जहासमाहीए ।। ४४ ।।**

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

**अर्थलेशः** - आलम्बनद्वारं व्याख्यातम्, अथ क्रमद्वारमाह - **झाण गाथा** ।। **केवलिनः भवकाले** मुक्तिगमनकाले **मनोयोगनिग्रहादिक ध्यानप्रतिपत्तिक्रमो भवति** । केवली मुक्तौ गच्छन् पूर्वं मनोयोगं रुणद्धि, ततो वचनयोगं ततः काययोगम् एष क्रमः। **शेषस्य** शुक्लध्यानाद्यभेदद्वयस्य धर्म्मध्यानस्य च **यथासमाधि** ध्यानक्रमो ज्ञेयः। कोऽपि पूर्वं मनो रुणद्धि ततो वचनं ततः कायम्, कोऽपि पूर्वं कायं रुणद्धि ततो वचनमनसी, कोऽपि वचनं रुद्ध्वा कायमनसी । एवं यथासमाधि ध्यानक्रमो ज्ञेयः। ।।४५।।

**दीपिका** - अथ क्रमद्वारम्— **केवलिनो भवस्य काले** शेषेऽन्तर्मुहूर्त्ते शैलेशीक्षणे **ध्यानस्य** प्रस्तावाच्छुक्लध्यानान्त्यभेदद्वयस्य **प्रतिपत्तेः क्रमो मनोयोगनिग्रहादिः**, आदितो वाक्कायनिग्रहः। शेषस्य धर्म्मध्यानस्य शुक्लाद्यभेदयोश्च प्रतिपत्तिर्योगानाश्रित्य **यथासमाधिना** प्रतिपत्तिक्रमः, परं प्रायः प्राक्कायवाग्योगरोधस्ततो मनोरोधः ।।४४।। द्वा० ६

**अवचूर्णिः** - क्रमं धर्म्मस्य लाघवार्थं शुक्लस्य चाह— **ध्यानस्य प्रतिपत्तिक्रमः** परिपाटी, पूर्वं मनोनिग्रहस्ततो वाग्निग्रहस्ततः काययोगनिग्रहः, अयं क्रमो **भवकाले** शैलेश्यवस्थान्तर्गत**केवलिनः**, शुक्ल एवायं क्रमः, **शेषस्य** धर्मध्यानप्रतिपत्तु**र्यथासमाधिना** यथैव स्वास्थ्यं स्यात्तथैव प्रतिपत्तिः ।।४४।।

**अवचूरिः** - क्रमद्वारे लाघवार्थं धर्मस्य शुक्लस्य च [तमाह - **झाण०** ।। **ध्यानस्य प्रतिपत्तिक्रमः** प्रतिपत्तिपरिपाट्यभिधीयते । स **भवति मनोयोगनिग्रहादिः**, प्रथमं मनोयोगनिग्रहः, ततो] वाग्योगनिग्रहः, ततः काययोगनिग्रहः । अयं क्रमः **केवलिनो भवकाले** अत्र **भवकाल**शब्देन शैलेश्यवस्थान्तर्गतः अन्तर्मुहूर्तमान एव गृह्यते कालः । अयं शुक्लध्यानक्रमः **शेषस्य** धर्मध्यानप्रतिपत्तुर्योगकालावाश्रित्य **यथैव स्वास्थ्यं** स्यात् तथैव प्रतिपत्तिः ।।४४।। द्वार-६

**टीका** - अथ लाघवार्थं धर्म्मस्य शुक्लस्य च क्रममाह— **भवकाले** भवसत्के काले - मृत्युसमये मोक्षगमनप्रत्यासन्ने शैलेश्यवस्थारूपे **केवलिनो ध्यानक्रमः। शेषस्य** धर्मध्यानप्रतिपत्तु**र्यथासमाधिना** यथास्वास्थ्यं स्यात्तथा क्रमः ।। ४४ ।।

**सुनिउणमणाइणिहणं, भूयहियं भूयभावणमहग्घं ।**
**अमियमजियं महत्थं, महाणुभावं महाविसयं ।। ४५।।**

**झाइज्झा निरवज्जं, जिणाणआणं जगप्पईवाणं ।**
**अणिउणजणदुण्णेयं, नयभंगपमाणगमगहणं ।।४६।।**

**अर्थलेशः - आणविजयमवाए, विवागसंठाण, उ य बोधव्वा ।**

**एए चत्तारि पया, जायव्वा धम्मझाणस्स ।।४६।।**

क्रमद्वारं व्याख्यातम्, अथ ध्यातव्यद्वारमाह - धर्म्मध्यानस्य एतानि चत्वारि पदानि ध्यातव्यानि

बोधव्यानि भवन्ति । एतानि कानि ? १-आज्ञाविचयो जिनाज्ञाया अभ्यासः, २-अपायविचयः सांसारिक जीवानां दुःखचिन्तनम्, ३-विपाकविचयः कर्म्मस्वरूपचिन्तनम्, ४-संस्थानविचयः लोकस्वरूपचिन्तनम् ।

अथैतेषां चतुर्णां पदानां व्याख्या ।।४६।।

**सुणिऊण गाथा**।। **झाइज्जा गाथा** ।। सुधीरेवंविधां **जिनानामाज्ञां ध्यायेत्** । किं विशिष्टाम् आज्ञाम्? **सुनिपुणाम्** अतिदक्षां जीवादितत्त्वप्ररूपकत्वात्, [त]था **अनादिनिधनां** महाविदेहेषु सदैव विद्यमानत्वात्, तथा **भूतहितां** भूतेभ्यो जीवेभ्यो हितकारिणी, अपरं **भूतभावनां** भूतानां-जीवानां भावना-विचारणा यत्र ताम्, तथा **अनर्घां** निगोदादिविचारज्ञापकत्वान्मूल्यरहिताम् अमूल्यामित्यऽर्थः, अपरं **महानुभावां** मुक्त्यादिसौख्यदायकत्वात् महत्प्रभावाम्, तथा **महाविषयाम्** अनन्तजीवप्रकाशकत्वात् महान् विषयो गोचरो यस्यास्तां महाविषयाम्, अपरं **निरवद्यां** निःपापाम्। किं विशिष्टानां जिनानाम् ? **जगत्प्रदीपानाम्** । किं विशिष्टाम् आज्ञाम् ? **अनिपुणजनदुर्ज्ञेयां** मूर्खजनैः ज्ञातुमशक्याम्, तथा **नयभङ्गप्रमाणगमगहनां नया** नैगमादयः सप्त तेषां **भङ्गाः** सप्तशतानि, **प्रमाणे** द्वे प्रत्यक्षपरोक्षरूपे, **गमा** सदृक्पाठाः एतैः प्रकारै**र्गहनां** ज्ञानं विना ज्ञातुमशक्याम् ।।४७-४८।।

**दीपिका** - अथ ध्यातव्यमाज्ञाविचय१अपायविचय२विपाकविचय३संस्थानविचय४भेदाच्चतुर्द्धा, तत्र विचयश्चिन्तनेन परिचयः क्रमेणाह - **सुनिपुणां** सूक्ष्मद्रव्यादिदर्शकत्वात्, **अनादिनिधनाम्** अर्थतः शाश्वताम्, **भूतहितां** भूतं - सत्यं भाव्यते अनया सा **भूतभावना** स्याद्वादवादिनी **ताम् अनर्घ्याम्** अमूल्याम्, **अमिताम्** एकैकसूत्रस्यानन्तार्थत्वात्, **अजितां** कुतीर्थिकैः, **महान्** प्रधानो**ऽर्थो** यस्याः पूर्वापराविरोधित्वादनुयोगद्वारात्मकत्वा-न्नयमयत्वाच्च, **महान्** प्रभूतो**ऽनुभावो** यस्याश्चतुर्दशपूर्विणां सर्वलब्धिमत्वात् ताम्, **महाविषयां** सर्वद्रव्यविषयत्वात् ।।४५।।

**निरवद्यां** द्वात्रिंशदलीकादिदोषाभावात्, ईदृशां **जगत्प्रदीपानां जिनानामा**ज्ञाप्यन्ते सत्कर्म्माण्यनया जीवा इत्या[ज्ञा ता**मा]ज्ञां** वाचम्। **अनिपुणजनदुर्ज्ञेयाम्, नया** नैगमाद्याः, **भङ्गा** एकविधाद्याः, **प्रमाणानि** प्रत्यक्षादीनि, **गमाः** सदृक्पाठाः तै**र्गहनाम्** ।।४६।।

**अवचूर्णिः** - ध्यातव्यं चतुर्धा– आज्ञाऽपायविपाकसंस्थानविचयभेदात्, तदेवाह– **'आणा'** इयं गाथान्यकर्तृकी । तत्राद्यमाह– **सुनैपुण्यं** च सूक्ष्मद्रव्याद्युपदर्शकत्वात्तथा मत्यादिप्रतिपादकत्वाच्च, **अनाद्यनिधनां** द्रव्यार्थादेशात्, **भूतहितां** भूताः प्राणिनस्तेषां हितां पथ्यां 'सव्वे जीवा न हंतव्वा' इत्यादि– **भूतभावनां** भूतं -सत्यं भाव्यतेऽनयेति भूतभावना - अनेकान्तपरिच्छेदात्मिका, **भूतानां** वा सत्त्वानां चिलातीपुत्रादीनामिव **भावना** - वासना यस्याः सा तथा ताम्, **अनर्घ्याम**विद्यमानमूल्याम्, अथवा ऋणघ्नाम्, अमितामपरिमितार्थाम्, यथा-

'सव्वनईणं जा हुज्ज वालुया सव्वुदहीण जं उदयं ।
इत्तोवि अणंतगुणो अत्थो इक्कस्स सुत्तस्स ।। १ ।।'

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

**अमृतां** वाऽमृतोपमां मृष्टां पथ्यां वा, यथा-

'जिणवयणमोअगस्स उ रत्तिं व दिआ य खज्जमाणस्स ।
तित्तिं बुहो न वच्चइ सहस्सोवगूढस्स ।।१।।' तथा-

नरनिरयतिरिअसुरगणसंसारिअसव्वदुक्खरोगाणं ।
जिणवयणमेगमोसहमपवग्गदुहक्खयफलयं ।।२।।'

**अमृतां** सजीवां वा, उपपत्तिक्षमत्वेन, **अजितां** शेषप्रवचनाज्ञाभिरपराजिताम्, यथा–

'जीवाइवत्थुचिंतणकोसल्लगुणेणऽणण्णसरिसेणं।
सेसवयणेहिं अजिअं जिणिंदवयणं महाविसयं ।।१।।'

**महार्थां** पूर्वापराविरोधित्वाऽनुयोगद्वारात्मकत्वान्नयगर्भत्वाच्च, यदा महः पूजा तत्र तिष्ठतीति महस्था [ताम्,] यथा -

'सव्वसुरासुरमाणुसजोइसवंतरसुपूइअं णाणं ।
जेणेह गणहराणं छुहंति चुन्ने सुरिंदावि ।।१।।'

**महान्** प्रधानः प्रभूतो वा**ऽनुभावः** सामर्थ्यादिलक्षणो यस्याः सा तथा ताम्, प्रधानत्वं चतुर्दशपूर्वविदो लब्धिसम्पन्नत्वात्, प्रभूतत्वं च [प्रभूतकार्यकरणाद्, उक्तं च-] 'पहू णं चउद्दसपुव्वी घडाओ घडसहस्सं करित्तए' इत्यादि, परत्र यथा–

'उववाओ लंतगंमि चउदसपुव्वीस्स होइ उ जहन्नो ।
उक्कोसो सव्वट्ठे सिद्धिगमो वा अकम्मस्स ।।१।।'

**महाविषयां** सर्वद्रव्य[व्यादि]विषयत्वात् ।।४५।।

**आज्ञां** वचनलक्षणाम्, **नया** नैगमादयस्तथा **भङ्गा** भङ्गकाः, **प्रमाणानि** द्रव्यादीनि, **गमाश्च**तुर्विंशतिदण्डकादयः किञ्चिद्विसदृशाः सूत्रमार्गा वा, **तैर्गहना** ताम् ।।४६।।

**अवचूरिः** - अथ ध्यातव्यमाह, तच्चतुर्भेदम् आज्ञाऽपाय-विपाक-संस्थानविचयभेदात् । तदेवाह- **आणा०** गाथेयमन्यकर्तृकी ।

तत्राद्यमाह- **सुनि०** ।। **सुनिपुणाम्** आज्ञामिति योगः नैपुण्यं च सूक्ष्मद्रव्याद्युपदर्शकत्वात्तथा मत्यादिप्रतिपादकत्वाच्च ।
उक्तं च - "सुयनाणंमि नेउण्णं केवले तयणंतरं । अप्पणो सेसगाणं च जम्हा तं परिभावणं ।।"

**अनाद्यनिधनाम्** द्रव्यार्थादेशात्, **भूतहितां** भूताः प्राणिनस्तेषां हितां पथ्याम् -
"सव्वे जीवा न हंतव्वा" इत्यादि, **भूतभावनां** भूतं सत्यं भाव्यतेऽनयेति भूतभावना अनेकान्तपरिच्छेदात्मिका,

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

**भूतानां** वा सत्त्वानां चिलातीपुत्रादीनामिव **भावना** वासना यस्याः सा तथा ताम्, **अनर्घाम्** अविद्यमानमूल्याम् अथवा **ऋणघ्नाम्** ऋणं कर्म तद्घ्नाम्, **अमिताम**परिमितां यथा -

"सव्वनईणं जा होज्ज वालुया सव्वउदहीण जं उदयं । इतो वि अणंतगुणो अत्थो इक्कस्स सुत्तस्स ।।"

**अमृतां** वा अमृतोपमां मृष्टां पथ्यां वा यथा-

"जिणवयणमोदगस्स उ रत्तिं य दिवा य खज्जमाणस्स । तित्तिं बुहो न वच्चइ हेउसहस्सोवगूढस्स ।।

नरनिरयतिरियसुरगण संसारियसव्वदुक्ख-रोगाणं । जिणवयणमेगमोसहमपवग्गसुहक्खयं फलदं ।।"

**अमृतां** सजीवां वा उपपत्तिक्षमत्वेन **अजितां** शेषप्रवचनाज्ञाभिरपराजिताम्, यथा -

"जीवाइवत्थुचिंतणकोसल्लगुणेणऽणण्णसरिसेणं । सेसवयणेहिं अजियं जिणिंदवयणं महाविसयं ।।"

**महान्** प्रधानोऽ**र्थो** यस्याः तथा तां पूर्वापराविरोधित्वादनुयोगद्वारात्मकत्वान्नयगर्भत्वाच्च प्रधानां यद्वा **महा** पूजा तत्र तिष्ठतीति **महास्था,** यथा -

"सव्वसुरासुरमाणुस-जोइसवंतरसुपूइयं णाणं । जेणेह गणहराणं, छुहंति चुण्णे सुरिंदावि ।।"

**महान्** प्रधानः प्रभूतो वाऽ**नुभावः** सामर्थ्यादिलक्षणो यस्याः सा तथा ताम्, प्राधान्यं चास्याश्चतुर्दशपूर्वविदः सर्वलब्धिसम्पन्नत्वात्, प्रभूतत्वं च "पभू णं चोद्दसपुव्वी घडाओ घडसहस्सं करित्तए" इत्यादि, परत्र, यथा -

"उववाओ लंतगंमि, चोद्दस पुव्वीस्स होइ उ जहण्णो । उक्कोसो सव्वट्ठे, सिद्धिगमो वा अकम्मस्स ।।"

**महाविषयां** सकलद्रव्यादिविषयत्वात् ।।४५।।

**झाइ० ।। ध्यायेदिति** सर्वपदक्रिया । **निरवद्यामनृ**तादिद्वात्रिंशद्दोषावद्यरहितत्वात् **जिनानामाज्ञां** वचनलक्षणा**मनिपुणजनदुर्ज्ञेयाम्, नयाश्च भङ्गाश्च प्रमाणानि च गमाश्च तैर्गहना** गह्वरा ताम्, **नया** नैगमादयो, **भङ्गाः** भङ्गकाः, **प्रमाणानि** द्रव्यादीनि यथानुयोगद्वारेषु, **गमाश्च**तुर्विंशतिदण्कादयः, कारणवशतो वा किञ्चित्सदृशाः सूत्रमार्गा यथा षड्जीवनिकायादौ ।।४६।।

**टीका** -- अथ ध्यातव्यम्, तच्चतुर्धा आज्ञापायविपाकसंस्थानविचयभेदात् । आज्ञादीनां विविधो विशिष्टो वा चयः उपचयः। तत्राद्यभेदमाह

**आज्ञां** द्वादशाङ्गीरूपां **जिनानां जगत्प्रदीपानां ध्यायेत् ।** कथम्भूताम्? **सुनिपुणां** सूक्ष्मार्थप्रकाशकत्वात्। **अनाद्यनिधनां** द्वादशाङ्गीं न कदाचिन्नासीदित्यादि । **भूतहितां** प्राणिदयाप्रधानाम्। **भूतभावनां भूतानां** चिलातीपुत्रादीनामिव **भावना** वासना यस्या द्वादशाङ्गीवचनमात्रश्रुतेः सकाशात् सा तथा ताम् । **अनर्घ्याम**मूल्याम्, असङ्कल्पिताऽचिन्तितफलप्रदत्वात् । **अमिताम्** अपरिमितार्थाम्, अमृतां वा अमृतोपमाम्, अमरत्वदायकत्वात्। **अजितां** कुमतसिद्धान्तैः । **महार्थां** प्रधानार्थाम्, पूर्वापराविरोधित्वात् । **महानुभावां** महाप्रभावाम् - 'पहू णं चउदसपुव्वी घडाउ घडसहस्सं करित्तए' इत्यादि। **महाविषयां** सर्वद्रव्यविषयां - 'दव्वउ णं सुयनाणी उवउत्तो सव्वदव्वाणि जाणइ' इत्यादि । **निरवद्यां** निःपापाम् । **अनिपुणजनदुर्ज्ञेयाम् । नयभङ्गप्रमाणगमगहनाम्, नया** नैगमाद्याः, **भङ्गा** भङ्गकाः, **प्रमाणानि** प्रत्यक्षादीनि **गमाः** सदृशपाठाः तै**र्गहनां** कष्टावबोधाम्। ।।४५-४६।।

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

**तत्थ य मइदोब्बलेणं, तव्विहायरियविरहओ वावि ।**
**णेयगहणत्तणेण य, णाणावरणोदएणं च ।।४७।।**

**हेऊदाहरणासंभवे य, सइ सुट्ठु जं न बुज्झेज्जा ।**
**सव्वण्णुमयमवितहं, तहावि तं चिंतए मइमं ।।४८।।**

**अर्थलेशः - तत्थ य गाथा** ।। **हेऊ गाथा** ।। एतैः प्रकारैः सद्भिः साधुः श्राद्धा वा **यद्वस्तु सुष्ठुप्रकारेण न बुध्यते मतिमान् तथापि तद्वस्तु सर्वज्ञमतं** सर्वज्ञभाषितम् **अवितथं** सत्यं मन्यते । एतैः कैः प्रकारैः? **तत्र** वस्तुनि **मतिदौर्बल्येन** तुच्छबुद्धिः तया, अपरं **तद्विधाचार्याभावतश्चापि,** तथा **ज्ञेयगहनत्वेन** ज्ञेयानां - निगोदादिपदार्थानां गहनत्वेन **च** अन्यज्**ज्ञानावरणोदयेन,** अपरं **हेतु-उदाहरणयोरसम्भवे सति** ।।४९-५०।।

**दीपिका - तत्राज्ञायां मतिदौर्बल्येन तद्विधः** सम्यग् व्याख्याता **आचार्य**स्तस्य **विरहतोऽभावाज्ज्ञेयार्थस्य गहनत्वेन ज्ञानावरणोदयेन च, हेतुर्वह्न्यादेर्धूमवत्त्वादिः, उदाहरणं** चरितकल्पितभेदम्, तयो**रसम्भवे सति, सुष्ठु यद्वस्तु न बुध्यते तथापि तद्वस्तु सर्वज्ञमतमित्यवितथं चिन्तयेन् मतिमान्** ।।४७-४८।।

**अवचूर्णिः - तत्र** तस्यामाज्ञायां **मतिदौर्बल्येन** बुद्धेः सम्यगर्थानवधारणेन, **ज्ञेयं** धर्म्मास्तिकायादि, **तद्गहनत्वेन च** ।।४७।। कञ्चन पदार्थं प्रति **हेतूदाहरणासम्भवः** तस्मिन् **सति,** तत्र **हेतुः** कारको व्यञ्जकश्च, **उदाहरणं** चरितकल्पितभेदम्, **तथापि** तदबोधकारणे सत्यनवगच्छन्नपि **तत्** मतं **चिन्तयेन्मतिमान्** ।।४८।।

**अवचूरिः - तत्थ० ।। १-तत्र च मतिदौर्बल्येन** बुद्धेः सम्यगर्थानवधारणेनेत्यर्थः, २-**तद्विधाचार्यविरहतो-**ऽविपरीततत्त्वप्रतिपादनकुशलः आचार्यस्तदभावादित्यर्थः, **३-ज्ञेयगहनत्वेन च** ज्ञेयं धर्मास्तिकायादि, **४-ज्ञानावरणोदयेन च** ज्ञानावरणोदयादेवानन्तरोक्तं मतिदौर्बल्यादित्रयं स्यात् ततश्च तदभिधाने न युक्तममीषामभिधानम् ? न, तत्कार्यस्यैव सङ्क्षेप-विस्तरत उपाधिभेदेनोक्तत्वात् ।।४७।।

**हेऊ०** ।। ५-६- **हेतुः** कारको व्यञ्जकश्च **उदाहरणं** चरितकल्पितभेदम्, हेतुश्चोदाहरणं च हेतूदाहरणे तयो**रसम्भवः** कञ्चन पदार्थं प्रति हेतूदाहरणासम्भवात् तस्मिन् **सति यद्** वस्तुजातं **न सुष्ठु बुद्ध्येत** नातीवावगच्छेत् **सर्वज्ञमतमवितथं तथापि** तदबोधकारणे सत्यनवगच्छन्नपि तन्मतं वस्तु वा **पर्यालोचयेन्मतिमान्** ।।४८।।

**टीका** - स्पष्टे। नवरं **तत्र** तस्यामाज्ञायां श्रुतरूपायाम् ।। ४७-४८ ।।

**अणुवकयपराणुग्गहपरायणा जं जिणा जगप्पवरा ।**
**जियरागदोसमोहा य, णण्णहावादिणो तेणं ।।४९।।**

**अर्थलेशः - अणु गाथा** ।। सुधीरेवं चिन्तयेत् । **यद्** यस्मात् कारणात् **जगत्प्रवरा** वीतरागा

**अनुपकृतपरानुग्रहपरायणा** स्युः । उपकारं विनापि मेघसूर्यादिवत् परेषां जीवानाम् अनुग्रहं - प्रसादं कुर्वन्ति। उभयकालं व्याख्याकरणेन सर्वजीवहितकारी जीवाजीवादितत्वप्ररूपणया प्रसादकारका इत्यर्थः तथा **जितरागद्वेषमोहाः, तेन** कारणेन **अन्यथावादिनो न** भवन्ति ।।५१।।

**दीपिका - यज्जिनाः, अनुपकृते** परैरुपकारेऽकृतेऽपि, **परानुग्रहः** कृपा तत्र **परायणाः,जगत्प्रवराः, तेन नान्यथावादिनः, रागः** प्रीतिः, **द्वेषो**ऽप्रीतिः, **मोहो**ऽज्ञानम्, आज्ञाविचयनामा भेदः ।।४९।।

**अवचूर्णिः - रागो**ऽभिष्वङ्गो **द्वेषो**ऽप्रीति**र्मोहो**ऽज्ञानम् ।।४९।।

**अवचूरिः -** किमित्येतदेवमित्यत आह - **अणु०** ।। **अनुपकृते** परैरवर्तिते सति **परानुग्रहपरायणा** धर्मोपदेशादिना **यद्** यस्मा**ज्जिना जगत्प्रवरा जिता रागद्वेषमोहा नान्यथावादिनस्तेन** कारणात् ।।४९।।

**टीका -** किमित्येतदेवमित्याह– स्पष्टा ।।४९।।

**रागद्दोसकसायासवादिकिरियासु वट्टमाणाणं ।**
**इहपरलोयावाओ, झाइज्जा वज्जपरिवज्जी ।।५०।।**

**अर्थलेशः** - आज्ञाविचयो व्याख्यातः, अथापायविचयमाह - **रागद्दोस गाथा** ।। धर्म्मध्यानध्याता जीवानाम् **इह-परलोकापायान्** इहलोके कुटुम्बचिन्तादिकष्टानि परलोके नरकादिकष्टानि **ध्यायेत् ।** किं विशिष्टानां जीवानाम्? **रागद्वेषकषायाश्रवादिक्रियासु वर्त्तमानानाम् ।** किं विशिष्टो धर्म्मध्यानध्याता ? **अवद्यपरिवर्जकः** पापपरिहारकर्त्ता ।।५२।।

**दीपिका - आश्रवा** मिथ्यात्वाविरतियोगाः । **आदि**शब्दो रागादिनामनेकभेदवाची, **क्रियाः** कायिकाद्याः, **रागादिषु क्रियासु वर्त्तमानानामिहपरलोकयोरपायान्** कष्टानि **ध्यायेत्** । यथा राग इहभवेऽपि दुःखाय, दृष्टिरागादिभेदस्तु दीर्घभवाय, एवं द्वेषादयोऽपि, **अवद्यपरिवर्जी,** अपायविचयनामा भेदः २।।५०।।

**अवचूर्णिः–** द्वितीयमाह– **रागद्वेषकषायाश्रवादिक्रियासु वर्त्तमानानामिहपरलोकापायान् ध्यायेद्वर्ज्यपरिवर्जी,** वर्ज्यमकृत्यं तत्परिवर्जी - अप्रमत्तः, यथा–

'रागः सम्पद्यमानोऽपि, दुःखदो दुष्टगोचरः। महाव्याध्यभिभूतस्य, अपथ्यान्नाभिलाषवत् ।। १ ।।

द्वेषः सम्पद्यमानोऽपि, तापयत्येव देहिनम् । कोटरस्थो ज्वलन्नाशु, दावानल इव द्रुमम् ।।२।।' तथा–

'दृष्ट्यादिभेदभिन्नस्य, रागस्यामुष्मिकं फलम् । दीर्घः संसार एवोक्तः, सर्वज्ञैः सर्वदर्शिभिः ।।३।।

दोसानलसंतत्तो, इहलोए चेव दुक्खिओ जीवो । परलोगंमि अ पावो, पावइ निरयानलं तत्तो ।।४।।

मिच्छत्तमोहिअमई, जीवो इहलोग एव दुक्खाइं । निरओवमाइं पावो, पावइ पसमाइगुणहीणो ।।५।।

अज्ञानं हि खलु कष्टम्, क्रोधादिभ्योऽपि सर्वपापेभ्यः। अर्थं हितमहितं वा, न वेत्ति येनावृत्तो लोकः ।।६।।

Jain Education International 2010_02          For Private & Personal Use Only          www.jainelibrary.org

जीवा पाविंति इहं, पाणवहादविरईए पावाए । निअसुअघायणमाई, दोसे जणगरहिए पावा ।।७।।

परलोगंमिवि एवं, आसवकिरिआहिं अज्जिए कम्मे । जीवाणं चिरमवाया, निरयाइगईभमंताणं ।।८।।

किरियासु वट्टमाणा, काइगमाईसु दुक्खिआ जीवा । इह चेव य परलोगे, संसारपवड्ढगा भणिया ।।९।।'

एवं रागादिक्रियासु वर्त्तमानानामपायान् ध्यायेत् ।।५०।।

**अवचूरिः** - द्वितीयध्यातव्यभेदमाह - **राग०** ।। **रागद्वेषकषायश्रवादिक्रियासु वर्तमानानामिह-परलोकापायान् ध्यायेत् । वर्ज्यपरिवर्जी** वर्ज्यम् अकृत्यं तत्परिवर्जी अप्रमत्तः । यथा **रागादिक्रिया -**

"रागः सम्पद्यमानोऽपि, दुःखदो दुष्टगोचरः । महाव्याध्यभिभूतस्य,अपथ्यान्नाभिलाषवत् ।।१।।

द्वेषः सम्पद्यमानोऽपि, तापयत्येव देहिनम् । कोटरस्थो ज्वलन्नाशु, दावानल इव द्रुमम् ।।२।।" तथा-

"दृष्ट्यादिभेदभिन्नस्य, रागस्यामुष्मिकं फलम् । दीर्घः संसार एवोक्तः, सर्वज्ञैः सर्वदर्शिभिः ।।३।।

दोसानलसंसत्तो, इह लोए चेव दुक्खिओ जीवो । परलोगंमि य पावइ, पावो निरयानलं तत्तो ।।४।।"

**कषायाः** तदपायाः पुनः "कोहो पीइं पणासेइ ।" इत्यादि । "कोहो य माणो य अणिग्गहीया" इत्यादि । **आश्रवाः** कर्मबन्धहेतवो मिथ्यात्वादयः तदपायः-

"मिच्छत्तमोहियमई, जीवो इहलोग एव दुक्खाइं । निरओवमाइं पावो, पसमाइगुणहीणो ।।

अज्ञानं हि खलु कष्टं, क्रोधादिभ्योऽपि सर्वपापेभ्यः । अर्थं हितमहितं वा, न वेत्ति येनावृत्तो लोकः ।।

जीवा पाविंति इहं, पाणवहादविरईए पावाए । नियसुयघायणमाई, दोसे जणगरहिए पावे ।।

परलोगंमि वि एवं, आसवकिरियाहि अज्जिए कम्मे । जीवाण चिरमवाया, निरयाइगई भमंताणं ।।"

**क्रियास्तु** कायिक्यादिभेदाः एव तदपायः पुनः-

"किरियासु वट्टमाणा, काइगमाईसु दुक्खिया जीवा । इह चेव य परलोए संसारपवड्ढगा भणिया ।।"

एवं रागादिक्रियासु वर्त्तमानानामपायान् ध्यायेत् ।।५०।।

**टीका** - द्वितीयं ध्यातव्यभेदमाह- **रागद्वेषकषायाश्रवादिक्रियासु, आश्रवाः** प्राणातिपाताद्याः, **आदि**शब्दान्मिथ्यात्वाज्ञानादयः तासु **वर्तमानानामिहलोकपरलोकापायान् ध्यायेत् । वर्ज्यपरिवर्जी** अप्रमत्त इत्यर्थः ।।५०।।

**पयइठिइपएसाणुभावभिन्नं सुहासुहविहत्तं ।**
**जोगाणुभावजणियं, कम्मविवागं विचिंतेज्जा ।।५१।।**

**अर्थलेशः - पयइ गाथा** ।। विपाकविचयमाह । धर्म्मध्यानध्याता **कर्म्मविपाकं विचिन्तयेत्**। किं विशिष्टं कर्म्मविपाकम् ? **प्रकृतिस्थितिरसप्रदेशानुभावभिन्नं प्रकृतिः** कर्मणां स्वभावः, **स्थितिः** कर्मणः

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

स्थितिकालः, **रसो** मनःपरिणामः तीव्रादिः, **प्रदेशः** कर्मणां पुद्गलाः तेषा**मनुभावेन** विचारेण **भिन्नं** भेदं प्राप्तम् । तथा **शुभाशुभविभक्तः**, अपरं **योगानुभावजनितं योगानां** मनोनाक्कायव्यापाराणाम् **अनुभावेन** संयोगेन उत्पादितम् ।।५३।।

**दीपिका** - प्रकृतयः कर्म्मणां भेदा ज्ञानावरणाद्याः, **स्थितिर्ज**घन्यादिभेदाः। **प्रदेशो** जीवप्रदेश-मिलितकर्मपुद्गलस्कन्धः, **अनुभवो** रसः, **तैर्भिन्नं** भेदापन्नम्, एतच्चतुर्द्धापि **शुभाशुभाभ्यां विभक्तम् । 'जोगा'** योगा मनोवाक्कायाः, **अनुभावा** जीवगुणा मिथ्यात्वाविरतिकषायास्तै**र्जनितम्, कर्म्मविपाकं** कर्म्मोदयः, विपाकविचयनामा भेदः ३ ।।५१।।

**अवचूर्णिः** - तृतीयमाह - **प्रकृत्यादिभेदभिन्नं, शुभाशुभविभक्तं, योगानुभावजनितं, योगा** मनोवचनकायाः, **अनुभावो** जीवगुण एव, स च मिथ्यात्वाविरतिप्रमादकषायास्तै**र्जनितम्** ।।५१।।

**अवचूरिः** - तृतीयमाह - **पय०** ।। **प्रकृति-स्थिति-प्रदेशाऽनुभावभिन्नं शुभाशुभविभक्तम् प्रकृति**शब्देनाष्टौ कर्मप्रकृतयोऽभिधीयन्ते, **स्थितिः** तासामेवावस्थानं जघन्यादिभेदभिन्नम्, **प्रदेश**शब्देन जीवप्रदेश-पुद्गलादीनां सम्बन्धोऽभिधीयन्ते, **अनुभाव**शब्देन तु विपाकः । एते च प्रकृत्यादयः शुभाशुभभावाः स्युः । **योगा** मन-वचन-कायाः **तैरनुभावो** जीवगुण एव स च मिथ्यादर्शनाविरति-प्रमाद-कषायाः, तेन च **जनितमु**त्पादितं **कर्मविपाकमु**दयं च ।।५१।।

**टीका** - तृतीयमाह - **प्रकृतिस्थितिप्रदेशानुभावभिन्नं शुभाशुभविभक्तं** शुभाशुभत्वेन स्थापितम्। **प्रकृतयो** ज्ञानावरणाद्याः, **स्थितिस्ता**सामवस्थानकालः, **प्रदेशाः** कर्मपुद्गलाः, **अनुभावो** विपाकः। **योगानुभावजनितं** मनोयोगादिप्रभावप्रभवं **कर्मविपाकं विचिन्तये**दित्यक्षरार्थः ।।५१।।

**जिणदेसियाइ लक्खणसंठाणासणविहाणमाणाइं ।**
**उप्पायट्ठिइभंगा-इपज्जवा जे य दव्वाणं ।।५२।।**

**अर्थलेशः - जिणदेसियाइ गाथा** ।। अथ संस्थानविचयमाह - धर्म्मध्यानध्याता **जिनदेशितानि** षड्**द्रव्याणां लक्षणानि संस्थानासनविधानानि[विधानमानानि] चिन्तये**दिति षष्ठगाथोक्तेन सम्बन्धः । तत्र **द्रव्याणि** धर्मास्तिकायादीनि, धर्म्मास्तिकायस्य **लक्षणं** गतिः। कोऽर्थः? जीवानां पुद्गलानां चासौ गत्युपग्रहकारी मत्स्यानां जलवत् ।१। अधर्म्मास्तिकायस्य **लक्षणं** स्थितिः, जीवानां पुद्गलानां चासौ स्थित्युपग्रहकारी मत्स्यानां स्थलवत् ।।२।। आकाशास्तिकायस्य लक्षणम् अवगाहः, सर्वद्रव्याणां स्थानत्वादपां घटवत् ।।३।। पुद्गलास्तिकायस्य लक्षणं मूर्तिवर्णगन्धरसस्पर्शशब्दवत्त्वं पूरणगलनात्मकत्वं च ।।४।। कालस्य लक्षणमतिक्रमणवत्त्वम् ।।५।। एतान्यऽजीवाः। जीवास्तिकायलक्षणं चेतनत्वम् ।।६।।

**संस्थानम्** आकारः। स लोकाकाशस्य, तत्र वर्त्तिनां धर्माधर्मास्तिकायनैश्चयिककालानाम्, केवलिसमुद्धातगतस्य लोकपूर्त्तिसमये जीवस्य, कटिदत्तकरवैशाखसंस्थानस्थितपुरुषतुल्यः। वैशाखसंस्थानं

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

विस्तारितपादाभ्यां स्यात् । समयावलिकादिकस्य व्यावहारिककालस्य संस्थानं नृक्षेत्रतुल्यम् अल्पं सूर्यचारप्रभवत्वात् सूर्यचारश्च नृक्षेत्र एव। अन्यत्र पल्योपमादिव्यवहारः एतदपेक्षया ज्ञेयः । पुद्गलानां संस्थानं वृत्त-त्र्यस्रादि । देहस्थितजीवानां समचतुरस्रादिः ।

**आसनमा**धारः तच्च धर्म्मास्तिकायादीनां लोकाकाशम् ।

**विधानानि** भेदास्ते च 'धम्मत्थिकाए' इत्यादि, 'धम्मत्थिकायदेसे धम्मत्थिकायपएसे' इत्यादि ।

**मानानि** प्रमाणानि । यथा धर्म्माधर्मौ लोकाकाशप्रमाणौ, आकाशं लोकालोकव्यापि, लोकाकाशम् एको जीवश्च सममात्रा, अणुरेकप्रदेशस्थायी, प्रदेशो निरंशो भाग, कालो नृक्षेत्रमानः **'उप्पायठिई'**त्यादिव्याख्या **ये च द्रव्याणामु**त्पादस्थितिभङ्गाश्च **पर्यायास्ता**न् चिन्तयेत् । कथं सर्ववस्तु उत्पादव्ययध्रौव्यात्मकम्? यथा स्वर्णं घटत्वेन भग्नं मौलित्वेनोत्पन्नं स्वर्णत्वेन स्थिरमेव। गोरसं पयस्त्वेन नष्टं दधित्वेनोत्पन्नं गोरसत्वेन स्थिरम्। एवं धर्म्मास्तिकायादयोऽपि विवक्षितसमयसम्बन्धापेक्षयोत्पन्नाः, अतीतसमयापेक्षया विनष्टाः, द्रव्यत्वेन तु स्थिराः। आदितो गुरुलघ्वादिपर्यायान् चिन्तयेत् ।।५४।।

**दीपिका - जिनदेशितानि** जिनोक्तानि, षण्णां **द्रव्याणां लक्षणसंस्थानासनविधानमानादीनि,** चिन्तयेदिति षष्ठगाथोक्तेन सह सम्बन्धः। तत्र **द्रव्याणि** धर्म्मास्तिकायादीनि । धर्म्मास्तिकायस्य **लक्षणं** गतिः, कोऽर्थः? जीवानां पुद्गलानां चाऽसौ गत्युपग्रहकारी मत्स्यानां जलवत् १। अधर्म्मास्तिकायस्य लक्षणं स्थितिः, जीवानां पुद्गलानां चासौ स्थित्युपग्रहकारी, मत्स्यानां स्थलवत् २। आकाशास्तिकायस्य लक्षणमवगाहः, सर्वद्रव्याणां स्थानत्वादपां घटवत् ३ । पुद्गलास्तिकायस्य लक्षणं मूर्तवर्णगन्धरसस्पर्शशब्दवत्त्वं पूरणगलनात्मकं च ४। कालस्य लक्षणमतिक्रमणवत्त्वम् ५। एतान्यजीवाः। जीवास्तिकायलक्षणं चैतन्यम् ६। **संस्थानम्** आकारः, स लोकाकाशस्य तत्रवर्त्तिनां धर्म्माधर्म्मास्तिकायनैश्चयिककालानां केवलिसमुद्घातगतस्य लोकपूर्त्तिसमये जीवस्य कटिदत्तकरवैशाखसंस्थानस्थितपुरुषतुल्यः। वैशाखसंस्थानं विस्तारितपादाभ्यां स्यात् । समयावलिकादिकस्य व्यावहारिककालस्य संस्थानं नृक्षेत्रतुल्यं सूर्यचारप्रभवत्वात्, सूर्यचारश्च नृक्षेत्र एव, अन्यत्र पल्योपमादिव्यवहारः, एतदपेक्षया ज्ञेयः। पुद्गलानां संस्थानं वृत्त-त्र्यस्रादि । देहस्थितजीवानां समचतुरस्रादि। **आसनमा**धारः, तच्च धर्म्मास्तिकायादीनां लोकाकाशम् । **विधानानि** भेदास्ते च 'धम्मत्थिकाए' इत्यादि, 'धम्मत्थिकायदेसे धम्मत्थिकायपएसे' इत्यादि। **मानानि** प्रमाणानि, यथा धर्म्माधर्म्माकाशलोकास्तिकाया एको जीवश्च सममात्राः, अणुरेकप्रदेशस्थायी प्रदेशो निरंशो भागः। कालो नृक्षेत्रमानः। **'उप्पायठिई'**त्यादि व्याख्या - **ये च द्रव्याणां** उत्पादस्थितिभङ्गादि**पर्यायास्ता**न् चिन्तयेत्, कथम्? सर्वं वस्तु उत्पादव्ययध्रौव्यात्मकम्, यथा स्वर्णं घटत्वेन भग्नं मौलित्वेनोत्पन्नं सुवर्णत्वेन स्थिरमेव। गोरसं पयस्त्वेन नष्टं दधित्वेनोत्पन्नं गोरसत्वेन स्थिरम् । एवं धर्म्मास्तिकायादयोऽपि विवक्षितसमयसम्बन्धापेक्षयोत्पन्नाः, अतीतसमयापेक्षया विनष्टाः, द्रव्यत्वेन तु स्थिराः । आदितोऽगुरुलघ्वादिपर्यायान् चिन्तयेत् ।।५२।।

**अवचूर्णिः** - चतुर्थमाह - **जिनदेशितानि लक्षणसंस्थानासनविधानमानानि,** विचिन्तयेदिति वक्ष्यति

षष्ठ्यां[षष्ठ]गाथायाम्, **द्रव्याणामि**ति प्रतिपदमायोज्यम्, तत्र **लक्षणं** धर्म्मास्तिकायादिद्रव्याणां गत्यादि, तथा **संस्थानं** परिमण्डलाद्यजीवानाम्, जीवशरीराणां च समचतुरस्रादि, कालस्य मनुष्यक्षेत्राकृतिः, सूर्यादिक्रियाऽभिव्यङ्ग्यो हि कालः किल मनुष्यक्षेत्र एव वर्त्तते, अतो य एवास्याकारः स एव कालस्योपचारतो विज्ञेयः, धर्म्माधर्म्मयोरपि लोकक्षेत्रापेक्षया भावनीयम्, तथा **आसनानि** आधारलक्षणानि धर्म्मास्तिकायादीनां लोकाकाशादीनि स्वस्वरूपाणि वा, तथा **विधानानि** धर्म्मादीनाम्, यथा-'धम्मत्थिकाए धम्मत्थिकायस्स देसे धम्मत्थिकायस्स पएसे' इत्यादि, तथा **मानानि** धर्म्मादीनामेवात्मीयानि, तथा **उत्पादस्थितिभङ्गादिपर्याया ये च द्रव्याणां** धर्म्मास्तिकायादीनां तान् विचिन्तयेत्, तत्र धर्म्मास्तिकायो विवक्षितसमयसम्बन्धरूपापेक्षयोत्पद्यते, तदनन्तरातीतसमयसम्बन्धरूपापेक्षया तु विनश्यति, धर्म्मास्तिकाय द्रव्यात्मना तु नित्यः, आदिशब्दादगुरुलघ्वादिपर्यायपरिग्रहः ।। ५२ ।।

**अवचूरिः** - चतुर्थमाह - **जिण०** ।। **जिनदेशितानि लक्षण-संस्थानाऽसन-विधान-मानानि विचिन्तयेद्** वक्ष्यति षष्ठ्यां [षष्ठ] गाथायाम् । **द्रव्याणामिति** प्रतिपदमाज्यम् । तत्र **लक्षणं** [धर्मास्तिकायादिद्रव्याणां गत्यादि । **संस्थानं** पुद्गलरचनाकारलक्षणं परिमण्डलाद्यजीवानाम्, धर्माधर्मयोरपि लोकक्षेत्रापेक्षया भावनीयम् । तथाऽऽ**सनानि** आधारलक्षणानि धर्मास्तिकायादीनां लोकाकाशादीनि स्वस्वरूपणि वा । **विधानानि]** धर्मास्तिकायादीनामेव भेदान् - यथा, 'धम्मत्थिकाए धम्मत्थिकायस्स देसे, धम्मत्थिकायस्स पएसे' इत्यादि । तथा **मानानि** प्रमाणानि धर्मास्तिकायादीनामेवात्मीयात्मीयानि । **तथोत्पाद-स्थिति-भङ्गादिपर्याया ये च द्रव्याणां** धर्मास्तिकायादीनां तान् विचिन्तयेत्, धर्मास्तिकायो विवक्षितसमयसम्बन्धरूपापेक्षयोत्पद्यन्ते, तदनन्तरातीतसमयसम्बन्धरूपापेक्षया तु विनश्यति, धर्मास्तिकाय द्रव्यात्मना तु नित्य, आदिशब्दादगुरुल-घ्वादिपर्यायग्रहः ।।५२।।

**टीका** - चतुर्थमाह – **जिनदेशितानि लक्षणसंस्थानासनविधानमानानि द्रव्याणां** विचिन्तयेदिति षष्ठगाथापर्यन्ते सम्बन्धः । तत्र **लक्षणं** धर्मास्तिकायादीनां द्रव्याणां गत्यादि । **संस्थानं** लोकाकाशस्येव धर्माधर्मयोः, जीवानां समचतुरस्रादि, अजीवानां परिमण्डल-वृत्त-त्र्यस्र-चतुरस्रा-ऽऽयतरूपम्, कालो मनुष्यक्षेत्राकृतिः, तस्य तत्रैव भावात् । तथा **आसनमा**धारः सर्वेषां लोकाकाशम् । **विधानानि** भेदाः धर्मास्तिकायः धर्मास्तिकायदेशः धर्मास्तिकायप्रदेश इत्यादि । तथा एषां **मानान्या**त्मीयप्रमाणानि। **उत्पादस्थितिभङ्गादिपर्यायाश्च ये द्रव्याणां** तत्र धर्मास्तिकायो वर्तमानसमयसम्बन्धरूपापेक्षयोत्पद्यते। अतीतसमयसम्बन्धरूपापेक्षया विनश्यति । धर्मास्तिकायद्रव्यात्मना तु नित्यः, एवं सर्वेषाम् ।। ५२।।

**पंचत्थिकायमइयं, लोगमणाइणिहणं जिणक्खायं ।**
**णामाइभेयविहियं, तिविहमहोलोयभेयाइं ।।५३।।**

**अर्थलेशः - पंचत्थि गाथा** ।। सुधीरेवंविधं **लोकं** विचिन्तयेत् । किं विशिष्टं लोकम् ? **पञ्चास्तिकायमयः** १-धर्म्मास्तिकायः, २-अधर्म्मास्तिकायः, ३-आकाशास्तिकायः, ४-जीवास्तिकायः, ५-पुद्गलास्तिकायः । एतैरस्तिकायैः परिपूर्णमित्यर्थः। तथा **अनादिनिधनमा**द्यंतरहितम्, अपरं **जिनाख्यातं**

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

वीतरागोपदिष्टं तथा **नामादिभेदविहितं** चतुर्विंशतिस्तवे नामादिभि दृष्टप्रकारैः प्ररूपितं तथा **अधोलोकभेदादिभिस्त्रिविधम्** - अधोलोकः १, तिर्यग्लोकः २, उर्ध्वलोकः ३, एवं त्रिभेदम् ।।५५।।

**दीपिका— पञ्चास्तिकायमयम्,** अस्तयः प्रदेशास्तेषां कायाः समुदाया अस्तिकायास्ते पञ्च, धर्म्माधर्म्माकाशजीवपुद्गलास्तिकायरूपास्तन्मयम्। कालोऽस्तिकायो न, तस्य स्थिरत्वेन प्रदेशचयाभावात्। तथा**ऽनादिनिधनम्, जिनाख्यातं नामलोकादि**पूर्वोक्ताष्ट**भेदभिन्नमधोलोकादिभेदं त्रिविधं लोकं** चिन्तयेत् ।।५३।।

**अवचूर्णिः - पञ्चास्तिकायमयम्,** अस्तिकायाः - धर्म्मास्तिकायादयस्तेषां चेदं स्वरूपं—

'जीवानां पुद्गलानां च, गत्युपग्रहकारणम्। धर्म्मास्तिकायो ज्ञानस्य दीपश्चक्षुष्मतो यथा ।।१।।
जीवानां पुद्गलानां च, स्थित्युपष्टम्भकारणम् । अधर्मः पुरुषस्येव, तिष्ठासोरवनिस्समा ।।२।।
जीवानां पुद्गलानां च, धर्म्माधर्म्मास्तिकाययोः। बदराणां घटो यद्व-दाकाशमवकाशदम् ।।३।
ज्ञानात्मा सर्वभावज्ञः, भोक्ता कर्त्ता च कर्म्मणाम् । नानासंसारिमुक्ताख्यः जीवः प्रोक्तो जिनागमे ।। ४।।
स्पर्शरसगन्धवर्ण-शब्दमूर्त्तस्वभावकाः। सङ्घातभेदनिष्पन्नाः, पुद्गला जिनदेशिताः ।। ५ ।।'

**जिनाख्यातमि**त्यादरख्यापनार्थत्वान्न पुनरुक्तम्, उक्तं च –

'अनुवादादरवीप्साभृशार्थविनियोगहेत्वसूयासु ।
ईषत्सम्भ्रमविस्मयगणनास्मरणेष्वपुनरुक्तम् ।। १ ।।' तथा **नामादिभेदभिन्नं -**

'नामं ठवणा दविए, खित्ते काले भवे अ भावे अ ।
पज्जवलोगो अ तहा, अट्ठविहो लोगनिक्खेवो ।। १।।'

अर्थः पूर्ववत्, क्षेत्रलोकमधिकृत्याह–**त्रिविधमधोलोकादिभेदम्** ।। ५३।।

**अवचूरिः -** किञ्च - **पंच०** ।। **पञ्चास्तिकायमयं** तत्रास्तयः प्रदेशास्तेषां काया, एते च धर्मास्तिकायादयस्तेषां चेदं स्वरूपम्,

"जीवानां पुद्गलानां च, गत्युपग्रहकारणम् । धर्मास्तिकायो ज्ञानस्य, दीपश्चक्षुष्मतो यथा ।।
जीवानां पुद्गलानां च, स्थित्युपग्रहकारणम् । अधर्मः पुरुषस्येव, तिष्ठासोरवनिस्समा ।।
जीवानां पुद्गलानां च, धर्माधर्मास्तिकाययोः । बदराणां घटो यद्व-दाकाशमवकाशदम् ।।
ज्ञानात्मा सर्वभावज्ञः, भोक्ता कर्ता च कर्मणाम् । नाना संसारिमुक्ताख्यः, जीवः प्रोक्तो जिनागमे ।।
स्पर्श-रस-गन्ध-वर्ण-शब्द-मूर्त्तस्वभावकाः । सङ्घातभेदनिष्पन्नाः, पुद्गला जिनदेशिताः ।।

**लोकम् अनाद्यनिधनम् जिनाख्यातमि**त्यादरख्यापनार्थत्वात्, न पुनरुक्तः । तथा **नामादिभेदभिन्नम्,**

"नामं ठवणा दविए, खेत्ते काले भवे अ भावे य । पज्जवलोगो य तहा, अट्ठविहो लोगनिक्खेवो ।

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

अर्थः पूर्ववत्, क्षेत्रलोकमधिकृत्याह - **त्रिविधमधोलोकभेदादिम्** ।।५३।।

**टीका** - किञ्च - **नामादिभेदविहितं** नामस्थापनादिभेदैश्चतुर्विंशतिस्तवे स्थापितम्, **त्रिविधमधोलोकोर्ध्वलोकतिर्यग्लोकभेदात्** ।।५३।।

**खिइवलयदीवसागरनरयविमाणभवणाइसंठाणं ।**
**वोमाइपइट्ठाणं, निययं लोगट्ठिइविहाणं ।। ५४ ।।**

**अर्थलेशः खिइ गाथा** ।। सुधी**र्नियतं लोकस्थितिविधानं** लोकस्य संस्थानप्रकारं चिन्तयेत्। किं विशिष्टं लोकस्थितिविधानम्? **क्षितिवलयद्वीपसागरनरकविमानभवनादिसंस्थानम्** । **क्षिति** पृथ्वी, **वलयानि** घनोदधिघनवाततनुवातसंज्ञानि, **द्वीपाः सागराश्च** असङ्ख्येयाः, **नरकाः** सप्त, **विमानानि** ज्योतिष्कसौधर्म्मदेवलोकादीनि, **भवनानि** असुरकुमारादीनाम् **आदि**शब्दान्मेरुपर्वतादयः पदार्थाः । तेषां **संस्थानं** रचना यत्र तथा **व्योमादिप्रतिष्ठानम्** आकाशादिप्रतिष्ठासहितम् ।। ५६ ।।

**दीपिका**— तत्र च – क्षितयो धर्म्माद्याः ईषत्प्राग्भारान्ताः ८। **वलयानि** घनोदधिघनतनुवातात्मकानि भूमिसप्तकोपरिक्षेपीणि, **द्वीपाब्धयो**ऽसङ्ख्याः, **निरया** - नरकाः, **विमानानि** ज्योतिष्कादीनामनुत्तरान्तानाम्, **भवनान्य**सुरादीनाम्, **आदि**तो व्यन्तरपुराणि तेषां क्षितिवलयादीनां **संस्थानमा**कारविशेषं, **('वोमाइ')** आदितो वाय्वादौ **प्रतिष्ठानम**वस्थितिर्यस्य तद्, **नियतं** शाश्वतम्, **लोकस्थितेर्विधानं** प्रकारस्तच्चिन्तयेत्। उक्तः संस्थानविचयो धर्म्मध्यानस्य तुर्यो भेदः ४ ।। ५६ ।।

**अवचूर्णिः** - तस्मिन्नेव क्षेत्रलोके इदं विचिन्तयेद्– **क्षितयो** घर्म्माद्या ईषत्प्राग्भारावसाना अष्टौ भूमयः, **वलयानि** घनोदधिघनतनुवातात्मकानि घर्मादिसप्तपृथिवीपरिक्षेपीण्येकविंशतिः, **द्वीपाः सागराश्चा**सङ्ख्येयाः, **निरयाः** सीमन्तकाद्याः, **विमानानि** ज्योतिष्कादिसम्बन्धीनि, **भवनानि** असुरादिदशनिकायसम्बन्धीनि, **आदि**शब्दादसङ्ख्येयव्यन्तरनगरपरिग्रहः, एतेषां **संस्थानं** विचिन्तयेत्, तथा **व्योम** आकाशम्, **आदि**शब्दाद्वाय्वादिपरिग्रहः, व्योमादौ **प्रतिष्ठानम**स्येति तत्तथा, **लोकस्थितिविधानम्, विधानं** प्रकारः, लोकस्य स्थितिर्मर्यादा तद्विधानम्, **नियतं** नित्यं शाश्वतं चिन्तयेत् ।।५४।।

**अवचूरिः** - किञ्च तस्मिन्नेव क्षेत्रलोके इदं चेदं च विचिन्तयेदित्याह - **खिइ०** ।। **क्षितयो** घर्माद्या ईषत्प्राग्भारावसाना अष्टौ भूमयः । **वलयानि** घनोदधि-घनवात-तनुवातात्मकानि घर्मादि-सप्तपृथिवीपरिक्षेपीण्येकविंशतिः । **द्वीपाः** । **सागराः** असंख्येयाः । **निरयाः** सीमन्तकाद्याः **विमानानि** द्योतकादिसम्बन्धीनि । **भवनानि** भवनवास्यालयलक्षणानि । **आदि**शब्दाद् व्यन्तरनगरग्रहः । एतेषां **संस्थानमा**कारविशेषलक्षणं चिन्तयेद्, **व्योम** आकाशम्, **आदि**शब्दाद् वाय्वादिग्रहः, व्योमादौ **प्रतिष्ठानम**स्य तत्, **लोकस्थितिविधानमिति** योगः, **विधानं** प्रकारः **लोकस्य स्थितिः** मर्यादा त**द्विधानं नियतं** नित्यं - शाश्वतं विचिन्तयेत् ।।५४।।

**टीका** - इदं च लोकमध्ये चिन्तयेदित्याह - **क्षितयो** रत्नप्रभाद्याः ईषत्प्राग्भारा च, **वलयानि**

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

घनोदधिघनवाततनुवाताख्यानि, **द्वीपादि** प्रतीतम्, **व्योमादिप्रतिष्ठानं नियतं** शाश्वतम्। **लोकस्थितिविधानं** लोकस्थितिप्रकारम् ।।५४।।

**उवओगलक्खणमणाइनिहणमत्थंतरं सरीराओ ।**
**जीवमरूविं कारिं, भोइं च सयस्स कम्मस्स ।।५५।।**

**अर्थलेशः - उवओ गाथा** ।। सुधी**र्जीवम् अरुपिणं** मनसि कृत्वा ध्यायेत् । किं विशिष्टं जीवम्? **उपयोगलक्षणं** चेतनालक्षणं तथा **अनादिनिधनम्**, अपरं **शरीरात् अर्थान्तरं** पृथक्भूतम्, अपरं **स्वकस्य कर्मणो भोक्तारम्** ।।५७।।

**दीपिका-** प्रसङ्गाद् ध्यातव्यविशेषमाह— **उपयोगः** साकारानाकारादि**र्लक्षणं** यस्य, **शरीरादर्थान्तरं** पृथग्भूतम्, **जीवमरूपिणम्,** कर्म्मणः **कर्तारम्, स्वकस्य कर्म्मणो भोक्तारम्** ।।५५।।

**अवचूर्णिः - अर्थान्तरं** पृथग्भूतं **शरीरात्** शरीरेभ्यः ।। ५५ ।।

**अवचूरिः - उव० उपयोगलक्षणम् अनाद्यनिधनम् अर्थान्तरं** पृथग्भूतम् **शरीराद् अरूपिणं कर्तारं** कर्मण इति गम्यम्, **भोक्तारं स्वस्य कर्मणः** ।।५५।।

**टीका-** किञ्च - **उपयोगश्चै**तन्यं त**ल्लक्षणमनादिनिधनम्,** भवप्रवाहापेक्षया नित्यम्, **शरीरादर्थान्तरं** पृथग्भूतम् **जीवमरूपिणम् कारिणम् भोगिनं स्वकस्य कर्मणः** ।।५५।।

**तस्स य सकम्मजणियं, जम्माइजलं कसायपायालं ।**
**वसणसयसावयमणं मोहावत्तं महाभीमं ।।५६।।**

**अण्णाणमारुएरियसंजोगविजोगवीइसंताणं ।**
**संसारसागरमणोरपारमसुहं विचिंतेज्जा ।। ५७ ।।**

**तस्स य संतरणसहं सम्मद्दंसणसुबंधणमणहं ।**
**णाणमयकण्णधारं, चारित्तमयं महापोयं ।। ५८ ।।**

**संवरकयनिच्छिद्दं, तवपवणाइद्धजइवणतरवेगं ।**
**वेरग्गमग्गपडियं, विसोत्तियावीइनिक्खोभं ।। ५९ ।।**

**आरोढुं मुणिवणिया, महग्घसीलंगरयणपडिपुन्नं ।**
**जह तं निव्वाणपुरं सिग्घमविग्घेण पाविंति ।।६०।।**

**अर्थलेशः - तस्स य गाथा ।। अण्णाण गाथा ।।** सुधीः **तस्य** जीवस्य एवंविधं **संसारसागरं चिन्तयेत्** । किं विशिष्टं संसारसागरम् ? **स्वकर्म्मजनितं** निजकर्मोपार्जितम्, तथा **जन्मादिजलं** जन्मजरामरणादिपानीयसहितम्, अपरं **कषायपातालं** चत्वारकषायाः पातालकलशा यत्र, तथा **व्यसनशतश्वापदं** कष्टशतजलचरजीवसहितम्, अपरम् इदं **मोहावर्त्तं** प्रत्यक्षधनधान्यभार्यादिमोहरूपो

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

जलभ्रमिरूप आवर्त्तो यत्र तथा **महाभीमम्** अतिरौद्रम्, अपरमज्ञानमारुतेनेरितं **संयोगवियोगवीचिसन्तानम्,** तथा **अणोरपारं** पाररहितम्, तथा **अशुभम्** ।।५८-५९।।

**तस्स य गाथा** ।। **संवर गाथा** ।। **आरोढुं गाथा** ।। **मुनिवणिजा चारित्रमयं महापोतम् आरुह्य यथा परिनिर्वाणपुरं** मुक्तिनगरं यथा **शीघ्रं प्राप्नुवन्ति** सुधीस्तथा चिन्तयेत् । किं विशिष्टं चारित्रमयं महापोतम् ? **तस्य** संसारसमुद्रस्य **सन्तरणसमर्थः, सम्यग्दर्शनसुबन्धनमहार्घ्यम्** सम्यक्त्वमेव सुष्ठु बन्धनं तेन महार्घं - बहुमूल्यम्, अपरं **ज्ञानमयकर्णधारम्** ज्ञानरूपः कर्णधारो बेडीवाहो यत्र, तथा **संवरकृतनिश्छिद्रम्,** अपरं **तपःपवनाद्बद्धय[ज]वनतरवेगं** तपःपवनेन आबद्धस्तीव्रो वेगो यस्य, तथा **वैराग्यमार्गपतितम्,** अपरं **विश्रोतसिका** मनोव्याकुलताभा एव **वीचयः** ताभिर**क्षोभ्यम्,** अपरं **महार्घशीलाङ्गरत्नपरिपूर्णम्** ।।६०-६१-६२।।

**दीपिका - तस्य** जीवस्य **स्वकर्मजनितं संसारसागरं चिन्तयेत्,** किम्भूतं सागरम् ? **जन्मादिजलं** जन्मादय एव जलं यत्र, **कषायपाताल**कलशम्, **व्यसनशतश्वापदवन्तम्, 'मण'**शब्दो मत्वर्थे, **मोह एवावर्त्तो** यत्र । **अज्ञानमेव मारुतो** वायुस्**तेनेरितः** प्रेरितः **संयोगवियोगरूपो वीचीसन्तानः** कल्लोलपरम्परा यस्मिन् तम्, **'अणोरपारं'** अनाद्यनन्तम्, **अशुभं** विचिन्तयेत् ।।५६-५७।।

**तस्य च** संसारसागरस्य **'सन्तरणसहं'** तरणाय क्षमम्, तथा **सम्यग्दर्शनमेव सुबन्धनं** यस्य तम्, **अनघं** निःपापम्, अनर्घ्यममूल्यं वा, **ज्ञानमयः कर्णधारो** बेडीवाहो यत्र तम्, **चारित्रमयं** चारित्रात्मकम्, **महापोतम्, संवरेण निःछिद्रीकृतम्, तपःपवनेनाऽऽविद्धस्य** प्रेरितस्य **जवनतरः** शीघ्रतरो **वेगो** यस्य तम्, **वैराग्यमार्गे पतितम्, विश्रोतसिका** अपध्यानं ता एव **वीचयस्ताभिर्निःक्षोभ्यम्, मुनय** एव **वणिज आरुह्य,** किम्भूतं पोतम्? **महार्घाणि शीलाङ्गानि** पृथिव्याद्यारम्भत्यागरूपाणि तान्येव **रत्नानि** तैः **प्रतिपूर्णं** भृतम्, **यथा परिनिर्वाणपुरं** मुक्तिस्तत्पुरं **शीघ्रमविघ्नेन प्राप्नुवन्ति** ।। ५८-५९-६० ।।

**अवचूर्णिः — तस्य च** जीवस्य **स्वकर्म्मजनितम्, संसारसागरमिति** वक्ष्यति, **व्यसनशतश्वापदवन्तम्, व्यसनानि** दुःखानि द्यूतादीनि वा ।। ५६ ।।

**अज्ञानमारुतेनेरितः** प्रेरितः, **संयोगवियोगवीचिसन्तानो** यस्मिन् स तथा तम् ।। ५७ ।।

**अनघम्, ज्ञानमयः कर्ण्णधारः** निर्यामकविशेषो यस्मिन् स तथा तम्, **चारित्रात्मकं महापोतं विचिन्तयेत्** ।। ५८ ।।

**संवरेण कृतं निश्छिद्रम्, तपःपवनेनाऽऽविद्धः** प्रेरितः **जवनतरः** शीघ्रतरो **वेगो** यस्य स तथा तम्, **वैराग्यमार्गे पतितं** गतं **विस्रोतसिकाः** अपध्यानानि ।। ५९ ।।

**मुनिवणिजः,** पोत एव विशेष्यते - **महार्घाणि शीलाङ्गानि** पृथिवीकायसमारम्भपरित्यागादीनि, तान्येव **रत्नानि** तैः **परिपूर्णस्तम्, यथा तन्निर्वाणपुरं शीघ्रमविघ्नेन प्राप्नुवन्ति** तथा विचिन्तयेत् ।।६०।।

**अवचूरिः - तस्स०** ।। **तस्य** जीवस्य **स्वकर्मजनितं** संसारसागरमिति वक्ष्यति । **जन्मादयो**

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

आदेर्जरामरणग्रहः बहुत्वाज्जलमिव **जलं** यस्मिन्, **कषायाः** अगाधभवजननसामान्येन पातालमिव **पातालम्, व्यसनशतश्वापदवन्तं व्यसनानि** दुःखानि द्यूतादीनि वा, '**मणं**'ति देशीशब्दो मत्वर्थीयः, **मोहावर्त्तम्,** विशिष्टभ्रमिजनकत्वाद्, **अतिभया-नकम्** ।।५६।।

**अण्णा०** ।। **अज्ञानमारुतेनेरितः** प्रेरितः **संयोग-वियोग-वीचिसन्तानो** यस्मिन् स तथा तम्, '**अणोरपारं**'ति अनाद्यपर्यवसितम्, **अशुभं चिन्तयेत्,** तस्य गुणरहितस्य जीवस्य ।।५७।।

**तस्स०** ।। **तस्य च** संसारसागरस्य **संतरणसहं** समर्थम्, **सम्यग्दर्शनमेव शोभनं बन्धनं** यस्य स तथा तम्, **अनघम्** अपापम्, **ज्ञानमयः कर्णधारो** निर्यामकविशेषो यस्मिन् स तथा तम्, **चारित्रमयं** चारित्रात्मकं **महापोतं** विचिन्तयेत् ।।५८।।

**संव०** ।। आश्रवनिरोधः **संवरस्तेन कृतं निश्छिद्रं** स्थगितरन्ध्रमित्यर्थः, **तपःपवनस्तेनऽऽविद्धस्य** प्रेरितस्य **जवनतरः** शीघ्रतरो **वेगः** यस्य स तथा तम्, **वैराग्यमे**वेष्टपुरप्रापकत्वा**न्मार्ग**स्तस्मिन् **पतितः** गतः, **विस्रोतसिका** अपध्यानानि ता एवेष्टपुरप्राप्तिविघ्नहेतुत्वा**द्वीचयस्ताभिर्निक्षोभ्यः** निष्प्रकम्पस्तम् ।।५९।।

**आरो०** ।। **आरुह्य मुनिवणिजो**ऽतिनिपुणमाय-व्ययपूर्वकं प्रवृतेः । पोत एव विशिष्यते - **महार्घाणि शीलाङ्गानि** पृथिवीकायसमारम्भपरित्यागादीनि तान्येव **रत्नानि,** तैः **परिपूर्ण**स्तम्, **यथा तत्** प्रक्रान्तं **निर्वाणपुरं शीघ्रमविघ्नेन प्राप्नुवन्ति** तथा विचिन्तयेत् ।।६०।।

**टीका - तस्य** जीवस्य गुणरहितस्य **संसारसागरं विचिन्तयेत्** । किम्भूतम्? **स्वकर्मजनितं जन्मादिजलं कषायपाताल**कलशम्। **मण**शब्दो देश्यो मत्वर्थीयः ततो **व्यसनशतश्वापदवन्तं मोहावर्त्तं महाभीमम्। अज्ञानमारुतेरितसंयोगवियोगवीचिसन्तानम्, अणोरपारम्** अपारम् **अशुभम्** ।।५६-५७।।

तिसृभिः सम्बन्धः। **तस्य** संसारसागरस्य **सन्तरणसमर्थं सम्यग्दर्शनसुबन्धनम्, अनघं** निःपापम्, **ज्ञानमयो** ज्ञानात्मकः **कर्णधारो** यत्र तं **चारित्रमयं महापोतम्, संवरेण कृतनिच्छिद्रं** कृताश्रवरूपच्छिद्रस्थगनम्, **तपःपवनस्याविद्धं** ताडनं प्रेरणं तेन **जवनतरवेगम्, वैराग्यमे**वेष्टपुरप्रापकत्वा**न्मार्ग**स्तत्र **पतितम्** । **विश्रोतसिका** अपध्यानाद्यास्ता एव **वीचयस्ताभिर्निःक्षोभ्यम्, महार्घ्यशीलाङ्गरत्नप्रतिपूर्णमारुह्य मुनिवणिजो यथा तं निर्वाणपुरं शीघ्रमविघ्नेन प्राप्नुवन्ति** तथा चिन्तयेदिति वर्त्तते ।।५८-५९-६०।।

**तत्थ य तिरयणविणिओगमइयमेगंतियं निराबाहं ।**
**साभावियं निरुवमं, जह सोक्खं अक्खयमुवेंति ।।६१।।**

**अर्थलेशः - तत्थ य गाथा** ।। **तत्र** मुक्तिनगरे जीवा **यथा अक्षयसौख्यमुपयाति** । किं विशिष्टं सौख्यम् ? त्रिय[त्रि]रत्नविनियोगमयं त्रिय[त्रि]रत्नानि ज्ञानदर्शनचारित्राणि तेषां **विनियोगो** व्यापारः **तन्मयं** तत्सहितमित्यर्थः, तथा **एकान्तिकः** एको अन्तो संसारस्य यत्र यद्वा एकान्तिकम् एकं सुखमेव न तु दुःखम्, अपरम् **अनाबाधं** शूलाद्याबाधारहितं तथा **स्वाभाविकम्,** अपरं **निरूपमं** धर्म्मध्याता तथा चिन्तयेत् ।।६३।।

**दीपिका - तत्र** निवृत्तौ, **त्रिरत्नी** ज्ञानादिका तस्या **विनियोगः** क्रिया तस्मादुत्पन्नत्वात् **तन्मयम्,**

**एकान्तिकम्** एकान्तभावि, **निराबाधं स्वाभाविकम**कृत्रिमम्, **शाश्वतम्, निरुपमम्, सौख्यं यथोपयान्ति** लभन्ते तथा विचिन्तयेत् ।। ६१ ।।

**अवचूर्णिः - तत्र च** निर्वाणपुरे **त्रिरत्नानि** ज्ञानादीनि, **विनियोगश्चैषां** क्रियाकरणम्, ततः प्रसूतेः तदात्मकम्, **तथैकान्तिकमे**कान्तभावि, **यथा सौख्यमक्षयमुपयान्ति** प्राप्नुवन्ति, क्रिया पूर्ववत् ।। ६१।।

**अवचूरिः - तत्थ०** ।। **तत्र च** निर्वाणपुरे **त्रीणि रत्नानि** ज्ञानादीनि **विनियोगश्चैषां** क्रियाकरणं तदात्मकं ततः प्रसूतेः तथा **ऐकान्तिकम्** ऐकान्तभावि **[निराबाधम् स्वाभाविकं निरूपमम्] यथा सौख्यम् अक्षयमुपयान्ति** प्राप्नुवन्ति तथा चिन्तयेत् ।।६१।।

**टीका - तत्र च** निर्वाणपुरे **त्रीणि रत्नानि** ज्ञानादीनि तेषां **विनियोगस्तेन** निर्वृत्तं **त्रिरत्नमयम्, एकान्तिकम्, निराबाधम्, स्वाभाविकम**कृत्रिमम्, **निरुपमं यथा सौख्यमक्षयमुपयान्ति** गच्छन्ति तथा चिन्तयेत् ।। ६१।।

**किं बहुणा ? सव्वं चिय, जीवाइपयत्थवित्थरोवेयं।**
**सव्वनयसमूहमयं, झाइज्जा समयसब्भावं ।। ६२।।**

**अर्थलेशः - किं बहुणा गाथा** ।। **किं बहुना** प्रोक्तेन? सुधीः **सर्वमेव समयसद्भावं** सिद्धान्ततत्वं **ध्यायेत्** । किं विशिष्टं समयसद्भावम्? **जीवादिपदार्थविस्तारोपेतं** तथा **सवर्नयसमूहमयम्** ।।६२।।

**दीपिका - किं बहुनोक्तेन? जीवाजीवादिपदार्थविस्तरोपेतम्, समयसद्भावं** सिद्धान्तस्वरूपम् ।। ६२।। उक्तं ध्यातव्यद्वारम्।

**अवचूर्णिः - किं बहुना** भाषितेन ? **सर्वमेव जीवादिपदार्थविस्तरोपेतम्, सर्वनयसमूहात्मकं ध्यायेत्समयसद्भावं** सिद्धान्तार्थम्।।६२।।

**अवचूरिः - किं बहु०** ।। **किं बहुना** भाषितेन ? **सर्वमेव जीवादिपदार्थविस्तारोपेतं सर्वनयसमूहात्मकं ध्यायेत् समयसद्भावं** सिद्धान्तार्थम् ।।६२।। द्वार-७

**टीका - किं बहुना** भाषितेन ? **सर्वमेव जीवादिपदार्थविस्तरोपेतम्, सर्वनयसमूहमयं ध्यायेत्। समयसद्भावं** सिद्धान्तसारम् ।। ६२ ।।

**सव्वप्पमायरहिया, मुणओ खीणोवसंतमोहा य ।**
**झायारो नाणधणा धम्मज्झाणस्स निद्दिट्ठा ।। ६३ ।।**

**अर्थलेशः - सव्व गाथा** ।। **धर्म्मध्यानस्य ध्यातारो मुनयो** भवन्ति । किं विशिष्टा मुनयः ? **सर्वप्रमादरहिताः**, तथा **क्षीणोपशान्तमोहाः**, अपरं **ज्ञानधनाः**। एवंविधा ध्यातारो **निर्दिष्टाः** ।।६५।।

**दीपिका** - अथ ध्यातृद्वारम्— **सर्वप्रमादरहिता** इत्यप्रमत्ताः **क्षीणमोहा उपशान्तमोहाश्च, मुनयो ज्ञानधना धर्म्मध्यानस्य ध्यातारः** स्युः । अप्रमत्तोपशान्तमोहक्षीणमोहानामेकादशाङ्गविदां प्रायो धर्म्मध्यानं स्यात् ।। ६३ ।।

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

**अवचूर्णिः** - अथ येऽस्य **ध्यातारस्**तानाह - **क्षीणोपशान्तमोहाश्च, च**शब्दादन्ये वाऽप्रमादिनो **ध्यातारो धर्म्मध्यानस्य** ।।६३।।

**अवचूरिः** - गतं ध्यातव्यद्वारम्, अथ येऽस्य ध्यातारस्तान् आह - **सव्व०** ।। **सर्वप्रमादैः रहिता मुनयः क्षीणोपशान्तमोहाश्च** इति क्षीणमोहा उपशान्तमोहाश्चब्दादन्ये वाऽप्रमादिनः **ध्यातारश्चि**न्तका **धर्मध्यानस्य** । ध्यातार एव विशेष्यन्ते - **ज्ञानधनाः** ।।६३।।

**टीका** - गतं ध्यातव्यद्वारम्, ध्यातॄनाह-स्पष्टा । नवरं **च**शब्दादन्येप्यऽप्रमादिनः ।। ६३।।

**एएच्चिय पुव्वाणं, पुव्वधरा सुप्पसत्थसंघणया ।**
**दोण्ह सजोगाजोगा, सुक्काण पराण केवलिणो ।। ६४।।**

**अर्थलेशः - एएच्चिय गाथा** ।। शुक्लध्यानस्य **पूर्वयो**र्भेदयो**रेते एव** पूर्वोक्ताः अप्रमत्तो मुनयो ध्यातारः स्युः । किं विशिष्टा एते? **पूर्वधराः**, अपरं **सुप्रशस्तसङ्घनना** वज्रऋषभनाराचसंघननयुक्ताः। तथा **परयोः शुक्लध्यानभेदयोर्ध्या**तारः **केवलिनः सयोगगुणस्थानवर्त्तिनः अयोगगुणस्थानवर्त्तिनश्च** ज्ञेयाः ।।६६।।

**दीपिका** - लाघवार्थं शुक्लध्यानाद्यभेदयोरपि ध्यातॄन्नाह– अप्रमत्ता उपशामकाः क्षपकाश्च **एते एव** च प्रागुक्ताः शुक्लस्य **पूर्वयोर्द्व**योर्भेदयोः पृथक्त्ववितर्कसविचारम्- एकत्ववितर्कअविचारं इत्यनयोर्ध्यातारः, परं चतुर्दश**पूर्वधराः** पूर्वेषूपयुक्ता एव सन्तो ध्यातारोऽन्ये तु माषतुषमरुदेव्यादयो यथासम्भवमप्रमत्तक्षीणमोहत्वादिविशेषेण युक्ता ध्यातारः, **'सुप्प'** आद्यसंहननाः। उपशामकस्य क्षपकस्य च केवलज्ञानादर्वाक् शुक्लध्यानाद्यभेदद्वयं स्यात् । **परयोः शुक्ल**भेदयोः सूक्ष्मक्रियाऽनिवर्त्ति-उपरतक्रियाऽप्रतिपातिनोः क्रमात् **सयोगायोगाः केवलिनो** ध्यातारः, यतः 'सुक्कज्झाणाइदुगं वोलीणस्स तइयमप्पमत्तस्स एयाए झाणंतरियाए वट्टमाणस्स केवलं उप्पज्जइ, केवली सुक्कलेसो अज्झाणी य जाव सुहमकिरियमनियट्टि' त्ति ।।६४ ।।

**अवचूर्णिः** - लाघवार्थं शुक्लध्यानस्याप्याह— **एते एव** ये धर्म्मध्यानस्य ध्यातार उक्ताः, **पूर्वयोः** शुक्लध्यानभेदयोः पृथक्त्ववितर्कसविचारम्- एकत्ववितर्कमविचारमित्यनयोर्ध्यातारः, अयं पुनर्विशेषः- **पूर्वधराश्च**तुर्दशपूर्वविदः तदुपयुक्ताः, इदं च पूर्वधरविशेषणमप्रमादवतामेव ज्ञेयम्, न क्षीणमोहादीनां [निर्ग्रन्थानाम्], माषतुषमरुदेव्यादीनामपूर्वधराणामपि तदुपपत्तेः, **सुप्रशस्तसंहननाः** आद्यसंहननयुक्ताः, इदमोघत एव विशेषणम्, तथा **द्वयोः शुक्लयोः परयोः** सूक्ष्मक्रियानिवृत्ति-व्युपरतक्रियाऽप्रतिपातलक्षणयोर्यथासङ्ख्यं **सयोगायोगकेवलिनो** ध्यातारः ।। ६४ ।।

**अवचूरिः** - लाघवार्थं साम्प्रतं शुक्लध्यानस्याप्याह - **एए०** ।। **एत एव** ये धर्मध्यानस्य ध्यातार उक्ताः **पूर्वयोराद्य**योर्द्वयोः शुक्लध्यानभेदयोः पृथक्त्ववितर्कसविचारमेकत्ववितर्कमविचारमित्यनयोः ध्यातारः । अयं पुनर्विशेषः - **पूर्वधराश्च**तुर्दशपूर्वविदस्तदुपयुक्ताः, इदं च पूर्वधरविशेषणमप्रमादवतामेव वेदितव्यम्, न क्षीणमोहादीनाम्,

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

माषतुष- मरूदेव्यादीनामपूर्वधराणामपि तदुपपत्तेः, **सुप्रशस्तसंहननाः** आद्यसंहननयुक्ताः, इदं पुनरोघत एव विशेषणम्, तथा **द्वयोः शुक्लयोः परयोरु**त्तरकालभाविनोः सूक्ष्मक्रियानिवृत्ति-उपरतक्रियाअप्रतिपातिलक्षणयोर्यथासङ्ख्यं **सयोगायोगाः केवलिनो** ध्यातारः ।।६४।। द्वार - ८

**टीका** - प्रस्तावात् शुक्लध्यानस्याऽपि ध्यातॄनाह— **एते एव** धर्मध्यानध्यातारः, एवं **पूर्वयोः** शुक्लध्यानभेदयोः पृथक्त्ववितर्कसविचारैकत्ववितर्काविचारयोः ध्यातारः। एष तु विशेषः - इह ध्यातारः प्रायः **पूर्वधराश्च**तुर्दशपूर्वविदः तदुपयुक्ताः **सुप्रशस्तसंहननाः** आद्यसंहनिनः। **द्वयोः परयोः शुक्ल**ध्यानभेदयोः **सयोगायोगकेवलिनो** ध्यातारः । यतः "सुक्कझाणदुग्गं वोलीणस्स तइयमप्पत्तस्स एयाए । झाणंतरियाए वट्टमाणस्स केवलनाणमुप्पज्जइ ।१।" ।। ६४ ।।

**झाणोवरमेऽवि मुणी, णिच्चमणिच्चाइचिंतणापरमो ।**
**होइ सुभावियचित्तो, धम्मज्झाणेण जो पुव्विं ।। ६५।।**

**अर्थलेशः - झाणो गाथा** ।। **मुनिर्ध्यानोपरमेऽपि** ध्याननिवृत्तावपि **नित्यमनित्यतादि-चिन्तनापरमो भवति । यः** साधुः **पूर्वं धर्म्मध्यानेन सुभावितचित्तो** भवति ।।६७।।

**दीपिका** - उक्तं ध्यातृद्वारम्, अथानुप्रेक्षाद्वारम्— **यः पूर्वं धर्म्मध्यानेन सुभावितचित्तः** स **ध्यानोपरमे** ध्यानविगमे**ऽपि नित्यमनित्यतादिभावनासु परम**स्तत्परो भवेत्। गतमनुप्रेक्षाद्वारम् ।।६५।। द्वा० ९

**अवचूर्णिः** - अनुप्रेक्षाद्वारमाह— **धर्म्मध्यानोपरमेऽपि मुनिर्नित्यमनित्यादिचिन्तनापरमः** स्यात्, अनित्यताऽशरणैकत्वसंसारानुगताश्चतस्रोऽनुप्रेक्षा भावयितव्या, अनित्यादि चिन्तनापरमः स्यात्, **सुभावितचित्तो धर्मध्यानेन यः** कश्चि**त्पूर्वम्** ।।६५।।

**अवचूरिः** - अनुप्रेक्षाद्वारमाह- **झाणो०** ।। धर्म**ध्यानोपरमेऽपि मुनिर्नित्यं** सर्वकाल**मनित्यादिचिन्तनापरमो स्यात्, आदि**शब्दादशरणैकत्वसंसारपरिग्रहः । एताश्च चतस्रोऽनुप्रेक्षा भावयितव्याः । किंविशिष्टोऽनित्यादिचिन्तनापरमो स्यादत आह - **सुभावितचित्तः** सुवासितान्तःकरणः **धर्मध्यानेन यः** कश्चित् **पूर्वमा**दौ स्यात् ।।६५।। द्वार-९

**टीका** - अथानुप्रेक्षाद्वारमाह - **यः पूर्वं धर्मध्यानेन सुभावितचित्तो भवति** ।। ६५ ।।

**होंति कमविसुद्धाओ, लेसाओ पीयपम्मसुक्काओ ।**
**धम्मज्झाणोवगयस्स, तिव्वमंदाइभेयाओ ।। ६६ ।।**

**अर्थलेशः - होंति गाथा** ।। **धर्म्मध्यानोपगतस्य** जीवस्य **पीत-पद्म-शुक्ललेश्या भवन्ति** । किं विशिष्टा लेश्याः? **क्रमविशुद्धाः** क्रमेण पूर्वा पीतलेश्या-तेजोलेश्या शुद्धा, ततोपि पद्मलेश्या गाढतरं शुद्धा, ततोपि शुक्ललेश्या अतिगाढतरं शुद्धा। पुनः किं विशिष्टा लेश्याः? **तीव्रमन्दादिभेदाः** ।। ६८।।

**दीपिका** - अथ **लेश्याः** - **धर्म्मध्यानोपगतस्य क्रमेण विशुद्धाः पीतपद्मशुक्ललेश्याः** परिणाम-विशेषा**स्तीव्रमन्दादिभेदाः, आदि**शब्दान्मध्यमाश्च **स्युः,** कोऽर्थः—जघन्ये शुभभावे पीतलेश्या, मध्यमे शुभभावे

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

पद्मलेश्या, उत्कृष्टशुभभावे शुक्ललेश्या स्यात्। तत्र पीतलेश्या-तेजोलेश्या ।। ६६ ।। द्वा० १०

**अवचूर्णिः** - लेश्याद्वारमाह - **क्रमविशुद्धाः** परिपाटिविशुद्धाः, अयमर्थः - पीतलेश्यायाः पद्मलेश्या विशुद्धा, तस्या अपि शुक्ललेश्या, एताः परिणामविशेषा**स्तीव्रमन्दादिभेदाः** ।।६६।।

**अवचूरिः** - [लेश्याद्वारमाह- **होंति०** ।। **भवन्ति क्रमविशुद्धाः लेश्याः** ताश्च **पीत-पद्म-शुक्लाः, धर्मध्यानोपगतस्य तीव्रमन्दादिभेदाः** तीव्रभेदाः पीतादिरूपेष्वन्त्याः मन्दभेदास्त्वाद्याः, आदिशब्दान्मध्य-मपक्षपरिग्रहः, अथवौघत एव परिणामविशेषात् तीव्रमन्दभेदाः ।।६६।।] द्वार-१०

**टीका** - लेश्याद्वारमाह - स्पष्टा । नवरं परिणामवशा**त्तीव्रमन्दादिभेदाः** ।।६६।।

**आगमउवएसाणाणिसग्गओ जं जिणप्पणीयाणं ।**
**भावाणं सद्दहणं, धम्मज्झाणस्स तं लिगं ।। ६७ ।।**

**अर्थलेशः - आगम गाथा** ।। सद्भावानां धर्म्माधर्म्मास्तिकायादीनां **श्रद्दधानं धर्म्मध्यानस्य तल्लिङ्गं** स्यात् । किं विशिष्टानां भावानाम् ? **जिनप्रणीतानां** जिनभाषितानाम्, कस्मात् श्रद्दधानं स्यादित्याह । **आगमतः** सिद्धान्तपठनात्, अपरं **उपदेशतो** गुरुवचनात्, यद्वा **आज्ञातः** वीतरागेण कथितं सत्यमेवेति भावात्, यद्वा **निसर्गतो** जीवस्य सुलभबोधित्वात् ।।६९।।

**दीपिका** - अथ लिङ्गद्वारम्— १-**आगमः** सूत्रम्, २-**उपदेशो**ऽर्थकथनम्, ३-**आज्ञा**ऽर्थः, ४-**निसर्गः** स्वभाव एभ्यश्चतुर्भ्यो **यत् जिनप्रणीतानां** श्रद्धानम्। इह चूर्णिः 'लक्खणाणि इमाणि चत्तारि-आणारुईनिसग्गरुईसुत्तरुईओगाहणारुई । आणारुई तित्थगराणं पसंसन्ति, निसग्गरुई सभावतो जिणप्पणीए भावे रोचइ, सुत्तरुई सुत्तं पढन्तो संवेगमावज्जति, ओगाहणारुई णयवादभंगगुविलं सुत्तं अत्थतो सोऊण संवेगमावन्नसड्ढो झायइ' ।। ६७ ।।

**अवचूर्णिः** - लिङ्गमाह— **आगमोपदेशाज्ञानिसर्गतः, तत्रागमः** सूत्रम्, तदनुसारेण कथन**मुपदेशः, आज्ञा** त्वर्थो, **निसर्गः** स्वभावः, **तल्लिङ्गं** तत्त्वश्रद्धानेन लिङ्ग्यते धर्म्मध्यानी ।। ६७ ।।

**अवचूरिः** - लिङ्गमाह- **आग०** ।। **आगमोपदेशाज्ञानिसर्गतो यज्जिनप्राणीतानां भावानां श्रद्धानम**वितथा एव इत्यादिरूपं **धर्मध्यानस्य तल्लिङ्गम्, आगमः** सूत्रमेव, तदनुसारेण कथन**मुपदेशः, आज्ञा** त्वर्थः, **निसर्गः** स्वभावः तत्वश्रद्धानेन लिङ्ग्यते धर्मध्यानी ।।६७।।

**टीका** - लिङ्गद्वारमाह— स्पष्टा ।। ६७ ।।

**जिणसाहुगुणुक्कित्तणपसंसणाविणयदाणसंपण्णो ।**
**सुअसीलसंजमरओ धम्मज्झाणी मुणेयव्वो ।। ६८ ।।**

**अर्थलेशः - जिण गाथा** ।। **धर्म्मध्यानध्याता** एवंविधो **ज्ञातव्यः**। किं विशिष्टो धर्म्मध्यानध्याता? **जिनसाधुगुणकीर्त्तनप्रशंसनाविनयदानसम्पन्नः**। तत्र **कीर्त्तनं** लोकसाक्षिकम्, **प्रशंसना** मनसि गुणभावना,

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

अपरं **श्रुतशीलसंयमरतः** ।।६८।। धर्मध्यानं समाप्तम् ।।

**दीपिका- जिनानां साधूनां गुणोत्कीर्त्तनं** सामान्येन **प्रशंसना** स्तुतिस्ताभ्यां **दानविनयाभ्यां** च **सम्पन्नः** ।। ६८ ।। उक्तं लिङ्गद्वा० ११, फलद्वारं तु शुक्लध्यानाधिकारे वक्ष्यति ।

**अवचूर्णिः** - किञ्च– **श्रुतं** सामायिकादि, **शीलं** व्रतादिलक्षणम्, **संयमस्तु** प्राणातिपातादिनिवृत्तिलक्षणः, एतेषु **रतो धर्मध्यानी ज्ञातव्यः** ।।६८।। फलं शुक्लफलाधिकारे वक्ष्यति, उक्तं धर्म्मध्यानम् ।।

**अवचूरिः** - किञ्च- **जिण०** ।। **जिन-साधवः** प्रतीताः **तद्गुणाश्च** निरतिचार-सम्यग्दर्शनादयस्तेषा**मुत्कीर्तनं** सामान्येन संशब्दनम्, **प्रशंसा** अहो श्लाघ्यतया [भक्ति] पूर्विका स्तुतिः, **विनयो**ऽभ्युत्थानादि, **दानम्** अशनादिप्रदानम्, एतत्**सम्पन्नः**, **श्रुतं** सामायिकादि बिन्दुसारान्तम्, **शीलं** व्रतादिसमाधानलक्षणम्, **संयमस्तु** प्राणातिपातादिनिवृत्तिलक्षणः, एतेषु **रतः धर्मध्यानीति ज्ञातव्यः** ।।६८।। द्वार-११

**टीका** - किञ्च – स्पष्टा । नवरं **श्रुतं** सिद्धान्तः। **शीलं** सदाचारः । **संयमः** प्राणातिपातादिविरतिः। फलद्वारं शुक्लध्यानावसरे वक्ष्यते । उक्तं धर्मध्यानम् ।। ६८ ।।

## [अथ शुक्लध्यानम्]

**अह खंतिमद्दवज्जवमुत्तीओ जिणमयप्पहाणाओ ।**
**आलंबणाई जेहिं, सुक्कज्झाणं समारुहइ ।। ६९ ।।**

**अर्थलेशः - अह गाथा** ।। **अथ** शुक्लध्यानस्य एतानि **आलम्बनानि** भवन्ति । **यैरा**लम्बनैर्जीवः **शुक्लध्यानं समारोहति** । कानि आलम्बनानीत्याह । **क्षान्ति-मार्दव-आर्जव-मुक्तयः क्षान्तिः** उपशमः, **मार्दवं** गर्वरहितत्वम्, **आर्जवं** मायारहितत्वम्, **मुक्तिः** निर्लोभता । किं विशिष्टा क्षान्ति-मार्दव-आर्जव-मुक्तयः? **जिनमतप्रधानाः** ।।७१।।

**दीपिका** - अथ शुक्लम्, इहापि भावनादीनि द्वादशद्वाराणि । तत्राद्यानि चत्वारि तान्येव । आलम्बनादीनि त्वाह— **क्षान्त्यादयः** क्रोधादित्यागरूपाः ४ **आलम्बनानि यैरा**लम्बनैः, **तु**रेवार्थे ।। ६९ ।। द्वा० ५ ।

**अवचूर्णिः** - शुक्लस्यापि भावनादीनि द्वादश द्वाराणि स्युः, तत्र भावनादेशकालासनविशेषेषु न विशेष इत्यालम्बनादीन्याह - अथेत्यासनविशेषानन्तर्ये **क्षान्तिमार्दवार्जवमुक्तयः** क्रोधादिपरित्यागरूपाः, **जिनमतप्रधानाः** कर्मक्षयहेतुतामधिकृत्वा ततश्चैता **आलम्बनानि** ।। ६९ ।।

**अवचूरिः** - फलं लाघवार्थं शुक्लध्यानफलाधिकारे वक्ष्यति । द्वार-१२ उक्तं धर्मध्यानम् । अथ शुक्लस्यापि भावनादीनि द्वादशद्वाराणि स्युः, तत्र भावना-देश-काल-ऽऽसनविशेषेष्वविशेष इति आलम्बनान्याह- **अह०** ।। **अथ** इत्यासनविशेषानन्तर्ये **क्षान्ति-मार्दवाऽऽर्जव-मुक्तयः** क्रोधादित्यागरूपा **जिनमतप्रधानाः** कर्मक्षयहेतुतामधिकृत्य, ततश्चैता **आलम्बनानि** यैरालम्बनैः करणभूतैः **शुक्लध्यानं समारोहति** ।।६९।।

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

**टीका - अथ** शुक्लध्यान- इहाऽपि तान्येव द्वादशद्वाराणि । तत्र चतुर्ष्वाद्यद्वारेषु न पूर्वस्माद्विशेष इति तानि मुक्त्वा आलम्बनादीन्याह– स्पष्टा ।। ६९ ।।

**तिहुयणविसयं कमसो, संखिविउ मणो अणुंमि छउमत्थो ।**
**झायइ सुनिप्पकंपो, झाणं अमणो जिणो होई ।। ७० ।।**

**अर्थलेशः - तिहुयण गाथा** ।। **छद्मस्थः त्रिभुवनविषयं मनः क्रमशः अणौ** परमाणुविषये **निरुध्य ध्यानं ध्यायति**। तत **अमना** मनोरहितः सन् **जिनो** वीतरागः सन् केवली **भवति** ।।७२।।

**दीपिका** - अथ क्रमः, स चाद्ययोः शुक्लभेदयोः 'सेसस्स जहा समाहीए' इत्युक्त्या धर्मध्याने एवोक्तः, परमयं विशेषः **त्रिभुवनविषयं मनः क्रमेण** सूक्ष्मतरवस्तुध्यानरूपेण **संक्षिप्याणौ** निधायेति शेषः, **ध्यायति** शुक्ल**ध्यानम्।** ततोऽपि प्रयत्नादणोरपि मनोऽपनीय **अमना जिनः** केवली **स्यात्** ।।७०।।

**अवचूर्णिः** - क्रमश्चाद्ययोर्द्वयोर्धर्मध्यान एवोक्तः, अत्र त्वयं विशेषः– **संक्षिप्य मनः, अणौ** परमाणौ, विधायेति शेषः, **ध्यायति सुनिष्प्रकम्पो**ऽतीव निश्चलः **ध्यानं** शुक्लं, ततोऽपि प्रयत्नविशेषान्मनोऽपनीया**ऽमना जिनः स्यात्,** चरमयोर्द्वयोर्ध्यातेति शेषः, तत्राप्याद्यस्यान्तर्मुहूर्त्तेन शैलेशीमप्राप्तः, तस्यां च द्वितीयस्य ।। ७०।।

**अवचूरिः** - क्रमश्चाद्ययोर्धर्मध्यान एवोक्तः, अत्र अयं विशेषः - **तिहु०** ।। **त्रिभुवनम्** अधस्तिर्यगूर्ध्वभेदं **तद्विषयो** गोचरो यस्य, तत्त्रिभुवनविषयम् **क्रमशः** क्रमेण प्रतिवस्तुत्यागलक्षणेन **संक्षिप्य मनः** अन्तःकरणम् क्व ? **अणौ** परमाणौ निधायेति शेषः । **ध्यायति सुनिःप्रकम्पो**ऽतीवनिश्चलो **ध्यानं** शुक्लम्, ततोऽपि प्रयत्नविशेषान्मनोऽपनीय अमना **जिनः स्यात्,** चरमयोर्द्वयोर्ध्यातेति वाक्यशेषः, तत्राप्याद्यस्यान्तर्मुहूर्त्तेन शैलेशीमप्राप्तः, तस्यां च द्वितीयस्य ।।७०।।

**टीका** - क्रमद्वारमाह– **त्रिभुवनविषयं** त्रैलोक्यालम्बनं **क्रमशः** क्रमेण एकैकवस्तुत्यागरूपेण **संक्षिप्य** सङ्कोच्य **मनः अणौ** परमाणौ निवेश्य **छद्मस्थो ध्यानं** शुक्लध्यानं **ध्यायति** । **सुनिःप्रकम्पः** ततः प्रयत्नविशेषादणोरप्यपनीय **अमना जिनः** केवली **भवति** ।। ७० ।।

**जह सव्वसरीरगयं, मंतेण विसं निरुंभए डंके ।**
**तत्तो पुणोऽवणिज्जइ, पहाणयरमंतजोएणं ।। ७१ ।।**

**अर्थलेशः - जह गाथा** ।। **यथा** गारुडिकेन **सर्वशरीरगतं विषं डङ्के** दंशस्थाने **निरुध्यते ।** सर्वस्मात् शरीरात् दंशस्थाने आनीय स्थाप्यते । **ततोऽ**नन्तरं **पुनः प्रधानतरमन्त्रयोगेन** दंशस्थानादपि **अपनीयते** भूमौ पात्यते ।।७३।।

**दीपिका - निरुध्यते दंशे, ततः पुनरपनीयते** ।। ७१ ।।

**अवचूर्णिः** - आह कथंछद्मस्थस्त्रिभुवनविषयं मनः संक्षिप्याणौ धारयति ? केवली वा ततोऽप्यपनयति ?

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

उच्यते - **निरुध्यते** निश्चयेन ध्रियते **डङ्के, ततो** डङ्कात् पुन**रपनीयते प्रधानतरमन्त्रेण योगैर्वा** औषधैः ।।७१।।

**अवचूरिः -** आह - कथं पुनश्छद्मस्थस्त्रिभुवनविषयं मनः संक्षिप्य [अणौ धारयति, केवली वा ततोऽप्यपनयनि इति ? उच्यते - **जह०** ।। **यथा सर्वशरीरगतं विषं मन्त्रेण** विशिष्टानुपूर्वीलक्षणेन **डङ्के** भक्षिततदेशे **निरुध्यते ततः** डङ्कात् **पुनः प्रधानतरमन्त्रयोगेनापनीयते** ।।७१।।

**टीका -** कथमेतद्भवतीति चेदित्याह— स्पष्टा । नवरं **प्रधानतरमन्त्रयोगैः** प्रकृष्टमन्त्रेण योगैरौषधैः। अयं दृष्टान्तः।।७१।।

**तह तिहुयणतणुविसयं, मणोविसं मंतजोगबलजुत्तो ।**
**परमाणुंमि निरुंभइ, अवणेइ तओवि जिणवेज्जो ।।७२।।**

**अर्थलेशः - तह गाथा** ।। **तथा** गारुडिकदृष्टान्तेन जीव**स्त्रिभुवनतनुविषयं मनोविषं परमाणौ निरुणद्धि ।** किं विशिष्टो जीवः? **मन्त्रयोगबलयुक्तः मन्त्र**रूपं सिद्धान्तवचनं तस्य **योगेन** व्यापारेण बलं ध्यानबलं तेन **युक्तः**। **जिनवैद्यः ततोऽपि** परमाणुतो मनोविषम् **अपनयति** ।।७४।।

**दीपिका- त्रिभुवनमेव तनुर्देहः, मन्त्रो** जिनवचनं तस्य **योगो** ध्यानं तदेव **बलं** तेन **युक्तः** । **परमाणौ निरुणद्धि, जिनवैद्यः** क्षीणमोहरूपो वैद्य**स्ततोऽप्यनयति** ।। ७२ ।।

**अवचूर्णिः -** उपनयमाह— **त्रिभुवनतनुविषयं मन्त्रयोगबलयुक्तो** जिनवचनध्यानसामर्थ्यसम्पन्नः, **ततोऽपि परमाणौ जिनवैद्यः** ।।७२।।

**अवचूरिः -** एषः दृष्टान्तः, अयमर्थोपनयः - **तह०** ।। **तथा त्रिभुवनतनुविषयं** मन एव] भवमरणनिबन्धनत्वाद्विषं **मनोविषम्, मन्त्रयोगबलयुक्तः** जिनवचनध्यानसामर्थ्यसम्पन्नः **परमाणौ निरुणद्धि,** अचिन्त्य प्रयत्ना**च्चापनयति ततोऽपि** परमाणोः **जिनवैद्यः** ।।७२।।

**टीका** - उपनयमाह— **तथा त्रिभुवनतनुविषयं मनोविषं** भवरूपमृत्युकरत्वात् , **योगमन्त्रबलयुक्तः** जिनवचनध्यानसामर्थ्यसम्पन्नः **परमाणौ निरुणद्धि** प्रयत्नविशेषा**त्ततोऽप्यपनयति जिनवैद्यः** ।।७२।।

**ओसारियेंधणभरो, जह परिहाइ कमसो हुयासो वा ।**
**थोविंधणावसेसो, निव्वाइ तओऽवणीओ य ।। ७३।।**

**अर्थलेशः - उस्सारि गाथा** ।। **वा** अथवा **यथा हुताशनोऽपसारितेन्धन**भरः स्तोकीकृतेन्धनसमूहः **परिहीयते** । अथ **स्तोकेन्धनावशेषो** भवति । **ततो**ऽपीन्धनाद् **अपनीतो** पृथक्कृतो **निर्वाति** विध्यायति ।।७५।।

**दीपिका - वा** अथवा, **यथापसारितेन्धनभरो हुताशः क्रमेण परिहीयते** स च **स्तोकेन्धनावशेषो** हुताशमात्रं जात**स्ततः** स्तोकेन्धना**दपनीतो निर्वाति** ।। ७३ ।।

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

**अवचूर्णिः** - दृष्टान्तरमाह - **अपसारितेन्धनभरो हुताशो, वा** विकल्पार्थः, **स्तोकेन्धनावशेषो** हुताशमात्रं स्यात्तथा **निर्वाति, ततः** स्तोकेन्धना**दपनीतश्च** ।। ७३ ।।

**अवचूरिः** - दृष्टान्तरमाह- **उस्सा०** ।। **अपसारितेन्धनभरः यथा परिहीयते** हानिं याति **क्रमेण हुताशो वा** विकल्पार्थः **स्तोकेन्धानावशेषो** हुताशमात्रं स्यात् तथा **निर्वाति ततः** स्तोकेन्धना**दपनीतः** ।।७३।।

**टीका** - अत्रैव दृष्टान्तरमाह - **अपसारितेन्धनभरः** स्तोकेन्धनावशेषो **यथा हुताशः क्रमशः परिहीयते ततोप्यपनीतो निर्वाति** ।। ७३ ।।

**तह विसइंधणहीणो, मणोहुयासो कमेण तणुयम्मि ।**
**विसइंधणे निरुंभइ, निव्वाइ तओऽवणीओ य ।।७४।।**

**अर्थलेशः - तह विस गाथा** ।। **तथा** अग्निदृष्टान्तेन **मनोहुताश विषयेन्धनहीनः** सर्वपदार्थ-रूपेन्धनरहितः सन् **क्रमेण तनुके** परमाणुरूपे **विषयेन्धने निरुध्यते । ततो**ऽपि **परमाणुतोऽपनीतः** सन् **निर्वाति** ।।७४।।

**दीपिका - तथा मनोहुताशो विषयेन्धनहीनः** क्रियमाणः क्रमात् **तनुके विषयेन्धने**ऽणुरूपे **निरुध्यते** ।। ७४ ।।

**अवचूर्णिः - क्रमेण तनुके** कृशे **विषयेन्धने अणौ निरुध्यते** ।। ७४ ।।

**अवचूरिः - तह०** ।। **विषयेन्धनहीनो मनोहुताशः क्रमेण तनुके** कृशे **विषयेन्धने** अणावित्यर्थः, निरुध्यते **निर्वाति ततस्त**स्मादणो**रपनीतः** ।।७४।।

**टीका** - अत्राप्युपनयमाह - **तथा विषयेन्धनहीनो मन** एव दुःखदाहकारणत्वाद् **हुताशः, क्रमेण तनुके** कृशे **विषयेन्धने निरुध्यते । ततोप्यपनीतो निर्वाति** ।। ७४ ।।

**तोयमिव नालियाए, तत्तायसभायणोदरत्थं वा ।**
**परिहाइ कमेण जहा, तह जोगिमणोजलं जाण ।। ७५।।**

**अर्थलेशः - तोयमिव गाथा** ।। **यथा नाडिकाया** घटिकायाः छिद्रेण कुण्डिका**जलं** क्रमेण हीयते। **यद्वा तप्तायसभाजनोदरस्थानम्** अग्नितप्तलोहमयभाजनमध्यस्थितं जलं **क्रमेण हीयते । तथा योगिनां मनोजलं जानीहि** ।।७५।।

**दीपिका - इव** यथार्थे, **नाडिकाया** घटिकायाः छिद्रेण **तोयं** हीयते, **वा** अथवा, **तप्तायोभाजनोदरस्थं तोयं क्रमेण हीयते तथा** ध्यानछिद्रेण ध्यानानलतप्तात्मपात्रस्थं वा छद्मस्थ**योगिमनोऽम्बु** हीयते, एवं **जानीहि** ।। ७५।।

**अवचूर्णिः** - पुनर्दृष्टान्तोपनयावाह— **नालिकायाः** घटिकायाः, तथा **तप्तं** च त**दायसभाजनं** च, **तदुदरस्थं** वा, योगिमनोजलं जानीहि ।। ७५ ।।

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

**अवचूरिः** - पुनर्दृष्टान्तोपनयावाह- **तोय०** ।। **तोयमिव** उदकमिव **नालिकाया** घटिकायास्तथा **तप्तं** च **तदायसभाजनं** लोहभाजनं च तप्तायसभाजनं **तदुदरस्थं वा** विकल्पार्थः **परिहीयते क्रमेण यथा तथा योगिमनोजलं जानीहि** ।।७५।।

**टीका** - पुनरत्रैव दृष्टान्तोपनयावाह— **यथा तोयं नालिकाया** घटिकायाः यथा **वा तप्तलोहभाजनोदरस्थं जलं क्रमेण परिहीयते, तथा योगिमनोजलं** परिहीयते - स्वल्पीभवति । एवं केवलिनो मनोयोगनिरोध उक्तः ।। ७५ ।।

**एवं चिय वयजोगं, निरुंभई कमेण कायजोगंपि ।**
**तो सेलेसोव्व थिरो, सेलेसी केवली होइ ।। ७६ ।।**

**अर्थलेशः - एवं चिय गाथा ।।** ततो जीवो मुक्तिगमनकाले **एवमेव** मनोवत् **वाग्योगं निरुणद्धि,** ततः **क्रमेण काययोगं** निरुणद्धि, **ततः** काययोगनिरोधान्तरं **शैलैशो** मेरुः **तद्वत् स्थिर** निश्चलकायः **शैलेसी केवली भवति** ।।७८।।

**दीपिका** - केवलिनोऽपि शैलेश्यारम्भक्षणेऽपि मनोरोधयुक्तिरित्थमेव । अथ तामुक्त्वा वाक्कायरोधयुक्तिमतिदिशति । **एवमेव** विषादिदृष्टान्तैः शैलेश्यां **वाग्योगं क्रमेण काययोगं** च **निरुणद्धि** । **ततः शैलेश इव स्थिरः** सन् **शैलेशी केवली भवति** । भावार्थो नमस्कारनिर्युक्तेर्ज्ञेयः ।। ७६ ।।

**अवचूर्णिः** - केवली मनोयोगं निरुणद्धीत्युक्तम्, शेषयोगनिरोधविधिमाह— **एवमेव** एभिरेव विषादिदृष्टान्तै**र्वाग्योगं निरुणद्धि** ।।७६।।

**अवचूरिः** - केवली मनोयोगं निरुणद्धीत्युक्तम्, अधुना शेषयोगनिरोधविधिमाह - **एवं०** ।। **एवमेव** एभिरेव विषादिदृष्टान्तै**र्वाग्योगं निरुणद्धि,** तथा **क्रमेण काययोगमपि** निरुणद्धीति वर्तते, **ततः शैलेश इव** मेरुरिव **स्थिरः** सन् **शैलेशी केवली स्यात्** ।।७६।।

**टीका** - शेषयोगनिरोधमाह— स्पष्टा। ।। ७६ ।।

**उप्पायट्ठिइभंगाइपज्जयाणं जमेगदव्वंमि ।**
**नाणानयाणुसरणं पुव्वगयसुयाणुसारेणं ।। ७७ ।।**

**अर्थलेशः - उप्पाइ गाथा** ।। शुक्लध्यानस्य चतुरो भेदानाह । **यद् एकस्मिन् द्रव्ये** परमाणौ **उत्पाद-स्थिति-भङ्गादिपर्यायानां** पूर्वगतादिपर्यायानां **पूर्वगतश्रुतानुसारेण नानानयैरनुस्मरणं** चिन्तनं क्रियते ।।७९।।

**दीपिका** - अथ ध्येयम्— **उत्पादस्थितिभङ्गादिपर्यायाणां यदेकद्रव्ये**ऽण्वादौ **नानानयैरनुसरणं** चिन्तनं च, **पूर्वगतश्रुतानुसारेण**ेति पूर्वविदामेव, मरुदेव्यादीनां तु श्रुतं विनापि ।। ७७ ।।

**अवचूर्णिः** - उक्तः क्रमो ध्यातव्यमाह - **उत्पादस्थितिभङ्गादिपर्यायाणां यदेकस्मिन् द्रव्ये**

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

अण्वात्मादौ, **नानानयैर्द्रव्यास्तिकादिभिरनुस्मरणं** चिन्तनम्, **पूर्वगतश्रुतानुसारेण** पूर्वविदः, मरुदेव्यादीनां त्वन्यथा ।। ७७।।

**अवचूरिः** - उक्तः क्रमः, ध्यातव्यमाह- **उप्पा० ।। उत्पाद-स्थिति-भङ्गादिपर्यायाणाम्** आदिशब्दान्मूर्त्तामूर्त्तग्रहो **यदेकस्मिन् द्रव्ये** अण्वात्मादौ, किम् ? **नानानयैर्द्रव्यास्तिकादिभिरनुस्मरणं** चिन्तनम्, कथम् ? **पूर्वगतश्रुतानुसारेण** पूर्वविदः, मरूदेव्यादीनां त्वन्यथा ।।७७।।

**टीका** - ध्यातव्यद्वारमाह— **उत्पादादीनां यदेकवस्तुनि** अण्वात्मादौ **नानानयैर्द्रव्यास्तिका-यादिभिरनुस्मरणम्, पूर्वगतश्रुतानुसारेण** तद् ध्यातव्यम्।।७७।।

**सवियारमत्थवंजण-जोगंतरओ तयं पढमसुक्कं ।**
**होइ पुहुत्तवितक्कं, सवियारमरागभावस्स ।। ७८ ।।**

**अर्थलेशः - सविया गाथा ।। अरागभावस्य** रागपरिणामरहितस्य **पृथक्त्ववितर्कसविचारं** नाम **पृथक्त्वेन** एकद्रव्याश्रितानाम् उत्पादादिपर्यायाणां भेदेन **वितर्को** विकल्पो यत् तत् पृथक्त्ववितर्कं तच्च तत् **सविचारं** [च तत्] **प्रथमं शुक्लध्यानं भवति । सविचारं** ससङ्क्रमम्, **अर्थव्यञ्जनयोगान्तरतः अर्थो** द्रव्यम्, **व्यञ्जनं** शब्दः, **योगो** मनःप्रभृति । तत्रार्थाद्व्यञ्जनं व्यञ्जनादर्थं सङ्क्रामति योगाद् योगमिति ।।८०।।

**दीपिका** - तच्च— **अरागभावस्य** रागपरिणामरहितस्य **अर्थव्यञ्जनयोगान्तरतो** यत् सविचारं तत् **पृथक्त्ववितर्कसविचारं** नाम **प्रथमं शुक्लं स्यात् । पृथक्त्वेन** एकद्रव्याश्रितानामुत्पादादिपर्यायाणां भेदेन **वितर्को** यत्र तत् पृथक्त्ववितर्कम्, विचारः सङ्क्रमो विद्यते यत्र त**त्सविचारम् । अर्थव्यञ्जनयोगान्तरतः अर्थो** द्रव्यम्, **व्यञ्जनं** शब्दः **योगो** मानसादिः, एत**दन्तरत** एतद्भेदेन, कोऽर्थः? अर्थाद् व्यञ्जनं सङ्क्रामतीति, व्यञ्जनादर्थम्, योगाद्योगान्तरं सङ्क्रामति, यथा मनोयोगाद् वाग्योगमित्यादि। तथाऽत्राऽरागस्योक्तम्, चूर्णौ तु-

सुयनाणे उवउत्तो अत्थंमि य वंजणम्मि सवियारं । झायति चउदसपुव्वी, पढमं सुक्कं सरागो उ।१।
सुयनाणे उवउत्तो, अत्थंमि य वंजणंमि अवियारं । झायइ चउदसपुव्वी, सुक्कं बीयं विगयरागो।२।
अत्थसंकमणं चेव तहा वंजणसंकमं । जोगसंकमणं चेव, पढमे झाणे निगच्छई । ३ ।
अत्थसंकमणं चेव, तहा वंजणसंकमं । जोगसंकमणं चेव, बीए झाणे न विज्जई । ४ ।
जोगे जोगेसु वा पढमं बीयं जोगंमि कन्हइ । तइयं च काइए जोगे, चउत्थं च अजोगिणो । ५ ।
पढमं बीयं च सुक्कं च, झायन्ति पुव्वजाणगा । उवसंतकसाएहिं, खीणेहिं व महामुणी । ६ । ।।७८।।

**अवचूर्णिः - तत् सविचारम्, विचारो**ऽर्थव्यञ्जनयोगसङ्क्रमः, **अर्थो** द्रव्यम्, **व्यञ्जनं** शब्दः, **योगो** मनःप्रभृति, एत**दन्तरतः** एतद्भे [तावद्भे]देन सविचारम्, तकमेतत् **प्रथमं शुक्लं** नाम्ना **पृथक्त्ववितर्कं सविचारम्, पृथक्त्वेन** भेदेन विस्तीर्णभावेनान्ये **वितर्कः** श्रुतं यस्मिंस्तथा, स्याद**रागभावस्य** ।।७८।।

**अवचूरि : - तत्किमित्याह - सवि० ।। सह विचारेण वर्तते **सविचारम्, विचारः** अर्थ-व्यञ्जन-

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

योगसंक्रमः, **अर्थो** द्रव्यम्, **व्यञ्जनं** शब्दः, **योगो** मनःप्रभृति, एत**दन्तरतः** एतद्भेदेन सविचारम् अर्थाद् व्यञ्जनं संक्रामतीति विभाषा, **तकम्** एतत् **प्रथमं शुक्लं स्यात्** । किंनामेत्याह - **पृथक्त्ववितर्कं सविचारम् पृथक्त्वेन** भेदेन विस्तीर्णभावेनान्ये, **वितर्कः** श्रुतं यस्मिन् तत्तथा, कस्येदम् ? **अरागभावस्य** ।।७८।।

**टीका** - शुक्लध्यानभेदचतुष्टयमाह - **अरागभावस्य** रागपरिणामरहितस्य **पृथक्त्ववितर्कसविचारं** नाम **पृथक्त्वेन** एकद्रव्याश्रितानामुत्पादादिपर्यायाणां भेदेन **वितर्को** विकल्पो यत्र तत् पृथक्त्ववितर्कं तच्च त**त्सविचारम् प्रथमं शुक्लध्यानं भवति । सविचारं** ससङ्क्रम**मर्थव्यञ्जनयोगान्तरतः** । **अर्थो** द्रव्यम्, **व्यञ्जनं** शब्दः, **योगो** मनःप्रभृति । तत्राऽर्थाद् व्यञ्जनं व्यञ्जनादर्थं सङ्क्रामति योगाद्योगमिति ।।७८।।

**जं पुण सुणिप्पकंपं, निवायसरणप्पईवमिव चित्तं ।**
**उप्पायट्ठिइभंगाइयाणमेगंमि पज्जाए ।। ७९ ।।**

**अर्थलेशः - जं पुण गाथा** ।। यत् पुनश्चित्तम् **एकस्मिन्** द्रव्ये **उत्पादस्थितिभङ्गादीनां** पर्यायाणां मध्ये **एकस्मिन् पर्याये निर्वातशरणप्रदीपवत्** निर्वातगृहदीपवत् **सुनिःप्रकम्पं** कम्परहितं निश्चलं **भवति** ।।८१।।

**दीपिका - यत्पुनरुत्पादस्थितिभङ्गादीनामेकस्मिन् पर्याये, निर्वातशरणगृहे प्रदीपवत्, सुनिःप्रकम्पं चित्तं स्यात्** ।। ७९ ।।

**अवचूर्णिः - निर्वातशरणप्रदीप इव चित्तम्, उत्पादस्थितिभङ्गादीनामेकस्मिन् पर्याये** ।।७९।।

**अवचूरिः - जं पुण०** ।। **यत्पुनः सुनिष्प्रकम्पं निर्वातशरणप्रदीपवत् चित्तम्,** क्व ? **उत्पाद स्थिति-भङ्गादिनामेकस्मिन् पर्याये** ।।७९।।

**टीका - यत्पुनश्चित्तमुत्पादस्थितिभङ्गादीनां पर्याये एकस्मिन् निर्वातशरणप्रदीप इव सुनिःप्रकम्पम्** ।। ७९ ।।

**अवियारमत्थवंजणजोगंतरओ तयं बिइयसुक्कं ।**
**पुव्वगयसुयालंबणमेगत्तवितक्कमवियारं ।। ८० ।।**

**अर्थलेशः - अवियार गाथा ।। अर्थव्यञ्जनयोगान्तरतः अविचारं तद् द्वितीयं शुक्लध्यानं भवति।** किं विशिष्टं शुक्लध्यानम्? **पूर्वगतश्रुतालम्बनं** तथा **एकत्ववितर्काविचारनामकमिति** द्वितीयो भेदः ।।८२।।

**दीपिका - अविचारम्** असङ्क्रमम्, कुतोऽ**र्थव्यञ्जनयोगान्तरतः, तद् द्वितीयं शुक्लम्, पूर्वगतश्रुतालम्बनम्,** किंनामा ? इत्याह - **एकत्ववितर्कमविचारम् एकत्वेना**भेदेन **वितर्को** व्यञ्जनरूप एवार्थरूप एव वा यस्य ।।८०।।

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

**अवचूर्णिः** - ततः- **अविचारम्** असङ्क्रमं, **अर्थव्यञ्जनयोगान्तरतः, तद् द्वितीयं शुक्लं** स्यात्, **एकत्ववितर्कमविचारम् एकत्वेना**भेदेन **वितर्को** व्यञ्जनरूपोऽर्थरूपो वा यस्य तत्तथा ।। ८० ।।

**अवचूरिः** - तत् किमत आह - **अवि०** ।। **अविचारम**संक्रमम् **अर्थव्यञ्जनयोगान्तरतः** इति प्राग्वत्, **तत् द्वितीयं शुक्लं** स्यात् । किंनामा अत आह - **एकत्ववितर्कमविचारम् एकत्वेन** अभेदेन **वितर्को** व्यञ्जनरूपोऽर्थरूपो वा यस्य तत्तथा, इदमपि च **पूर्वगतश्रुतानुसारेणैव** स्यात्, शेषं प्राग्वत् ।।८०।।

**टीका** - तत्किमित्याह - **अविचारम्** असङ्क्रमं कुतः? **अर्थव्यञ्जनयोगान्तरतः द्वितीयं शुक्ल**ध्यानम्। **एकत्वेना**भेदेन **वितर्को** व्यञ्जनरूपोऽर्थरूपो वा यस्य तत्तथा ।। ८० ।।

**निव्वाणगमणकाले, केवलिणो दरनिरुद्धजोगस्स ।**
**सुहुमकिरियाऽनियट्टिं, तइयं तणुकायकिरियस्स ।। ८१ ।।**

**अर्थलेशः - निव्वाण गाथा** ।। **निर्वाणगमनकाले केवलिनः तृतीयं** शुक्लध्यानं भवति । किं विशिष्टस्य केवलिनः ? **दरनिरुद्धयोगस्य** ईषत् निरुद्धकाययोगस्य तथा **तनुकायक्रियस्य** स्तोककायव्यापारस्य, किं विशिष्टं शुक्लध्यानम्? **सूक्ष्मक्रियानिवृत्तिनामकमिति** तृतीयो भेदः ।।८१।।

**दीपिका - 'दरनिरुद्धे'**त्यादि, मनोवाग्योगरोधादन्वर्द्धरुद्धकाययोगस्य **केवलिनो निर्वाणगमनकाले** तत् स्यात् , किंनाम? तत्**सूक्ष्मक्रियाऽनिवर्त्ति** सूक्ष्मक्रियं तदनिवर्त्ति वा । **तन्वी** उच्छ्वासादिरूपा **कायक्रिया** यस्य, 'तत्थ दुसमयठिइयं इरियावहियं कम्मं बज्झइ' ।। ८१ ।।

**अवचूर्णिः** - मोक्षगमनप्रत्यासन्नसमये **केवलिनो** मनोवाग्योगद्वये निरुद्धे सति **अर्द्धनिरोध[रुद्ध]काय-योगस्य सूक्ष्मक्रियाऽनिवर्ति** सूक्ष्मक्रियं च तदनिवर्ति च, प्रवर्द्धमानतरपरिणामान्न निवर्त्ति अनिवर्ति, **तृतीयं** ध्यानम्, **तनुकायक्रियस्य तन्वी** उच्छ्वासनिःश्वासादिलक्षणा कायक्रिया यस्य स तथाविधस्तस्य ।। ८१ ।।

**अवचूरिः - निव्वा०** ।। **निर्वाण**-मोक्ष**गमन**प्रत्यासन्न**काले केवलिनो** मनोवाग्योगद्वये निरूद्धे सति **अर्द्धनिरूद्धकाययोगस्य**, किम् ? **सूक्ष्मक्रियाऽनिवर्ति** सूक्ष्मा क्रिया यस्मिन् तत् सूक्ष्मक्रियं तच्च तदनिवर्ति च प्रवर्द्धमानतरपरिणामान्न निवर्तितुं शीलम् अस्येति अनिवर्ति **तृतीयम्** ध्यानम्, **तनुकायक्रियस्य** तन्वी उच्छ्वास-निःश्वासादिलक्षणा कायक्रिया यस्य स तथाविधस्तस्य ।।८१।।

**टीका-** स्पष्टा। नवरं **तन्वी** उच्छ्वासनिःश्वासरूपा **क्रिया** यस्य स तथा तस्य **तनुकायक्रियस्य** ।।८१।।

**तस्सेव य सेलेसीगयस्स, सेलोव्व णिप्पकंपस्स ।**
**वोच्छिन्नकिरियमप्पडिवाइ ज्झाणं परमसुक्कं ।। ८२ ।।**

**अर्थलेशः - तस्सेव य गाथा** ।। **तस्यैव** तृतीयशुक्लध्यानभेदस्थितस्य साधोः **शैलेशीगतस्य शैलवत् निःप्रकम्पस्य** चतुर्थ**मप्रतिपातिपरमशुक्लध्यानं** भवति । किं विशिष्टं शुक्लध्यानम् ? **व्युच्छिन्नक्रियं** नाम इति चतुर्थो भेदः ।।८४।।

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

**दीपिका - तस्यैव** केवलिनः, **शैलेशीगतस्य शैल इव निःप्रकम्पस्य, व्युच्छिन्नक्रियं** नाम योगाभावात्, **अप्रतिपाति** पाताभावात्, व्युच्छिन्नक्रियाप्रतिपातीति नाम **ध्यानं** स्यात् ।। ८२ ।।

**अवचूर्णिः** - अस्या गाथायाः अवचूर्णिर्नास्ति । सम्पा० ।।

**अवचूरिः - तस्से०** ।। **तस्यैव च** केवलिनः **शैलेशीगतस्य,** किंविशिष्टस्य ? **शैलेश इव निष्प्रकम्पस्य** मेरोरिव स्थितस्य, किम् ? **व्यवच्छिन्नक्रियं** योगाभावाद्, **अप्रतिपाति** अनुपरतिस्वभावमिति, एतदेव अस्य नाम ।।८२।।

**टीका** - स्पष्टा ।। ८२ ।।

**पढमं जोगे जोगेसु वा, मयं बितियमेगजोगंमि ।**
**तइयं च कायजोगे, सुक्कमजोगंमि य चउत्थं ।।८३।।**

**अर्थलेशः - पढमं गाथा** ।। **प्रथमं** शुक्लध्यानं एकस्मिन् **योगे वा** अथवा त्रिषु **योगेषु मतं** कथितम्, **द्वितीयं** शुक्लध्यानम् **एकस्मिन् योगे** त्रयाणां मध्ये एकस्मिन् योगे कथितम्, **तृतीयं** शुक्लध्यानं **काययोगे** स्यात्, **चतुर्थं शुक्ल**ध्यानम् **अयोगे** योगत्रयरहितवेलायां भवति ।।८५।।

**दीपिका** - एकस्मिन् **योगे, योगेषु वा** त्रिष्वपि, **मत**मुक्तम्, तच्च भङ्गिकश्रुतपाठिनः । **द्वितीय-मेकयोगे**ऽन्यतरस्मिन् सङ्क्रमाभावात् । ।।८३।।

**अवचूर्णिः** - इत्थं चतुर्विधं ध्यानमुक्त्वा तत्प्रतिबद्धमेव वक्तव्यताशेषमाह- **प्रथमं** पृथक्त्ववितर्कं सविचारम्, **योगे** मनआदौ **योगेषु वा** सर्वेषु मतमिष्टम्, तच्चागमिकश्रुतपाठिनः, **द्वितीयमे**कत्ववितर्कमविचारम्, **एकयोग एवान्यतरस्मिन्** सङ्क्रमाभावात्, **तृतीयं च** सूक्ष्मक्रियानिवर्ति **काययोगे,** न [योगान्तरे], **शुक्लमयोगिनि** शैलेशीकेवलिनि **चतुर्थं** व्युपरतक्रियाऽप्रतिपाति ।। ८३ ।।

**अवचूरिः -** इत्थं चतुर्विधं ध्यानमुक्तमेतत्प्रतिबद्धमेव वक्तव्यताशेषमाह- **पढ०** ।। **प्रथमं योगे** मनआदौ **योगेषु वा** सर्वेषु **मतम्** इष्टम् तच्चागमिकश्रुतपाठिनः । **द्वितीयम्** एकत्ववितर्कमविचारम्, **तदेकयोग** एव, अन्यतरस्मिन् संक्रमाभावात् । **तृतीयं च** सूक्ष्मक्रियाऽनिवर्ति **काययोगे,** न योगान्तरे । **शुक्लम् अयोगिनि** शैलेशीकेवलिनि **चतुर्थम्** व्युपरतक्रियाऽप्रतिपाति ।।८३।।

**टीका** - उक्तं चतुर्धा शुक्लम्, तत्प्रतिबद्धमेव शेषमाह- **प्रथमं** शुक्लं **योगे योगेषु वा मतं** ससङ्क्रमत्वात् । **द्वितीयमेकस्मिन् योगे** सङ्क्रमाभावात् । **तृतीयं काययोगे न** योगान्तरेषु । **चतुर्थमयोगे** केवलिनि अमनस्कत्वात् ।। ८३ ।।

**जह छउमत्थस्स मणो झाणं भण्णइ सुनिच्चलो संतो ।**
**तह केवलिणो काओ, सुनिच्चलो भन्नए झाणं ।।८४।।**

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

**अर्थलेशः - जह गाथा ।। यथा छद्मस्थस्य सुनिश्चलं मनो ध्यानं भण्यते तथा केवलिनः सुनिश्चलकायो ध्यानं भण्यते** ।।८६।।

**दीपिका** - अमनस्कस्य कथं ध्यानमित्याह- **यथा सुनिश्चलं मनः छद्मस्थस्य ध्यानं तथा केवलिनः सुनिश्चलकायो ध्यानं भण्यते,** तुर्ये तु ध्याने रुद्धत्वात्काययोगोऽपि नास्ति ।। ८४ ।।

**अवचूर्णिः —** आह-शुक्लोपरिमभेदद्वयेऽमनस्कत्वात्केवलिनो ध्यानं च मनोविशेषः "ध्यै चिन्तायां" इति पाठात्, तदेतत्कथं स्यात् ? उच्यते— **यथा छद्मस्थस्य मनो ध्यानं भण्यते सुनिश्चलं सत्, तथा** योगत्वाव्यभिचारात्**केवलिनः कायः**।। ८४ ।।

**अवचूरिः -** आह - शुक्लध्यानोपरिमभेदद्वये मनो नास्ति, अमनस्कत्वात् केवलिनः, ध्यानं च मनोविशेषः 'ध्यै चिन्तायाम्' इति पाठात्, तदेतत्कथम् ? उच्यते- **जह० ।। यथा छद्मस्थस्य मनो ध्यानं भण्यते सुनिश्चलं सत् तथा केवलिनः कायो** योगत्वाव्यभिचारात् **सुनिश्चलो भण्यते ध्यानम्** ।।८४।।

**टीका—** केवलिनः कथं ध्यानमिति चेदित्याह— स्पष्टा ।। ८४ ।।

**पुव्वप्पओगओ चिय, कम्मविणिज्जरणहेउतो यावि ।**
**सद्दत्थबहुत्ताओ, तह जिणचंदागमाओ य ।। ८५ ।।**

**चित्ताभावेवि सया, सुहुमोवरयकिरियाइ भण्णंति ।**
**जीवोवओगसब्भावओ, भवत्थस्स झाणाइं ।। ८६ ।।**

**अर्थलेशः - पुव्व गाथा ।। चित्ता गाथा ।। चित्ताभावेपि** तथा पूर्वगाथोक्तदृष्टान्तैः **सूक्ष्मक्रिय-उपरतक्रिये ध्याने सदा भण्येते । भवस्थस्य** जीवस्य **जीवोपयोगसद्भावतः** एते ध्याने भवतः। यस्मात् **पूर्वप्रयोगत एव** यथा कुम्भकारश्चक्रम् एकवारं भ्रमयति पश्चात्स्वयमेव कियत्कालं भ्राम्यति । एवं चित्तसद्भावे ध्यानमारब्धं चित्ताभावेपि स्वयं भवतीत्यर्थः । यद्वा **कर्म्मविनिर्ज्जराहेतुतोऽपि** कर्म्मक्षयेन चितं विनाऽपि ध्यानं स्यादित्यर्थः । यद्वा **शब्दार्थबहुत्वात्** यथा 'ध्यै चिन्तायां' तथा 'ध्यै अयोगित्वे' इति चित्ताभावेऽपि ध्यानं ज्ञेयम् । यद्वा **जिनचन्द्रागमात्** वीतरागोक्तसिद्धान्तवचनात् चित्तं विनाऽपि ध्यानं स्यादित्यर्थः ।।८७-८८।।

**दीपिका -** तत्र तु ध्यानत्वमेवम्— काययोगरोधियोगिनोऽयोगिनो वा **चित्ताभावेऽपि** सति **सूक्ष्मोपरतक्रिये ध्यान**भेदौ **भण्येते, पूर्वप्रयोगा**दिति हेतुः चक्रभ्रमवदिति दृष्टान्तोऽभ्यूह्यः, यथा चक्रं भ्रमहेतुदण्डादिक्रियाभावेऽपि पूर्वप्रयोगाद् भ्रमति तथाऽस्य द्रव्यमनोयोगोपरमेप्यात्मोपयोगसद्भावाद् भावमनोभावोद्भवस्थध्याने इति । **अपि** निर्णये हेत्वन्तराण्याह **'कम्मवि०'** यथा क्षपकश्रेणौ कर्म्मनिर्जराभावाद् ध्यानं तथाऽत्रापि । **'सद्दत्थ०'** ध्यानशब्दस्यार्थबहुत्वात्, यथा हरिशब्दोऽनेकार्थः तथा ध्यानशब्दोऽपि, 'ध्यै' चिन्तायां, 'ध्यै' कायनिरोधे अयोगित्वे इत्यपि। तथा **जिनचन्द्रागमाज्जि**नोक्तत्वादित्यर्थः। **जीवोपयोगसद्भावतः** सदेहजीवज्ञानभावाद्भवस्थस्य ध्याने स्तः ।। ८५-८६ ।।

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

**अवचूर्णिः** - आह चतुर्थे निरुद्धत्वादसावपि न स्यात्तत्र का वार्त्ता ? उच्यते - **चित्ताभावेऽपि** सति **सूक्ष्मोपरतक्रिये भण्येते, सूक्ष्म**ग्रहणात् सूक्ष्मक्रियाऽनिवर्तिनो ग्रहणम्, **उपरत**ग्रहणाद् व्युपरतक्रियाऽप्रतिपातिनः, **पूर्वप्रयोगादि**ति हेतुः, कुलालचक्रभ्रमणवत्, यथा तच्चकं भ्रमणनिमित्त-दण्डादिक्रियाऽभावेऽपि भ्रमति तथाऽस्यापि मनःप्रभृतियोगोपरमेऽपि **जीवोपयोगसद्भावतो** भावमनसो भावा**द्भवस्थस्य** ध्याने, एवं शेषहेतवोऽपि योजनीयाः, विशेषस्तूच्यते—**कर्मविनिर्जरणहेतुतश्चापि** क्षपकश्रेणिवत् क्षपकश्रेण्यामिवास्य भवोपग्राहिकर्म्मनिर्जरेत्यर्थः, **तथा शब्दार्थबहुत्वात्** यथा एकस्यैव हरिशब्दस्य शक्रशाखामृगादयोऽनेकार्थाः, एवं ध्यानशब्दस्यापि. 'ध्यै चिन्तायां' 'ध्यै काययोगनिरोधे', ध्यै अयोगित्वे' इत्यादि, **तथा जिनचन्द्रागमाच्चै**तदेवम्।।८५-८६।।

**अवचूरिः** - आह - चतुर्थे निरुद्धत्वादसावपि न स्यात्, यत्तत्र का वार्ता ? उच्यते०- **पुव्व०** ।। **चित्ता०** ।। काययोगनिरोधिनोऽयोगिनो वा **चित्ताभावेऽपि सूक्ष्मोपरतक्रिये भण्येते, सूक्ष्म**ग्रहणात् सूक्ष्मक्रियाऽनिवर्तिनो ग्रहणम्, **उपरत**ग्रहणाद् व्युपरतक्रियाऽप्रतिपातिनः, **पूर्वप्रयोगादि**ति हेतुः, कुलालचक्रभ्रमणवद्, यथा तच्चक्रं भ्रमणनिमित्तदण्डादिक्रियाऽभावेऽपि भ्रमति तथाऽस्यापि मनःप्रभृतियोगोपरमेऽपि **जीवोपयोगसद्भावतः** भावमनसो भावाद् **भवस्थस्य ध्याने** । एवं शेषहेतवोऽप्यनया गाथया योज्याः । विशेषस्तूच्यते - **कर्मविनिर्जरणहेतुतश्चापि** कर्मनिर्जरणहेतुत्वात् क्षपकश्रेणिवत्, भवति च क्षपकश्रेण्यामिवास्य भवोपग्राहिकर्मनिर्जरेति भावः । तथा **शब्दार्थबहुत्वाद्** यथैकस्यैव हरिशब्दस्य शक्र-शाखा-मृगादयोऽनेकेऽर्थाः, एवं ध्यानशब्दस्यापि, 'ध्यै चिन्तायाम्, ध्यै काययोगनिरोधे, ध्यै अयोगित्वे' इत्यादि तथा **जिनचन्द्रागमाच्चै**तदेवमिति ।।८५-८६।।

**टीका** - चतुर्थे शुक्ले कायस्यापि निरुद्धत्वात् कथं ध्यानत्वमिति. चेदित्याह- **जीवोपयोगसद्भावाद् भवस्थस्य सूक्ष्मोपरतक्रिये ध्याने सदा भण्येते । पूर्वप्रयोगतोपि** च कुलालचक्रभ्रमणवत् **कर्मणां** भवोपग्राहिणां **विनिर्जराहेतुतश्चापि । शब्दार्थबहुत्वात्** 'ध्यै चिन्तायां काययोगनिरोधे अयोगित्वे चे' ति । **जिनचन्द्रागमाच्च।** उक्तं ध्यातव्यम् । ध्यातारो धर्मध्याने उक्ताः ।। ८५-८६।।

**सुक्कज्झाणसुभावियचित्तो, चिंतेइ झाणविरमेऽवि ।**
**णिययमणुप्पेहाओ, चत्तारि चरित्तसंपन्नो ।। ८७ ।।**

**अर्थलेशः - सुक्क गाथा** ।। सामान्यतस्छद्मस्थावस्थायां **शुक्लध्यानसुभावितचित्तो** जीवो **ध्यानोपरमेऽपि** ध्याननिवृत्तावपि **नियतं चतस्रोऽनुप्रेक्षा** धर्म्मचिन्तारूपा**श्चिन्तयति** । किंविशिष्टो जीवः ? चारित्रसम्पन्नोः देशविरतिचारित्रवान् सर्वविरतिचारित्रवान् वा केवलिनो शुक्लध्यानप्रतिपाताभावादित्युक्तम् ।। ८९ ।।

**दीपिका** - गतं ध्यातव्यद्वारम्, ध्यातारो धर्मध्याने एवोक्ताः, अथानुप्रेक्षा— **ध्यानविरमे** ध्यानापगमेऽपि **नियतमनुप्रेक्षाः,** ताश्चेमाः ।। ८७ ।।

**अवचूर्णिः** - उक्तं ध्यातव्यम्, ध्यातारः प्रागुक्ताः, अथांनुप्रेक्षा आह - **नियतमनुप्रेक्षाश्चतस्रः, चारित्रसम्पन्नस्**तत्परिणामरहितस्य तदभावात् ।। ८७ ।।

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

**अवचूरिः -** उक्तं ध्यातव्यद्वारम्, ध्यातारः प्रागुक्ताः, अथानुप्रेक्षाद्वारमाह - **सुक्क०** ।। **शुक्लध्यानसुभावितचित्तश्चिन्तयति ध्यानविरमेऽपि नियतमनुप्रेक्षाश्चतस्त्रश्चारित्रसम्पन्नः,** तत्परिणामरहितस्य तदभावात् ।।८७।।

**टीका—** अनुप्रेक्षाद्वारमाह- स्पष्टा ।। ८७ ।।

**आसवदारावाए तह, संसारासुहाणुभावं च ।**
**भवसंताणमणन्तं, वत्थूणं विपरिणामं च ।। ८८ ।।**

**अर्थलेशः आसव गाथा** । १-**आश्रवद्वारेभ्यः** पापबन्धनप्रकारेभ्यो ये **अपाया** नरकादिकष्टानि तानि चिन्तयेद् एकानुप्रेक्षा, २- **तथा संसाराशुभानुभावं** गर्भवासजन्मजरामरणादिरूपं चिन्तयेत् द्वितीयानुप्रेक्षा, ३- तथा **अनन्तभवसन्तानं** चिन्तयेत्, अभव्यजीवा निगोदान्निर्गत्य पृथिव्यादिष्वऽनन्तभवान् भ्राम्यन्ति, निगोदे वा अनन्तकालं तिष्ठन्ति, तेषां संसारानन्तत्वं चिन्तयेत् तृतीयाऽनुप्रेक्षा, ४- तथा **वस्तूनां विपरिणामं** पदार्थानाम् उत्पत्तिव्ययध्रौव्यत्वेन विविधपरिणामेन भवनं चिन्तयेत् चतुर्थी अनुप्रेक्षा ४ ।।९०।।

**दीपिका - १-आश्रवद्वारेभ्योऽपायान्, २-संसाराशुभानुभावम्, ३-भवसन्तानमनन्तम्, ४-वस्तूनां विपरिणामम**नित्यत्वाद्यम् । एताः १ अपाय २ अशुभ ३ अनन्त ४ विपरिणामाख्या अनुप्रेक्षा आद्यभेदयोरेव ।। ८८ ।। गतम् अनुप्रेक्षा०९ ।

**अवचूर्णिः -** ताश्चैताः- **आश्रवद्वाराणि** मिथ्यात्वादीनि, त**दपायान्** दुःखलक्षणान्, **तथा संसाराशुभानुभावम्, भवसन्तानमनन्तं** भाविनं नारकाद्यपेक्षया, **वस्तूनां विपरिणामं च,** एताश्चतस्रोऽप्यपायाशुभानन्तविपरिणामानुप्रेक्षा आद्यभेदद्वयसङ्गता एव ज्ञेयाः ।। ८८ ।।

**अवचूरिः -** ताश्चेमाः - **आस०** ।। **आश्रवद्वाराणि** मिथ्यात्वादीनि, त**दपायान्** दुःखलक्षणान् **तथा संसाराशुभानुभावं च, भवसन्तानमनन्तं** भाविनं नारकाद्यपेक्षया, **वस्तूनां विपरिणामं च** सचेतनानि "सव्वट्ठाणाणि असासयाणि" इत्यादि, एताश्चतस्रोऽप्यपाया-ऽशुभा-ऽनन्त-विपरिणामानुप्रेक्षा आद्यद्वयभेदसङ्गता एव द्रष्टव्या ।।८८।।

**टीका -** ताश्चैताश्चतस्रोऽनुप्रेक्षा आह - **आश्रवद्वाराणि** मिथ्यात्वादीनि, तेभ्यो**ऽपायान्** दुःखरूपान्, **संसारासुखानुभावम्, भवसन्तानमनन्तम्,** भाविनां **वस्तुनां** सचेतनानां पुत्रकलत्रादीनां **विपरिणामं** च । एताश्चतस्रोऽनुप्रेक्षाः शुक्लाद्यभेदद्वयसङ्गता ज्ञेयाः ।। ८८ ।।

**सुक्काए लेसाए, दो ततियं परमसुक्कलेस्साए ।**
**थिरयाजियसेलेसं, लेसाईयं परमसुक्कं ।। ८९ ।।**

**अर्थलेशः - सुक्काए गाथा** ।। चतुर्णां शुक्लध्यानभेदानां मध्ये प्रथमौ **द्वौ** भेदौ **शुक्ललेश्यायां** भवतः। **तृतीयं** शुक्लध्यानं **परमशुक्ललेश्यायाम्** उत्कृष्टपरिणामशुक्ललेश्यायां स्यात्। **परमशुक्लम्** उत्कृष्टशुक्लध्यानं चतुर्थं **लेश्यातीतं** लेश्यारहितं भवति। किं विशिष्टं परमशुक्लम् ? **स्थिरताजितशैलेशम्** ।।९१।।

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

**दीपिका** - सामान्येन **शुक्लायां द्वे** आद्ये, **तृतीयं परमशुक्लायां** स्यात्, **स्थिरताजितशैलेशं** तुर्यं **परमशुक्लं लेश्यातीतम्** ।।८९।। गतं लेश्याद्वा० १० ।

**अवचूर्णिः** - अथ लेश्या आह – सामान्येन **शुक्लायां लेश्यायां द्वे** आद्ये, **तृतीयं परमशुक्ललेश्यायां लेश्यातीतं परमशुक्लं** चतुर्थम् ।। ८९ ।।

**अवचूरिः** - लेश्याद्वारमाह - **सुक्का०** ।। सामान्येन **शुक्लायां लेश्यायां द्वे** आद्ये **तृतीयं परमशुक्ललेश्यायाम्, लेश्यातीतं परमशुक्लं** चतुर्थम् ।।८९।।

**टीका** - लेश्याद्वारमाह - **शुक्लायां लेश्यायां द्वे** आद्ये, **तृतीयं परमशुक्ललेश्यायां स्थिरताजितशैलेशम्, लेश्यातीतं परमशुक्लं** चतुर्थम् । लिङ्गद्वारमाह। यान्येव धर्मध्यानस्य लिङ्गानि तान्येवास्यापि ।।८९।।

**अवहासंमोहविवेग-विउसग्गा तस्स होंति लिंगाइं ।**
**लिंगिज्जइ जेहिं मुणी, सुक्कज्झाणोवगयचित्तो ।।९०।।**

**अर्थलेशः - अवहा गाथा** ।। **तस्य** शुक्लध्यानस्य एतानि चत्वारि **लिङ्गानि स्युः** । एतानि कानि? १-**अवध** २-**असम्मोह** ३-**विवेक** ४-**व्युत्सर्गाः** । **मुनिः शुक्लध्यानोपगतचित्तः यैः** प्रकारै**लिङ्ग्यते** - ज्ञायते ।।९२।।

**दीपिका** - अथ लिङ्गद्वारम् - १-**अवध** २-**असम्मोह** ३-**विवेक** ४-**व्युत्सर्गाः लिङ्ग्यते** ज्ञायते ।।९०।।

**अवचूर्णिः** - लिङ्गद्वारमाह - **अवधासम्मोहविवेकव्युत्सर्गाः तस्य** शुक्लध्यानस्य **लिङ्गानि** ।।९०।।

**अवचूरिः** - लिङ्गद्वारमाह - **अव०** ।। **अवधाऽसम्मोह-विवेक-व्युत्सर्गास्तस्य** शुक्लध्यानस्य **[भवन्ति लिङ्गानि] लिङ्ग्यते** गम्यते **[यैर्मुनिः शुक्लध्यानोपगतचितः]** ।।९०।।

**टीका** - **अवधाऽसम्मोहविवेकव्युत्सर्गास्तस्य** शुक्लस्य **लिङ्गानि**, शेषं स्पष्टम् ।। ९० ।।

**चालिज्जइ बीहेइ व, धीरो न परीसहोवसग्गेहिं ।**
**सुहुमेसु न संमुज्झइ, भावेसु न देवमायासु ।। ९१ ।।**

**अर्थलेशः - चालिज्जइ गाथा** ।। १-**धीरः** साधुः **परीषहोपसर्गैर्नचाल्यते न बिभेति** च एतदवधलिङ्गम्, २- तथा मुनिः **सूक्ष्मेषु भावेषु** वर्गणागतपरमाण्वादिद्रव्येषु च अन्यद् **देवमायासु** देवकृतगीत-नृत्यादिकपटेषु **न सम्मुह्यति** मूढतां न प्राप्नोति मोहं च न गच्छति । एतदसम्मोहलिङ्गम् ।।९३।।

**दीपिका** - एषां व्याख्या - **१-परिषहोपसर्गैर्ध्यानान्न चाल्यते धीरः** स्थिरस्तेभ्यो **न बिभेतीत्य-**वधः, २- **'सुहु०'** सूक्ष्मेष्वतिगहनेषु **भावेष्वर्थेषु न च देवमायासु मुह्यतीत्यसम्मोहः** ।। ९१ ।।

**अवचूर्णिः** - भावार्थमाह - **चाल्यते** ध्यानान्न **परीषहोपसर्गैर्बिभेति** वा **धीरो न** तेभ्य इत्यवधलिङ्गम्।।९१।।

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

**अवचूरिः** - भावार्थमाह - **चालि०** ।। **चाल्यते** ध्यानान्न **परीषहोपसर्गैर्बिभेति** वा **न** तेभ्यो **धीर** इत्यवधलिङ्गम्, **सूक्ष्मेसु** अत्यन्तगहनेषु **न सम्मुह्यति** सम्मोहं याति, **भावेषु** पदार्थेषु **न देवमायासु** अनेकरूपास्वित्यसम्मोहलिङ्गम् ।।९१।।

**टीका** - अवधादीन् विवृण्वन्नाह – **चाल्यते** ध्यानान्न **परीषहोपसर्गैर्न** वा **बिभेति धीरो** दृढ इत्यवधलिङ्गः। **सूक्ष्मेषु** गहनेषु **भावेषु न सम्मुह्यति, न देवमायास्व**नेकास्वित्यसम्मोहो लिङ्गम्।। ९१।।

**देहविवित्तं पेच्छइ, अप्पाणं तह य सव्वसंजोगे ।**
**देहोवहिवोसग्गं, निस्संगो सव्वहा कुणइ ।। ९२ ।।**

**अर्थलेशः - देह लिंगं[विवित्तं] गाथा** ।। ३-साधुः **आत्मानं सर्वसंयोगांश्च देहविविक्तान्** देहात् पृथक्भूतान् **पश्यति** । एतत् विवेकलिङ्गम्, ४-तथा साधुः **निःसङ्गः** सन् निःपरिग्रहः सन् **देहोपधिव्युत्सर्गं सर्वथा करोति,** एतद् व्युत्सर्गलिङ्गम् ।।९४।।

**दीपिका - ३-आत्मानं देहविविक्तं पश्यति तथा सर्वसंयोगान्** विविक्तान् पश्यतीति विवेकः, ४-**देहोपधिव्युत्सर्गं, निसङ्गः सर्वथा करोती**ति व्युत्सर्गः ।। ९२ ।। गतं लिङ्गद्वा० ११ ।

**अवचूर्णिः - देहविविक्तं पश्यत्यात्मानं तथा सर्वसंयोगान्** इति विवेकलिङ्गम्, **देहोपधिव्युत्सर्गं निःसङ्गः सर्वथा करोती**ति व्युत्सर्गलिङ्गम् ।। ९२ ।।

**अवचूरिः - देह०** ।। **देहविविक्तं पश्यत्यात्मानं तथा च सर्वसंयोगानिति** विवेकलिङ्गम्, **देहोपधिव्युत्सर्गं निःसङ्गः करोति** इति व्युत्सर्गलिङ्गम् ।।९२।।

**टीका -** स्पष्टा । नवरं पूर्वार्धे विवेको लिङ्गम्, उत्तरार्धे व्युत्सर्गः ।। ९२ ।।

**होंति सुहासवसंवरविणिज्जरामरसुहाइं विउलाइं ।**
**झाणवरस्स फलाइं, सुहाणुबंधीणि धम्मस्स ।। ९३ ।।**

**अर्थलेशः - होंति गाथा** ।। **धर्म्मध्यानस्य** एतानि **फलानि** भवन्ति । किं विशिष्टानि फलानि ? **शुभाश्रवविनिर्जरामरसुखानि शुभानां** सातावेदनीयादीनां कर्मणा**माश्रवो** बन्धः, पापकर्मणां **विनिर्जरा** मोक्षः **अमरसुखानि** देवलोकसुखानि तथा **विपुलानि** विस्तीर्णानि । किं विशिष्टस्य धर्म्मध्यानस्य? **ध्यानवरस्य ।** किं विशिष्टानि फलानि? [**शुभानुबन्धीनि** सुकुलप्रत्यायाति-पुनर्बोधिलाभ-भोग-प्रव्रज्या-केवल-शैलेश्य-पवर्गानुबन्धीनि ।।९५।।]

**दीपिका -** धर्मशुक्लयोः फलमाह- **शुभाश्रवः** पुण्याश्रवः, **संवरो** ऽशुभकर्म्मागमरोधः, **विनिर्जरा** कर्म्मक्षयः, **अमरसुखानि** देवसुखानि, **विपुलानि** दीर्घस्थित्यादिभि**र्धर्म्मध्यानवरस्य फलानि भवन्ति।** **'सुहाणु०'** सुकुल-बोधिलाभ-भोग-दीक्षा-मोक्षानुबन्धीनि ।। ९३ ।।

**अवचूर्णिः** - पूर्वं धर्म्मफलमाह - **शुभाश्रवः** पुण्याश्रवः, **संवरो** अशुभकर्म्मागमनिरोधः **विनिर्जरा**

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

कर्म्मक्षयः, **अमरसुखानि** च, **शुभानुबन्धीनि** सुकुलप्रत्यायाति-पुनर्बोधिलाभ-भोग-प्रव्रज्या- [केवल-शैलेस्य]-पवर्गानुबन्धीनि **धर्मध्यानस्य** ।। ९३ ।।

**अवचूरिः** - प्रथमं धर्मफलमाह - **होंति०** ।। **शुभाश्रव-संवर-निर्जराऽमरसुखानि शुभाश्रवः** पुण्याश्रवः, **संवरो**ऽशुभकर्मागमनिरोधः, **विनिर्जरा** कर्मक्षयः **[अमरसुखानि** एतानि **विपुलानि ध्यानवरस्य** ध्यानप्रधानस्य **फलानि] शुभानुबन्धीनि** सुकुलप्रत्यायाति-पुनर्बोधिलाभ-भोग-प्रव्रज्या-ऽपवर्गानुबन्धीनि **धर्मस्य** ध्यानस्य ।।९३।।

**टीका** - फलद्वारे प्रथमं धर्मफलमाह - **शुभाश्रवः** पुण्याश्रवः, **संवरो** अशुभकर्मागमनिरोधः, **विनिर्जरा** कर्मक्षयः, **अमरसुखानि विपुलानि, धर्मध्यानस्य शुभानुबन्धीनि फलानि भवन्ति** ।। ९३ ।।

**ते य विसेसेण, सुभासवादओऽणुत्तरामरसुहं च ।**
**दोण्हं सुक्काण फलं, परिनिव्वाणं परिल्लाणं ।। ९४।।**

**अर्थलेशः** - [**ते य गाथा** ।।] अन्यद् **अनुत्तरामरसुखं** स्यात् । **परयो शुक्लध्यानभेदयोः फलं निर्वाणं** मुक्तिः स्यात् ।।९६।।

**दीपिका - ते च शुभाश्रवादयो विशेषेण द्वयोराद्ययोः परयोः शुक्लयोः फलं परिनिर्वाणं** मोक्षः।।९४।।

**अवचूर्णिः** - शुक्लमधिकृत्याह - **ते च विशेषेण शुभाश्रवादयोऽनुत्तरामरसुखं च द्वयोः शुक्लयोः फलमाद्ययोः, परिनिर्वाणं 'परिल्लाणं'** ति चरमयोर्द्वयोः ।। ९४ ।।

**अवचूरिः** - शुक्लध्यानमधिकृत्याह - **ते अ०** ।। **ते च विशेषेण शुभाश्रवादयोऽनुत्तरामरसुखं च द्वयोः शुक्लयोः फल**माद्ययोः **परिनिर्वाणम् परिल्लाणं** ति चरमयोर्द्वयोः ।।९४।।

**टीका** - शुक्लध्यानस्याह - **ते** चाऽनन्तरोक्ता **विशेषेण शुभाश्रवादयोऽअनुत्तरामरसुखं च द्वयो**राद्ययोः **शुक्लयोः फलं परयो**रुत्तरयोः **परिनिर्वाणम्** ।। ९४ ।।

**आसवदारा संसारहेयवो, जं ण धम्मसुक्केसु ।**
**संसारकारणाइं न तो, धुवं धम्मसुक्काइं ।। ९५ ।।**

**अर्थलेशः - आसव गाथा** ।। **आश्रवद्वाराणि** पापकर्म्मबन्धनप्रकाराः **संसारहेतवः** स्युः । **यस्मात्** कारणाद् **धर्म्मध्यान-शुक्लध्यानयोर्व**र्त्तमानस्य जीवस्य तानि पापबन्धनद्वाराणि **न** भवन्ति । **तत्** कारणाद् **ध्रुवं** निश्चितं **धर्म्मध्यानशुक्लध्याने संसारकारणे न** भवतः ।।९७।।

**दीपिका - आश्रवद्वाराणि संसारहेतव**स्तानि **धर्म्मशुक्लयोर्यत्र** सन्ति **तस्माद्धर्म्मशुक्ले संसारकारणे न** स्तः ।। ९५ ।।

**अवचूर्णिः** - अथवा सामान्येनैवाह -

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

**अवचूरिः -** अथवा सामान्येनैव संसारप्रतिपक्षभूते एते इति दर्शयति - **आस० ।। [आश्रवद्वाराणि संसारहेतवो यस्मात्र धर्मशुक्लयोर्भवन्ति संसारकारणानि तस्माद् ध्रुवं धर्मशुक्ले** ।।९५।।]

**टीका** - यद्वा भवविपक्षभूते इमे इत्याह - **आश्रवद्वाराणि संसारहेतवः** तानि च **यत्र धर्मशुक्लयोः** स्युः **तत्र संसारकारणे ध्रुवं धर्मशुक्ले** ।। ९५ ।।

**संवरविणिज्जराओ, मोक्खस्स पहो तवो पहो तासिं ।**
**झाणं च पहाणंगं, तवस्स तो मोक्खहेऊ तं ।।९६।।**

**अर्थलेशः - संवर गाथा ।। संवरविनिर्जरे मोक्षस्य पन्था** स्यात् । **तयोः** संवरविनिर्जरयोः **पन्था तपो** भवति । **तपसः प्रधानाङ्गं ध्यानम्** अन्तरङ्गतपोमध्ये वर्त्तमानत्वात् । **ततः** कारणात् **तद्** ध्यानं **मोक्षहेतुर्भवति** ।।९८।।

**दीपिका - संवरनिर्जरे मोक्षस्य पन्थाः। तयोः** संवरनिर्जरयोः **पन्थाः तपः, तपसश्च प्रधानाङ्गं ध्यानम्, ततो मोक्षहेतुः** ।।९६।।

**अवचूर्णिः -** संसारप्रतिपक्षतया च मोक्षहेतुर्ध्यानमित्याह– **तपः पन्थाः तयोः** संवरनिर्जरयोः, **मोक्षहेतुस्तद्** ध्यानम् ।।९६ ।।

**अवचूरिः -** संसारप्रतिपक्षतया च मोक्षहेतुर्ध्यानमित्याह - **संव० ।। संवर-निर्जरे मोक्षस्य पन्थाः, तपः पन्थाः तयोः** संवरनिर्जरयोः, **ध्यानं च प्रधानाङ्गं तपसः, ततो मोक्षहेतुस्तद्** ध्यानम् ।।९६।।

**टीका** - अतो मोक्षहेतुर्ध्यानमित्याह– **संवरनिर्जरे मोक्षस्य पथः। तयोश्च तपः पन्थाः । तपसश्च प्रधानाऽङ्गं ध्यानम् । ततो मोक्षहेतुकम्** ।। ९६।।

**अंबरलोहमहीणं, कमसो जह मलकलंकपंकाणं ।**
**सोज्झावणयणसोसे, साहेंति जलाणलाइच्चा ।।९७।।**

**अर्थलेशः - अंबर गाथा ।। यथा अम्बरलोहमहीनां** वस्त्रलोहपृथ्वीनां **क्रमशो** यथा **मलकलङ्कपङ्कानां शुद्ध्यपनयनशोष**विधेन **जलानलादित्याः साधयन्ति** । यथा जलं वस्त्रस्य मलं शोधयति। अनलो अग्नि लोहस्य कलङ्कं किट्टम् अपनयति । आदित्यः पृथिव्याः कर्दमं शोषयति। तथा ध्यानदृष्टान्तोऽग्रेतनगाथायां कथयिष्यते ।।९९।।

**दीपिका - यथा जलानलादित्या वस्त्रलोहमहीनां क्रमेण मलकलङ्कपङ्कानां शोध्यपनयनशोषान् साधयन्ति** । कलङ्कः किट्टः ।। ९७ ।।

**अवचूर्णिः -** अमुमेवार्थं दृष्टान्तैराह - **मलकलङ्कपङ्कानां** यथासङ्ख्यं **शोध्यपनयनशोषान्** यथासङ्ख्यमेव **साधयन्ति जलानलादित्याः** ।। ९७ ।।

**अवचूरिः -** अमुमेवार्थं दृष्टान्तैराह - **अंब० ।। वस्त्रलोहार्द्रक्षितीनां क्रमेण यथा मल-कलङ्कपङ्कास्तेषां**

**[शोध्यापनयनशोषान्** यथासङ्ख्यमेव **साधयन्ति जलाऽनलाऽऽदित्याः** ।।९७।।**]**

**टीका** - अमुमर्थं दृष्टान्तैराह - **वस्त्रलोहार्द्रक्षितीनां क्रमशो मलकलङ्कपङ्कानां शोध्यपनयनशोषान् जलानलादित्याः साधयन्ति** ।। ९७ ।।

**तह सोज्झाइसमत्था, जीवंबरलोहमेइणिगयाणं ।**
**झाणजलाणलसूरा, कम्ममलकलंकपंकाणं ।। ९८।।**

**अर्थलेशः - तह सो गाथा ।। तथा** पूर्वगाथोक्तदृष्टान्तैः **ध्यानजलानलसूराः** ध्यानमेव **जलम्,** ध्यानमेव**ानलोऽ**ग्निः, ध्यानमेवादित्यः। एते **जीवाम्बरलोहमहीगतानां जीवा** एव **अम्बर** वस्त्रम्, जीव एव **लोहम्,** जीव एव **मेदिनी** पृथ्वी तत्र **गतानां** स्थितानां **कर्म्ममलकलङ्कपङ्कानां कर्म्मैव मलः,** कर्म्मैव **कलङ्कः** किट्टम् कर्म्मैव **पङ्कः** कर्दमः एतेषां **शुद्ध्यादिसमर्था** भवन्ति। ध्यानजलं जीववस्त्रगतं कर्म्ममलं शोधयति । जीवलोहगतं कर्म्मकिट्टं ध्यानाग्निरपनयति। ध्यानसूर्यः जीवपृथ्वीगतं कर्मकर्द्दमं शोषयति । इति भावार्थः ।।१००।।

**दीपिका - तथा ध्यानजलानलसूर्या जीवाम्बरलोहमेदिनीगतानां कर्म्ममलकलङ्कपङ्कानां शोध्यादिसमर्थाः** शोध्यापनयनशोषसमर्थाः ।। ९८ ।।

**अवचूर्णिः - शोध्यादिसमर्थाः ध्यानमेव जलानलसूर्याः, कर्मैव मलकलङ्कपङ्का**स्तेषाम् ।। ९८।।

**अवचूरिः - तह० ।। तथा शोध्यादिसमर्था जीवाऽम्बरलोहमेदिनीगतानां ध्यानमेव जलानलसूर्याः कर्मैव मलकलङ्कपङ्कानाम्** ।।९८।।

**टीकाः - तथा जीवाम्बरलोहमेदिनीगतानां कर्ममलकलङ्कपङ्कानां ध्यानजलानलसूराः शोध्यादिसमर्था** भवन्ति ।। ९८ ।।

**तावो सोसो भेओ, जोगाणं झाणओ जहा नियय ।**
**तह तावसोसभेया, कम्मस्स वि झाइणो नियमा ।।९९।।**

**अर्थलेशः - तावो सो गाथा ।। ध्यायिनो** ध्यानकर्तु**र्ध्यानतो योगानां** मनोवचनकायव्यापाराणां **यथा तापं शोषः भेदश्च नियमान् नियतं** निश्चितं भवन्ति **तथा कर्मणामपि तापशोषभेदाः** स्युः ।।१०१।।

**दीपिका - तापो** दुःखम्, **शोषः** कार्श्यम्, **भेदो** विदारणम्, एते **ध्यानाद् योगानां** कायादीनां **यथा** स्युस्**तथा ध्यायिनः कर्म्मणोऽपि** तापादिकं जायते ।। ९९ ।।

**अवचूर्णिः** - किञ्च - **योगानां ध्यानतो यथा नियतम**वश्यम्, **तापो** दुःखम्, तत एव **शोषो** दौर्बल्यम्, तत एव **भेदो** विदारणं वागादीनाम्, **तथा तापादयः कर्म्मणोऽपि** स्यु**र्ध्यायिनः** ।। ९९।।

**अवचूरिः - तावो० ।। योगानां ध्यानतो यथा नियतम**वश्यम्, **तापो** दुःखम् तत एव **शोषो**

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

दौर्बल्यम्, तत एव **भेदः** विदारणं वागादीनां **तथा तापादयः कर्मणोऽपि** स्युः **ध्यायिनः** ।।९९।।

**टीका - तापस्ततः शोषस्ततो भेदोऽ**न्यथात्वं **योगानां** कायादीनां **यथा ध्यानान्नियतं** स्युः दुर्बलिकापुष्पमित्रादेरिव **तथा तापशोषभेदाः कर्मणोपि ध्यायिनः** स्युः ।। ९९ ।।

**जह रोगासयसमणं, विसोहणविरेयणोसहविहीहिं ।**

**तह कम्मामयसमणं, झाणाणसणाइजोगेहिं ।। १००।।**

**अर्थलेशः - जह गाथा ।। यथा** वैद्यो **विशोषणविरेचनौषधिविधिभिः रोगाशयशमनं** क्रियते। तत्र विशोषनं लङ्घनम्, **विरेचनं** रेचदानम्, **औषधिः** प्रशधा । एतैर्प्रकारैर्वैद्या रोगान् शमयन्तीत्यर्थः। **तथा** जिनवैद्योपदिष्टैः **ध्यानानशनादियोगैः कर्मामयशमनं** स्यात् ।।१०२।।

**दीपिका - यथा रोगाशयस्य** रोगनिदानस्य **शमनं विशोधनविरेचनौषधादिभिः** स्यात् । **निदानं** हेतुः, **विशोधनं** लङ्घनम्, **तथा कर्म्माशयस्य** कर्मकारणस्य रोगादेः **शमनं ध्यानानशनादियोगैः** स्यात्। **अनशनम्** उपवासादिः ।। १०० ।।

**अवचूर्णिः** - किञ्च– **रोगाशयशमनं** रोगनिदानचिकित्सा **विशोषणविरेचनौषधविधिभिर**भोजनादिप्रकारैः, **तथा कर्मामयशमनं ध्यानानशनादिभिर्योगैः** ।। १०० ।।

**अवचूरिः** - किञ्च - **जह० रोगाशयशमनं** रोगनिदानचिकित्सा **विसोषण-विरेचनौषधविधिभिः** अभोजन-विरेकौषधप्रकारैः **तथा कर्मामयशमनं ध्यानानशनादिभिर्योगैः, आदिशब्दाद्** ध्यानवृद्धिकारकशेष-तपोभेदग्रहः ।।१००।।

**टीका- यथा रोगाशयशमनं विशोषणविरेचनौषधविधिभिः, तथा कर्मामयशमनं ध्यानानश-नादियोगैस्त**पोरूपैः ।। १०० ।।

**जह चिरसंचियमिंधणमनलो पवणसहिओ दुयं दहइ ।**

**तह कम्मिंधणममियं, खणेण झाणाणलो डहइ ।।१०१।।**

**अर्थलेशः - जह चिर गाथा ।। यथा अनलोऽ**ग्निः **चिरसञ्चितमिन्धनं ध्रुवं** शीघ्रं **दहति** । **तथा ध्यानानलः क्षणेन अमितं** प्रचुरं **कर्मेन्धनं दहति** ।।१०३।।

**दीपिका - 'दुयं'** द्रुतं, **कर्म्मेन्धनममितम्** ।। १०१।।

**अवचूर्णिः** - किञ्च - **कर्मेन्धनममितम्** ।। १०१ ।।

**अवचूरिः** - किञ्च - **जह०** ।। **[यथा चिरसञ्चितमिन्धनमग्निः पवनसहितः द्रुतं दहति तथा** दुःखतापहेतुत्वात्**] कर्मेन्धन[ममितमनेक**भवोपात्तं **क्षणेन ध्यानानलः** असौ **दहति** अकर्मीकरोति**]** ।।१०१।।

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

**टीका** - किञ्च - स्पष्टा ।। १०१।।

**जह वा घणसंघाया, खणेण पवणाहया विलिज्जंति ।**
**झाणपवणावहूया, तह कम्मघणा विलिज्जंति ।।१०२।।**

**अर्थलेशः - जह वा गाथा** ।। **वा** अथवा **यथा घनसङ्घाताः पवनाहताः क्षणेन विलीयन्ते तथा ध्यानपवनावधूता** ध्यानपवनप्रेरिता **कर्म्मघना विलीयन्ते** विलयं गच्छन्ति ।।१०४।।

**दीपिका - यथा वा घनसङ्घाता** मेघसमूहा **विलीयन्ते तथा कर्म्मघनाः** ।। १०२ ।।

**अवचूर्णिः - ध्यानपवनावधूताः** ।। १०२ ।।

**अवचूरिः - जह०** ।। **[यथा वा घनसङ्घाता मेघौघाः क्षणेन पवनाहता विलयं यान्ति तथा] ध्यानपवनावधूताः कर्मैव** जीवस्वभावावरणाद् **घना विलीयन्ते** ।।१०२।।

**टीका** - स्पष्टा ।। १०२ ।।

**न कसायसमुत्थेहि य, वाहिज्जइ माणसेहिं दुक्खेहिं।**
**ईसाविसायसोगाइएहिं झाणोवगयचित्तो ।। १०३ ।।**

**अर्थलेशः - न कसाय गाथा**।। ध्यानसुनिश्चलचित्तो जीवः **कषायसमुत्थैर्मानसैः दुःखैर्न बाध्यते** न पीड्यते । तथा **ध्यानोपगतचित्तो** जीव **ईर्षाविषादशोकादिभिश्च** न बाध्यते ।।१०५।।

**दीपिका** - तथा- **ईर्ष्याविषादादिभिश्च** ।। १०३ ।।

**अवचूर्णिः** - इदमन्यदिहलोकफलम् - **न बाध्यते** न पीड्यते, प्रतिपक्षाभ्युदयोपलम्भजनितो मत्सरः **ईर्ष्या, विषादः** वैक्लव्यम्, आदेर्हर्षादिग्रहः ।। १०३ ।।

**अवचूरिः** - किञ्चेदमन्यद् इहलोकप्रतीतमेव ध्यानफलमित्याह - **न क०** ।। **न** क्रोधाद्युद्भवैश्च **बाध्यते** पीड्यते **मानसैर्दुखैः ईर्ष्या-विषाद-शोकादिभिः [**मत्सरविशेष **ईर्ष्या, विषादो** वैक्लव्यम् **शोको** दैन्यम् **आदिशब्दाद्** हर्षादिपरिग्रहः, **ध्यानोपगतचित्तः]** ।।१०३।।

**टीका** - किञ्च लोकप्रतीतमेव ध्यानफलमाह– स्पष्टा ।।१०३।।

**सीयायवाइएहि य, सारीरेहिं सुबहुप्पगारेहिं ।**
**झाणसुनिच्चलचितो न वहिज्जइ निज्जरापेही ।। १०४।।**

**अर्थलेशः - सीया गाथा** ।। **ध्यानसुनिश्चलचित्तः** साधुः **शीतातपादिभिः सुबहुप्रकारैः शारीरैः दुखैर्न व्यथ्यते** व्यथां न प्राप्नोति । किं विशिष्टः साधु ? **निर्जरापेक्षी** कर्म्मनिर्जरावाञ्छावान् ।।१०६।।

**दीपिका - शीतातपादिकैः शारीरैर्दुःखैः,** अत्र कारणे कार्योपचारः। **न विध्यते** [बाध्यते],

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

**निर्जराया अपेक्षी** कर्म्मक्षयापेक्षकः। ।। १०४।। द्वा० १२

**अवचूर्णिः - न बाध्यते** ध्यानसुखाद्, अथवा न शक्यते चालयितुं **निर्जरापेक्षी** ।। १०४।।

**अवचूरिः - सीया०** ।। **शीतातपादिभिश्चादेः** क्षुदादिग्रहः, **[शारीरैः सुबहुप्रकारैः ध्यानसुनिश्चलचित्तो] न बाध्यते** ध्यानसुखादिति गम्यम् अथवा न शक्यते चालयितुं **निर्जरापेक्षी** ।।१०४।।

**टीका** - स्पष्टा । नवरम् **न 'वहिज्जइ'** न व्यथ्यते ।। १०४।।

**इय सव्वगुणाधाणं, दिट्ठादिट्ठसुहसाहणं झाणं ।**
**सुपसत्थं सद्धेयं, नेयं झेयं च निच्चंपि ।। १०५ ।।**

**अर्थलेशः - इय गाथा** ।। भव्यजीवैर्ध्यानं **श्रद्धेयं ज्ञेयं नित्यमपि ध्येयम्** । किं विशिष्टं ध्यानम् इति ? पूर्वोक्तप्रकारेण **सर्वगुणाधानं** सर्वगुणामारोपकं तथा **दृष्टादृष्टसुखसाधनं दृष्टानि** इहलोकसुखानि राज्यादीनि **अदृष्टानि** स्वर्गमोक्षादीनि तेषां साधकम्, अपरं **सुप्रशस्तम्** ।।१०७।।

**दीपिका - एवं सर्वगुणानामाधानं** स्थानम् । **श्रद्धेयं** नान्यथेति, **ज्ञेयं** स्वरूपतो **ध्येयं** चिन्तनीयं क्रियया । एवं च रत्नत्रयमप्याराधितं स्यान्नित्यमपि सदैव, नन्वेवं शेषक्रियालोपः ? न, तदासेवनस्यापि तत्त्वतो ध्यानत्वात् । ततो नास्ति साधूनां क्रिया या आगमानुसारेण क्रियमाणा ध्यानं न स्यादिति ।।१०५।।

**अवचूर्णिः** - उक्तं फलम्, उपसंहरन्नाह - **एवं सर्वगुणाधानं ध्येयं नित्यमपि** ।। १०५ ।। आह-एवं शेषक्रियालोपः प्राप्नोति, न, तदासेवनस्यापि तत्त्वतो ध्यानत्वात्, नास्ति काचिदसौ क्रिया या आगमानुसारेण क्रियमाणा साधूनां ध्यानं न स्यात् अपि तु ध्यानमेव ।

**अवचूरिः** - उक्तं फलम्, उपसंहरन्नाह - **इअ०** ।। **एवमशेषगुणस्थानं दृष्टादृष्टसुखसाधनं ध्यानं सुप्रशस्तकरं** तीर्थकरादिभिरासेवितत्वात्, यत एवमतः **श्रद्धेयं** नान्यथैतदित्यादिभावनया **ज्ञातव्यं** स्वरूपतः **ध्येयम**नुचिन्तनीयं क्रियया नित्यमपि ।

आह - एवं शेषक्रियालोपः प्राप्नोति ? न, तदासेवनस्यापि तत्त्वतो ध्यानत्वान्नास्ति काचिदसौ क्रिया या आगमानुसारेण क्रियमाणा साधू[नां ध्या]नं न स्यात् ।।१०५।।

पंचु० ।।१०६।। समाप्ता ध्यानशतकावचूरि : ।

**टीका** - अथोपसंहरन्नाह– स्पष्टा । एवं तर्हि सर्वक्रियालोपः स्यात्, नैवम्, सर्वस्यापि जिनोक्तायाः क्रियाया ध्यानत्वात् ।। १०५ ।। समाप्तं ध्यानशतम् ।।

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

**✽पंचु(सत्तु)त्तरेण गाहासएण झाणस्सयं समक्खायं ।**
**जिणभद्दखमासमणेहिं कम्मसोहीकरं जइणो ।।१०६।।**

ध्यानशतं समत्तं सूत्रं ।।छ।। ।।छ।। ।।छ।। कल्याणमस्तु ।। छ।। ।।छ।। ।। शुभं भवतु।।

**अर्थलेश- ✽सत्तुत्तरेण गाथा ।। जिनभद्रक्षमाश्रमणैः ध्यानस्य शतकं सप्तोत्तरेण गाथाशतेन समाख्यातम् ।** किं विशिष्टं शतकम् ? **यतः कर्म्मविशोधिकरम्** ।। १०८ ।।

**इति ध्यानशतकार्थलेशः सम्पूर्णः।।**

सा० जीवराजकेन पठनार्थं लिखापितम् ।।

**अवचूर्णिः - पंचु०** ।। समाप्ता ध्यानशतकावचूर्णिः ।।

**अवचूरिः - पंचु०** ।। समाप्ता ध्यानशतकावचूरिः ।।

।। इति वैक्रमीये २०६५ तमे वर्षे विजयकीर्तियशसूरिणा संशोधिताः संपादिताश्च

पूज्यपादश्रीमज्जिनभद्रगणिक्षमाश्रमणविरचित**ध्यानशतकस्य**

पूर्वाचार्यकृत **अर्थलेशः,**

पूज्यपादाचार्यश्रीमाणिक्यशेखरसूरिकृता **दीपिकाटीका,**

पूज्यपादाचार्यश्रीज्ञानसागरसूरिकृता **अवचूर्णिः,**

पूज्यपादमुनिश्रीधीरसुन्दरगणिरचिता **अवचूरिः,**

पूज्यपादाचार्यश्रीतिलकसूरिकृता **च लघुटीका**

समाप्ताः ।।

✽ बहुषु आदर्शेषु ध्यानशतकग्रन्थं पञ्चोत्तरेण गाथाशतेन समाख्यातम्, अस्मिनादर्शे तु अष्टोत्तरेण गाथाशतेन समाख्यातम् ।। ध्यानशतं समाप्तम् ।।

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

# परिशिष्टम्-४

## श्रीमलधारगच्छीयसूरिपुरन्दरश्रीहेमचन्द्रसूरीश्वरसंदृब्धं श्रीहारिभद्रीयावश्यकवृत्तिटिप्पनगतं ध्यानशतकटिप्पनकम् ।

**ध्यानशतके, गा. ४ : किं तर्हि ? - भावनानुप्रेक्षात्मकं चेत इति** एतदुक्तं भवति - यदा धर्म्मध्यानादवतरति तदा एकोऽहमशरणश्चेत्याद्या इहैव वक्ष्यमाणा अनुप्रेक्षा विभावयति, पुनरपि च धर्म्मध्यानादिध्यानमारुरुक्षुर्भावना:- ज्ञानदर्शनाद्या वक्ष्यमाणस्वरूपाः परिभावयति, एतद्ध्यानान्तरमुच्यते, न पुनरेकस्माद् ध्यानादवतीर्यानन्तरमेवान्यद् ध्यानं प्रतिपद्यते, अनुप्रेक्षाभावनान्तरितं तु प्रतिपद्यते, ततोऽप्युत्तीर्ण्णस्यायमेव क्रम इत्येवं ध्यानसन्तानो भवत्यपीति ।

**गा. ६ : पूर्वमपि वियुक्तासंयुक्तयोर्बहुमतत्वेने**त्यादि, यदतीतकाले ममामुकः संयुज्य वियुक्तः आदित एव वा न संयुक्तस्तत्सुन्दरमभूद् इत्यतीतमनुमोदमानस्यातीतकालविषयमप्यार्त्तं भवतीति ।

**गा. ३५ : "जूइयर-सोलमिंठा" गाहा** सुगमा, नवरं सोला:-स्थानपाला:, उद्भ्रामका:-पारदारिका:।

**गा. ४५ : आज्ञापायविपाकसंस्थानविचयाय धर्म्य**मिति, विचयः परिचयोऽभ्यास इत्यनर्थान्तरम्, अनन्तरवक्ष्यमाणन्यायेनाज्ञाद्यभ्यासाय प्रवर्त्तमानस्य धर्म्मध्यानं भवतीत्यर्थः ।

**गा. ५१ : किं च-पएसभिन्नं शुभाशुभं यावत्-'कृत्वा पूर्व्वविधानमि**त्यादि पूर्व्वमहर्षिवचनत्वाद्गम्भीरमिदमस्मादृशामगम्यम्, आम्नायानुसारतस्तु गमनिकामात्रं किञ्चिदुच्यते - इह प्रदेशभिन्नः शुभाशुभरूपः कर्म्मविपाको भावनीय:, प्रदेशाश्च जीवस्य कर्म्माणवोऽभिधीयन्ते, तैश्च कियद्भिरेकैको जीवप्रदेश आवेष्टितः परिवेष्टित इति चिन्तनीयम्, अयं च प्रदेशबन्धः **कर्म्मप्रकृत्यादिषु** विस्तरेणाभिहितोऽत एव शुभाशुभं यावदित्यत्र शास्त्रकृद् यावच्छब्दं चकार, स चात्र संक्षेपतः कथ्यते - असंख्यातप्रदेशस्यापि जीवस्यासत्कल्पनया किल षट्पञ्चाशदधिके द्वे शते प्रदेशानां स्थाप्येते २५६, अस्य चैतावन्मानस्य राशेर्घनीकृतस्य यदागतं फलं तावत्प्रमाणैः कर्म्मप्रदेशैः किलैते जीवप्रदेशा आवेष्टिताः, बहुत्वप्रदर्शनमात्रं चेदम्, एकैकस्यापि जीवप्रदेशस्यानन्तानन्तकर्म्मवर्गणावेष्टितत्वात्, तत्रास्य कल्पितजीवप्रदेशराशेर्घनीकरणार्थं करणकारिकामाह- **'कृत्वा पूर्वविधान'मि**त्यादि अस्याश्चार्थः-

स्थाप्योऽन्तघनोऽन्त्यकृतिः स्थानाधिक्यं त्रिपूर्व्वगुणिता च ।<br>
आद्यकृतिरन्त्यगुणिता त्रिगुणा च घनस्तथाऽऽद्यस्य ।। १ ।।

एतत्कारिकानुसारतो गणितविधिज्ञेन विज्ञेयः, तत्र **स्थाप्योऽन्त्यघन** इति अन्त्योऽत्र द्विकस्तस्य घनोऽष्टौ ८ स्थाप्यन्ते, **अन्त्यकृतिरि**ति अन्त्यस्य द्विकस्य कृतिः-वर्गश्चत्वारः, **त्रिपूर्व्वगुणिता चे**ति त्रिभिः पूर्वेण च पञ्चकेन गुण्यते जाता षष्टिः, **स्थानाधिक्यमि**ति सा षष्टिः पूर्वस्थापिताष्टकस्याधस्तात्स्थानाधिक्येन स्थाप्यते

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

तद्यथा - ८०/६ **आद्यकृति**रिति द्विकापेक्षया आद्यः पञ्चकस्तस्य कृतिः पञ्चविंशतिः, **अन्त्यगुणिते**ति एषा कृतिरन्त्येन द्विकेन गुणिता जाता पञ्चाशत् **त्रिगुणा चे**ति सा त्रिगुणिता जातं सार्द्धशतम्, तच्च स्थानाधिक्येन स्थाप्यते -

| |
|---|
| ८५० |
| ६ |
| १ |

**धनस्तथाद्यस्ये**ति आद्यः पञ्चकस्तस्य घनः पञ्चविंशत्यधिकं शतं तदपि स्थानाधिक्येन स्थाप्यते । तद्यथा -

| |
|---|
| ८५२५ |
| ६१ |

एतावती च प्रक्रिया पूर्वगणितकारसंज्ञया पूर्व्वविधानमित्युच्यते। अत एतावता कृत्वा पूर्वविधानं पदयोरित्येतद्वयाख्यातमवसेयम्, स्थाप्योऽन्तघनो इत्यादि कारिका पुनरादित आवर्त्त्यते, तत्र च, **निर्युक्ते राशिरन्त्यमि**तिवचनादिदानीं पञ्चविंशतेरन्त्यसंज्ञा तस्याश्च घनः किल मीलित एवास्तेऽतः स्थाप्योऽन्त्यघन इत्युल्लङ्घ्यान्त्यकृतिः क्रियते, तत्र जातानि पञ्चविंशत्यधिकानि षट् शतानि, त्रिगुणिते जातानि पञ्चसप्तत्यधिकानि अष्टादश शतानि, पञ्चविंशतेः पूर्व्वः षट्कस्तेन गुणिते जातानि सार्द्धशतद्वयाधिकानि एकादशसहस्राणि स्थानाधिक्येन स्थाप्यन्ते यथा-

| |
|---|
| ८५२५० |
| ६१२५० |
| १० |
| १ |

- अनेन चानन्तरविधिना तावैव पूर्व्ववद्वर्ग्यावित्येतद् व्याख्यातं, तौ द्विकपञ्चकलक्षणौ पदविशेषौ पूर्व्वपूर्व्ववद् वर्ग्यावित्यस्यानुष्ठितत्वादुपलक्षणं चैतत् त्रिगुणषड्गुणत्वयोरिति, आद्यस्य षट्कस्य कृतिरन्त्यभूतया पञ्चविंशत्या गुणिता त्रिगुणिता च जातानि शतानि सप्तविंशतिः पूर्व्वराशौ स्थानाधिक्येन स्थाप्यते, तद्यथा-

| |
|---|
| ८५२५०० |
| ६१२५० |
| ११२७ |
| १ |

- अनेन च वर्गघनौ कुर्वतां तृतीयराशेः षट्कस्य वर्गो विहितस्तथा पञ्च-विंशत्या आद्यस्य षट्कस्य घने जातं शतद्वयं षोडशाधिकं स्थानाधिक्येन पूर्व्वराशौ क्षिप्यते, तद्यथा-

| |
|---|
| ८५२५२१६ |
| ६१२५० |
| ११२७ |
| १ |

षट्कलक्षणस्येत्येतद् व्याख्यातम्, ननु यथा त्रिभिश्च गुणितस्तत्कथं लभ्यते ? इत्याह- – **ततः प्राग्वदि**ति यदनुक्तं तत् पूर्व्ववत् सर्व्वं विधेयमिति भावः, अस्मिँश्च राशौ मीलिते आगतं १६७७७२१६। एतामेव कारिकां वृत्तिकृद् व्याचष्टे-**कृत्वा विधानमि**त्यादि, **पूर्वपदस्य घनादि** इत्यादि पूर्व्वपदस्य द्विकलक्षणस्य घनो विधेयः, आदिशब्दादवन्यादौ स्थापनं च कृत्वा तस्यैव द्विकलक्षणस्य पदस्य वर्गः, आदिशब्दात् त्रिगुणकरणादिपरिग्रहः ततो द्वितीयस्य पदस्य पञ्चकलक्षणस्येदमेव यद् द्विकस्य कृतं तद्विपरीतं क्रियते, एतदुक्तं भवति-द्विकस्य प्रथमं घनादि कृतम्, ततो वर्ग्गादि पञ्चकस्य तु प्रथमं वर्ग्गादि ततो घनादि क्रियते, एतच्च सर्व्वं कृतमेव भावनीयम्, तदेतावता कृत्वा पूर्व्वविधानमिति व्याख्यातम्, साम्प्रतं **तावेव पूर्व्ववद्वग्ग्यावे**तद् व्याचष्टे–एतावेव द्विकपञ्चकौ वर्ग्येते इति वर्ग्गघनौ कुर्यातामित्यादि व्याख्यानयति, ततः षट्कलक्षणस्य तृतीयपदस्येत्यादि, एतच्च सर्व्वं केषुचित्पुस्तकेषु न दृश्यते तेषु च दुरवगमत्वेनोत्सारितमिति लक्ष्यते बहुष्वादर्शेषु दर्शनादित्यलं प्रसङ्गेनेति ।

**गा. ५२ संस्थानं मुख्यवृत्त्या पुद्गलरचनाकारलक्षण**मित्यादि, एतदुक्तं भवति-मुख्यवृत्त्या तावत्परिमण्डलसमचतुरस्राद्येव रूपिद्रव्यसम्बन्धि संस्थानमुच्यते, धर्माधर्माकाशानां त्वमूर्त्तत्वेन मुख्यवृत्त्या न सम्भवत्येव संस्थानम्, किन्तु लोकेन सर्व्वतोऽवच्छिन्नं सदुपचारतस्तु प्रतिष्ठकाद्याकारं लोकक्षेत्रमुच्यते धर्म्माधर्म्मयोरपि तद्वृत्तित्वात् तन्निबन्धन एवोपचारतः संस्थानव्यवहारः अत एवाह–

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

**गा. ५२ धर्म्माधर्म्मयोरपि लोकक्षेत्रे**त्यादि, ननु लोकक्षेत्रस्यैव किं संस्थानमित्याह-

**गा. ५२ 'हिट्ठा मज्झे' गाहा व्याख्या**-अधस्तान्मध्ये उपरि च यथासंख्यं छव्विझल्लरिमृदङ्गसंस्थानो लोकोऽवसेयः। तत्र छव्वी-नाम विस्तीर्ण्णा पुष्पचङ्गेरी तदाकारोऽधोलोकः, तिर्यग्लोको झल्लर्याकारः, ऊर्ध्वलोकस्तु मृदङ्गाकार इति, नन्ववगतमुक्तक्रमेण धर्म्माधर्म्माकाशजीवपुद्गलानां संस्थानम्, अथ कालस्य किं संस्थानमित्याह-**अद्धागारो अद्धाखित्तागिती नेतो** त्ति अद्धायाः- कालस्याकारोऽद्धाक्षेत्रं-मनुष्यक्षेत्रं तदाकृतिर्ज्ञेयः, सूर्यक्रियाभिव्यङ्ग्यो हि कालः किल मनुजक्षेत्र एव वर्त्तते, अतो य एव तस्याकारः स एव कालस्याप्युपचारतो विज्ञेय इति गाथार्थः ।

**गा. ७६** सेलीसीति प्राकृतनामाधिकृत्य व्युत्पत्तिमाह-'**अहवा सेलोव्व इसी**' गाहा, व्याख्या-सेल इव इसी-महर्षिः शैलेशीति भवति, ननु शैलेशी तस्य महर्षेः काचिद्विशिष्टाऽवस्थैवोच्यते, कथं शैलेशीप्रतिपत्ता मुनिरप्येवं व्यपदिश्यत ? इत्याह-सोऽप्येवं व्यपदेश्यो भवति स्थिरतया हेतुभूतया, स हि महर्षिस्तस्यामवस्थायां शैलवत् स्थिरो भवतीति शैलेशीत्युच्यते, एनमेव प्राकृतशब्दमधिकृत्य व्युत्पत्त्यन्तरमाह-**सो वे**ति वाशब्दः पक्षान्तरद्योतकः, स शैलेशीप्रतिपत्ता मुनिः **अलेसी होई** त्ति तस्यामवस्थायामलेश्यः-समस्तलेश्याविकलो भवतीतिकृत्वा, अलेशीतिपदसम्बन्धिनोऽकारस्य लोपं कृत्वा सेलेशीति प्राकृतशब्देन सेलेसी प्रतिपत्ताभिधीयत इति गाथार्थः।।

**इति श्रीमलधारगच्छीयसूरिपुरन्दरश्रीहेमचन्द्रसूरीश्वरसंदृब्धं श्रीध्यानशतकटिप्पनकं समाप्तम् ।**

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

# परिशिष्टम्-५

## अज्ञातकर्तृकसर्वसिद्धान्तविषमपदपर्यायान्तर्गत-
## आवश्यकबृहद्वृत्तिविषमपदपर्यायान्तर्गताः
## ध्यानशतकवृत्तिविषमपदपर्यायाः ।★

## A

गा. १३ **स्थितिबहुत्वादिति** निगोदादीनामिति दृश्यम् ।

गा. १९ **रौद्रध्यानमिति** भवतीति योगः ।

गा. ३५ **सोल** इति ठाणापालाः, केचन पुनर्मद्यपा वदन्ति ।

गा. ३५ **उद्धमिया** इति पारदारिकाः ।

गा. ४७ **उभयवस्तूपपत्तिरिति** मतिदौर्बल्यतथाविधाचार्याभावः ।

गा. ६४ **गम्मए** इति गमनिका क्रियते ।

## B

गा. ४६ **चतुर्विंशतिरिति** अनेन 'नेरइया असुराई' इत्यादि गाथा सूचिता ।

गा. ४७ **उभयवस्तु** इति मतिदौर्बल्य-आचार्याभावः ।

गा. ४७ **तदभिधाने** इति ज्ञानावरणस्याभिधाने ।

गा. ५० **दृष्ट्यादि** इति दर्शनादि ।

गा. ५२ **अद्धाखेत्त** इति मनुष्यक्षेत्रम् ।

गा. ७६ **विप्प** इति विप्रत्ययनाभिः।

गा. ७६ **जं भणियं** इति अयं भावार्थः ।

गा. ८५ **प्रथमहेतु**रिति पूर्वप्रयोगलक्षणः।

गा. ८८ **धी संसार** इति वीसी[?]भावनामन्ये गाथा "सव्वठाणाणि" इयमपि ।

।। इति वैक्रमीये २०६५ तमे वर्षे विजयकीर्तियशसूरीणा संशोधिताः संपादिताश्चेमे आवश्यकहारिभद्रीयवृत्तिविषमपदपर्यायाः समाप्ताः ।।

---

★ अद्यावधि अमुद्रितात् सर्वसिद्धान्तविषमपदपर्यायग्रन्थाद् इमे विषमपदपर्यायाः गृहीताः । सम्पा० ।

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

# परिशिष्टम्-६

## पूज्यपादाचार्यश्रीमज्जिनदासगणिमहत्तरविरचितदशवैकालिकचूर्णौ

## ध्यानस्वरूपम् ।

इदाणिं झाणं । तस्स इमं सामण्णं लक्खणं-एगग्गचिंतानिरोहो झाणं, अग्गसद्दो आलंबणे वट्टति, एगग्गो-एगालंबणो, आलंबणाणि विसेसेण भण्णिहिंति, एगग्गस्स चिंता एगग्गचिंता, एतं झाणं छउमत्थस्स; निरोहो केवलिणो जोगस्स, चिंता नत्थि त्ति । "केवलिणो तन्निरोहो न संभवति" त्ति केति, तं न, दव्वमणनिरोहो तस्स भगवतो, जति एगग्गचिंता झाणं ततो जोगनिग्गहो सुतरामेव । जे पुण भणंति- "एगग्गचिंतानिरोहो झाणं' ति एतं न घडते केवलिणो, आभिणिबोहियभेदो चिंत त्ति, तम्हा दढमज्झवसाणं झाण"मिति, ते अविदितविग्गहभेदा सुत्तदूसणेणं बुद्धिमाहप्पमभिलसंति, परिफग्गु जंपियं, दढमज्झवसाओ एतं विसेसेण चिंतारूवं, को एतस्स अज्झवसातो ? यदुक्तं का चिंता ?, तक्कादतो सव्वे आभिनिबोहियनाणभेदा पढिता **तत्त्वार्थे ।** कालनिरोहो आ मुहुत्तातो, एगनाणस्स चिरमवत्थाणमसक्कं ती एतं उक्करिसेणं । तं सामण्णलक्खणोववातियं झाणं पत्तेयं लक्खणभेदेण इमाणि चत्तारि अट्ट-रोद्द-धम्म-सुक्काणि ।

१-ऋतं-दुःखं तन्निमित्तं दुरज्झवसातो **अट्टं** ।

२-रोदतीति रुद्रः, तेण कृतं **रौद्रं** अतिक्रूरतालिङ्गितम् ।

३-खमादिधम्माऽणपेतं **धम्मं** ।

४-सु त्ति-सुद्धं शोकं वा क्लामयति **सुक्कं** ।

परिणामविसेसो य फलविसेससूतितो त्ति भण्णति-

अट्टे तिरिक्खजोणी, रोद्दज्झाणेण गम्मती णरयं ।

धम्मेण देवलोगं, सिद्धिगती सुक्कझाणेणं ।।१।। [ ]

अट्टमवि सविसए लक्खणभेदेण चउधा । तस्स पढमभेदरूवं १-**अमणुण्णसंपओगसंपउत्ते तस्स विप्पओगाभिकंखी सतिसमण्णागते यावि भवति ।** अमणुण्णं-अणिट्ठं, एगीभावेण पगरिसेण य जोगो संपओगो, तेण अमणुण्णेण संपउत्तो, तस्स विप्पओगाभिकंखी 'सतिसमण्णागते' चिंतामणुगते तदेगग्गो चिंतानिरोहेण तमेव ज्ञायति, 'कहमणिट्ठविसयविप्पओगो भवेज्ज ? इट्ठेहिं वा संपयोगो ?' त्ति सुतिसण्णाहरणमेव तिव्वराग-दोसाणुगतो कम्ममुवचिणति, पढमभेओ ।

२-विवरीओऽयमुत्तरो-**मणुण्णसंपओगसंपउत्ते तस्स अविप्पओगाभिकंखी सतिसमण्णागते यावि भवति ।** मणुण्णा-मणोभिरामा विसता तेहिं संपउत्तो तेसिं अविप्पतोगत्थं तहेव सतिसमण्णाहरणमेव ते अच्चंतमभिलसंतो दुक्खपडिभीतो करेति बितियभेदो ।

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

३-अतो पुण **आयंकसंपओगसंपउत्तो तस्स विप्पओगाभिकंखी सतिसमण्णा०** । आतंको-दीहकालो कुट्ठाति जेण कहिंचि जीवति, "तकि कृच्छ्रजीवने" इति एतस्स रूवं, आयंकस्स उवद्दवो आसुकारी वा सूलातिरोगो, "रुजो भंगे" सद्दो, रुजतीति रोगः, अत एव आयंकग्गहणेण रोगो वि घेप्पति, जेणं आयंकस्स उवद्दवो ण पत्तेयं, तस्स विप्पतोगत्थं सतिसमण्णाहारं काउं झायति ततियभेदो ।

४-**परिज्झितकाम-भोगसंपउत्ते तस्स अविप्पओगाभिकंखी** [सतिसमण्णागते यावि भवति] । परिज्झा-अभिज्झा अभिलासो, कामो-फरिसो, तदुपकारिणो सेसिंदियविसया भोगा, परिज्झितो-अभिलसितो, तेहिं संपउत्तो । परिज्झतो परिज्झा जस्स संजाता तारकादिइतचि परिज्झितो । जं वा इंदचक्कवट्टिमहाभोगाभिलासेण सति वा असति वा तधेतदुपपत्तिसुतिसमण्णाहरणं णिदाणं नाम चतुत्थमट्टविहाणं ।

को पुण अट्टं झातति ? सामिविसेसेणं सो अविरत-देसविरत-पमत्तसंजता । कण्ह-नील-काउलेस्सा अंतग्गतो भावो । तेसिं इमे क्रियाविशेषा भावसूचकाः, तं०-१ कंदणता २ सोतणता ३ तिप्पणता ४ विलवणता । १-कंदणं-महता सद्देण विरवणं संपओग-विप्पओगत्थं २- सोयणं-अंसुपुण्णनयणस्स रोयणं ३- तिप्पणं-अंतगगतजरेण तितोगपरितावो ४- विलवणं-'हा हा ! कट्ठं, अहो ! विणट्ठो ह'मिति सोगसंबद्धमणेगसो भासणं । १ ।

अट्टाणंतरसमुद्दिट्टं **रोद्दं** । तं चउविहं-१ हिंसाणुबंधी २ मोसाणुबंधी ३ तेणाणुबंधी ४ सारक्खणाणुबंधी ।

१-**हिंसाणुबंधी**-सया सत्तवहपरिणामो सीहस्सेव,

२-**मोसाणुबंधी**-परब्भक्खाण-पेसुण्णपरुसवयणरती,

३-**तेणाणुबंधी**-परदव्वहरणाभिप्पातो निच्चं,

४-**सारक्खणाणुबंधी**-असंकणिज्जेसु वि संकितस्स परोवमद्देण वि सतसरीरसारक्खणं, सव्वत्थ सुतिसमण्णाहारो । तं कस्स भवति ? अविरतस्स देसविरतस्स य तिव्वकण्ह-नील-काउलेस्स । इमाणि तज्झाइणो **लक्खणाणि**- १-उस्सण्णदोसो २- बहुदोसो ३- अण्णातदोसो ४- आमरणंतदोसो ।

१-हिंसादीणं अण्णतरे अणवरतं पवत्तमाणो **उस्सण्णदोसो** ।

२-हिंसादिसु सव्वेसु पवत्तमाणो **बहुदोसो** ।

३-अण्णातहिंसादिदोस-फल-विवागो तिव्वतदज्झवसाणो **अण्णातदोसो** ।

४-परिगिलायमाणो वि आगतपच्छादेसो अभिमुहीभूतकम्मोदतो **कालसोगरिक** इव हिंसादिसु अपच्छाणुतावी **आमरणंतदोसो** । २ ।

पसत्थमुवरिमं झाणदुगं । तत्थ पढमं **धम्मं**, तं चउव्विहं चउपडोतारं । पडोतारवयणं सव्वविसेससूतणत्थं तस्स विधतो १-आणाविजए २- अवायविजए ३- विपाकविजए ४- संठाणविजए ।

१-**आणा**-वीतरागवयणं, तेण विजयणं **विजतो**-जिणभणित-दिट्ठेसु भावेसु धम्माऽधम्मा-ऽऽगास-जीव-

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

पोग्गलत्थिकाय-पुढविकायादि-समिति-गुत्ति-समय-लोगंत-समुप्पत्ति-विगम-ध्रुवादिसु परमसुहुमेसु हेउ-दिट्ठंतादीतेसु वि सुतोवएसेणेव एवमेतदिति अज्झवसातो आणाविजतो, जहा-"तमेव सच्चं निस्संकं जं जिणेहिं पवेदितं" [आचाराङ्ग श्रु० १ अ० ५ उ० ५ सू० ३] ।

२- मिच्छादरिसणा-ऽविरति-पमाद-कसाद-जोगाणं इह परलोए य विवागा इति णिच्छतो पसत्थनिच्छओ वा **अवातविजतो** ।

३- पुण्णा-ऽपुण्ण-कम्मप्पगडि-ठिति-अणुभाव-प्पएसबंधविविहफलोदयचिंतणं **विपाकविजतो** ।

४- अत्थिकाय-लोग-दीवोदहि-पव्वय-णदी-वलय-दव्व-खेत्त-काल-पज्जवविचयणं **संठाणविजतो** । तदत्थं सुतिसमण्णाहारो धम्मं । तं इंदियादिप्पमातणियत्तमाणसस्सेति भण्णति अपमत्तसंजयस्स ।

तस्स सामिणो **लक्खणाणि,** तं जहा-१ आणारुयी २ निसग्गरुयी ३ सुत्तरुयी ४ ओगाढरुयी । १-**आणारुयी**-तित्थगराणं आणं पसंसति २-**निसग्गरुती**-सभावतो जिणपणीए भावे रोयति ३-**सुत्तरुयी**-सुतं पढंतो संवेगमावज्जति ४-**ओगाढरुयी**-णयवायभंगगुविलं सुतमत्थओ सोऊणं संवेगजातसड्ढो झातति ४ ।

**आलंबणाणि** से चत्तारि जहा विसमसमुत्तरणे वल्लिमादिणि, तं०- १ वायण २ पुच्छण ३ परियट्टण ४ धम्मकहातो ।

इमा पुण से **अणुपेहाओ,** तंजहा-१-अणिच्चाणुप्पेहा २-असरणाणुप्पेहा ३- एगत्ताणुप्पेहा ४- संसाराणुप्पेहा, संगविजयणिमित्त**मणिच्चताणुप्पेहं** आरभते, "सव्वट्ठाणाइं असासताइं०" गाहा [मरण० गा- ५७४] १ । धम्मे थिरताणिमित्तं **असरणतं** चिंतयति, "जम्म-जरा-मरण०" गाहा [मरण० गा० ५७८] २ । संबंधिसंगविजताय **एगत्तमणुपेहेति,** "एक्को करेति कम्मं०" गाहा [महापच्चक्खाणे गा० १५] ३ । संसारुव्वेगकरणं **संसाराणुप्पेहा,** "धी संसारो जहियं०" गाहा [मरण० गा० ५९९] ४ । एसा ण केवलमप्पमत्तसंजतस्स उवसामग-खवगसेढीपज्जवसाणे उवसंतकसायस्स खीणकसायस्स एक्कारसंगवितो । एवमणेगविहाणं धम्मज्झाणमुपदिट्ठं ३ ।

धम्ममुपवादितगुणं । अणंतरुद्दिट्ठं तु तस्स **सुत्तं** [? चतुत्थं सुक्कं], तं चतुव्विहं, तं जहा-१-पुहत्तवियक्कं सविचारं २- एगत्तवियक्कं अविचारं ३- सुहुमकिरियमपडिवादिं ४- समुच्छिण्णकिरियमणियट्टिं ।

१-जं परमाणु-जीवादिएकदव्वे उप्पाय-विगम-धुवभावपज्जायाणेगणयसमाहितं पुहत्ते वा यस्स चिंतणं वितक्कसहचरितं सविचारं च एतं **पुहत्तवियक्कं सविचारं** ।

२-जं पुण पज्जवंतरविणियत्तितमेगपज्जवचिंतणं सवितक्कमेव विचारविउत्तं तु तं **एगत्तवियक्कमविचारं** । तं एतं उभयं सामिविसेसेण सुक्कलेसस्स चोद्दसपुव्वधरस्स अणुत्तरोववाताभिमुहस्स उत्तमसंघयणस्स । उत्तरमवि उभयं उत्तमसंघयणाधिकारा तस्सेव, जेण जीवा नियमा पढमसंघयणे सिज्झंति । बितियं सुक्कज्झाणमतिक्कंतस्स ततियमप्पत्तस्स एतं झाणंतरं, एत्थ वट्टमाणस्स केवलनाणमुप्पज्जति ।

जं पुण भवधारणीयकम्माणं वेयणिज्जादीणं आयुसमधिकाणं अचिन्तमाहप्पसमुग्घायसमीकयाणं तुल्लेसु वा

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

समुग्घायाभावे अंतोमुहुत्तभाविपरमदस्स मण-वयण-कायजोगणिरोधपरिणतस्स तिभागूणोरालियसरीरत्थितस्स केवलिस्स सण्णिपंचेंदिय-बेइंदिय-पणगजीवापज्जत्तगाहोसंखेज्जगुणहीणसुहुमजोगत्तं पडिवायविजुतं तं **सुहुमकिरियमपडिवाति** ।

जं तु सव्वजोगकृतोवरतं पंचहस्सक्खरुच्चारणाकालं सेलेसि वेदणीया-ऽऽउ-णाम-गोतनिस्सेसखवणमणियत्तिसभावं केवलिस्स तं परमसुक्कं **समुच्छिण्णकिरियमणियट्टिं ।**

एतेसिं **लक्खणाणि-** १- अव्वहे २- असम्मोहे ३- विवेगे ४- विओसग्गे । १- 'अव्वहे' विण्णाणसंपण्णो न बीभेति ण चलति, २- 'असम्मोहे' सुसण्हे वि पयत्थे ण सम्मुज्झति, ३- 'विवेगे' सव्वसंजोगविवेगं पेच्छति, ४- 'वितोसग्गे' सव्वोवहिवितोसग्गं करेति ।

इमातो **अणुप्पेहातो-** १-अवाताणुपेहा २-अणंतवत्तियाणुप्पेहा ३-असुभाणुप्पेहा ४-विपरिणामवत्तियाणुपेहा । १- जहत्थं आसवावातं पेक्खंति २- संसारस्स अणंतत्तं- ३- असुभत्तं० ४- सव्वभावविपरिणामित्तं० ।

ताणि पुण चत्तारि वि सुक्कज्झाणाणि सामिविसेसेण त्रि-एक-काययोग-अजोगाणं । त्रिजोगाणं भंगितसुतपादीणं पुहत्तवितक्कं, अण्णतरएगजोगाणं एगत्तवियक्कं, कायजोगाणं सुहुमकिरितमपडिवाति, अजोगाणं समुच्छिण्णकिरियमणियट्टिं । मणसोऽवस्सभावे वि पाहण्णेण निद्देसो सेसाण वि जोगाणं । जहा-"सव्वं कुट्ठं तिदोसं हि पवणेण तु तिगिच्छितं ।" [ ] । एतेसिं पुण सुक्कज्झाणाणं जहा जोगकतो विसेसो तहा इमो वि-एकाहारं सवितक्कं विचारं पढमं, बितियं च परमाणुम्मि अण्णत्थ वा एगदव्वे समसियमुभयं अवितक्काविचारं तु कट्ठं व तुल्लता अविचारं बितितं । को पुण वितक्को विचारो वा ? भण्णति-वितक्को पुव्वगतं सुतं, अत्थ-वंजण-जोगसंकमणं वियारो, एगदव्वविवण्णादिपज्जाओ अत्थो, वंजणं सद्दो, जोगा कायादयो । एतं सुक्कं । चतुव्विहमवि ज्झाणं परिसमत्तं ५ ।।

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

# परिशिष्टम्-७

## समर्थशास्त्रकारशिरोमणिसूरिपुरन्दर-श्रीहरिभद्रसूरीश्वरमहाराजा-विरचितश्रीसम्बोधप्रकरणे ध्यानाधिकारः ।

वीरं सुक्कज्झाणग्गिदड्ढकम्मिंधणं पणमिऊणं । जोईसरं सरण्णं झाणज्झयणं पवक्खामि ।।१।।

जं थिरमज्झवसाणं तं झाणं जं चलं तयं चित्तं । तं होज्ज भावणा वा अणुपेहा वा अहव चिंता ।।२।।

अंतोमुहुत्तमेत्तं चित्तावत्थाणमेगवत्थुंमि । छउमत्थाणं झाणं जोगनिरोहो जिणाणं तु ।।३।।

अंतोमुहुत्तपरओ चिंता झाणंतरं व होज्जाहि । सुचिरंपि होज्ज बहुवत्थुसंकमे झाणसंताणो ।।४।।

अट्टं रुद्दं धम्मं सुक्कं झाणाइ तत्थ अंताइं । निव्वाणसाहणाइं भवकारणमट्ट-रुद्दाइं ।।५।।

**[अह अट्टज्झाणं]**

अमणुण्णाणं सद्दाइविसयवत्थूण दोसमइलस्स । धणियं विओगचिंतणमसंपओगाणुसरणं च ।।६।।

तह सूल-सीसरोगाइवेयणाए विजोगपणिहाणं । तदसंपओगचिंता तप्पडियाराउलमणस्स ।।७।।

इट्ठाणं विसयाइण वेयणाए य रागरत्तस्स । अवियोगज्झवसाणं तह संजोगाभिलासो य ।।८।।

देविंद-चक्कवट्टित्तणाइगुणरिद्धिपत्थणामईयं । अहमं नियाणचिंतणमण्णाणाणुगयमच्चंतं ।।९।।

एयं चउव्विहं राग-द्दोस-मोहंकियस्स जीवस्स । अट्टज्झाणं संसारवद्धणं तिरियगइमूलं ।।१०।।

मज्झत्थस्स उ मुणिणो सकम्मपरिणामजणियमेयं ति। वत्थुस्सहावचिंतणपरस्स सम्मं सहंतस्स ।।११।।

कुणउ व्व पसत्था-लंबणस्स पडियारमप्पसावज्जं । तवसंजमपडियारं च सेवओ धम्ममणियाणं ।।१२।।

---

## न्यायाचार्यन्यायविशारदमहामहोपाध्यायश्रीयशोविजयगणिविरचित-श्रीअध्यात्मसारप्रकरणे ध्यानस्वरूपनामकः षोडशाऽधिकारः ।

स्थिरमध्यवसानं यत्, तद् ध्यानं चित्तमस्थिरम् ।
भावना चाऽप्यनुप्रेक्षा, चिन्ता वा तत् त्रिधा मतम् ।।१।।

मुहूर्त्ताऽन्तर्भवेद् ध्यान-मेकार्थे मनसः स्थितिः । बह्वर्थसङ्क्रमे दीर्घा-ऽप्यच्छिन्ना ध्यानसन्ततिः ।।२।।

आर्त्तं रौद्रं च धर्मं च, शुक्लं चेति चतुर्विधम् । तत् स्याद् भेदाविह द्वौ, कारणं भवमोक्षयोः ।।३।।

**[अथ आर्तध्यानम्]**

शब्दादीनामनिष्टानां, वियोगासम्प्रयोगयोः। चिन्तनं वेदनायाश्च, व्याकुलत्वमुपेयुषः ।।४।।

इष्टानां प्रणिधानं च, सम्प्रयोगावियोगयोः। निदानचिन्तनं पाप-मार्त्तमित्थं चतुर्विधम् ।।५।।

---

अस्मिन् परिशिष्टे ध्यानशतकग्रन्थात् चतुर्गाथाधिकस्य पूर्णतया शब्दसाम्यधारकस्य सम्बोधप्रकरणस्य संस्कृतभाषाबद्धस्य च शब्दाऽर्थसाम्यधारकस्याध्यात्मसारप्रकरणस्य ध्यानाधिकारो गृहीतः । सम्पा० ।

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

रागो दोसो मोहो य जेण संसारहेयवो भणिया । अट्टंमि ते तिण्णि वि तो तं संसारतरुबीयं ।।१३।।

कावोयनीलकालालेसाओ णाइसंकिलिट्ठाओ । अट्टज्झाणोवगयस्स कम्मपरिणामजणियाओ ।।१४।।

तस्सऽक्कंदण-सोयण-परिदेवण-ताडणाइं लिंगाइं । इट्ठाऽणिट्ठविओगाऽविओग-वियणानिमित्ताइं ।।१५।।

निंदइ य नियकयाइं पसंसइ सविम्हओ विभूईओ । पत्थेइ तासु रज्जइ तयज्जणपरायणो होइ ।।१६।।

सद्दाइविसयगिद्धो सद्धम्मपरम्मुहो पमायपरो । जिणमयमणवेक्खंतो वट्टइ अट्टंमि झाणंमि ।।१७।।

तदविरय-देसविरया-पमायपरसंजयाणुयं झाणं । सव्वप्पमायमूलं वज्जेयव्वं जइजणेणं ।।१८।।

[अह रुद्दज्झाणं]

सत्तवह-वेह-बंधण-डहणंऽकण-मारणाइपणिहाणं । अइकोहग्गहघत्थं निग्घिणमणसोऽधमविवागं ।।१९।।

पिसुणासब्भासब्भूय-भूयघायाइवयणपणिहाणं । मायाविणोऽइसंधणपरस्स पच्छन्नपावस्स ।।२०।।

तह तिव्वकोह-लोहाउलस्स भूओवघायणमणज्जं । परदव्वहरणचित्तं परलोयावायनिरविक्खं ।।२१।।

सद्दादिविसयसाहणधणसंरक्खणपरायणमणिट्ठं । सव्वाभिसंकणपरोवघायकलुसाउलं चित्तं ।।२२।।

इय करण-कारणाणुमइविसयमणुचिंतणं चउब्भेयं । अविरय-देसासंजयजणमणसंसेवियमहण्णं ।।२३।।

एयं चउव्विहं राग-दोष-मोहांकियस्स जीवस्स । रोद्दज्झाणं संसारवद्धणं नरयगइमूलं ।।२४।।

कावोय-नील-कालालेसाओ तिव्वसंकिलिट्ठाओ । रोद्दज्झाणोवगयस्स कम्मपरिणामजणियाओ ।।२५।।

लिंगाइं तस्स उस्सन्नबहुलनाणाविहामरणदोसा। तेसिं चिय हिंसाइसु बाहिरकरणोवउत्तस्स ।।२६।।

---

कापोतनीलकृष्णानां, लेश्यानामत्र सम्भवः । अनतिक्लिष्टभावानां, कर्मणां परिणामतः ।।६।।

क्रन्दनं रुदनं प्रोच्चैः, शोचनं परिदेवनम्। ताडनं लुञ्चनं चेति, लिङ्गान्यस्य विदुर्बुधाः ।।७।।

मोघं निन्दन् निजं कृत्यं, प्रशंसन् परसम्पदः। विस्मितः प्रार्थयन्नेताः, प्रसक्तश्चैतदर्जने ।।८।।

प्रमत्तश्चेन्द्रियार्थेषु, गृद्धो धर्मपराङ्मुखः । जिनोक्तमपुरस्कुर्व्व-न्नार्त्तध्याने प्रवर्त्तते ।।९।।

प्रमत्ताऽन्तगुणस्थाना-नुगतं तन्महात्मना । सर्वप्रमादमूलत्वात्,त्याज्यं तिर्यग्गतिप्रदम् ।।१०।।

[अथ रौद्रध्यानम्]

निर्दयं वधबन्धादि-चिन्तनं निबिडक्रुधा । पिशुनाऽसभ्यमिथ्यावाक्, प्रणिधानं च मायया ।।११।।

चौर्यधीर्निरपेक्षस्य, तीव्रक्रोधाऽऽकुलस्य च । सर्वाऽभिशङ्काकलुषं, चित्तं च धनरक्षणे ।।१२।।

एतत् सदोषकरण-कारणाऽनुमतिस्थिति । देशविरतिपर्यन्तं, रौद्रध्यानं चतुर्विधम् ।।१३।।

कापोतनीलकृष्णानां, लेश्यानामत्र सम्भवः । अतिसंक्लिष्टरूपाणां, कर्मणां परिणामतः ।।१४।।

उत्सन्नबहुदोषत्वं, नानामरणदोषता । हिंसाऽऽदिषु प्रवृत्तिश्च, कृत्वाऽघं स्मयमानता ।।१५।।

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

परवसणं अभिनंदइ निरविक्खो निद्दओ निरणुतावो। हरिसिज्जइ कयपावो रुद्दझाणोवगयचितो ।।२७।।

**[अह धम्मज्झाणं]**

झाणस्स भावणाओ देसं कालं तहाऽऽसणविसेसं । आलंबणं कमं झाइयव्वयं जे य झायारो ।।२८।।

तत्तोऽणुप्पेहाओ लेस्सा लिंगं फलं च नाऊणं । धम्मं झाइज्ज मुणी तग्गयजोगो तओ सुक्कं ।।२९।।

पुव्वकयब्भासो भावणाहिं झाणस्स जोग्गयमुवेइ ।

ताओ य नाण-दंसण-चरित्त-वेरग्गजणिया [नियता]ओ ।।३०।।

णाणे णिच्चब्भासो कुणइ मणोधारणं विसुद्धिं च । नाणगुणमुणियसारो तो झाइ सुनिच्चलमईओ ।।३१।।

संकाइदोसरहिओ पसम-थेज्जाइगुणगणोवेओ । होइ असंमूढमणो दंसणसुद्धीए झाणंमि ।।३२।।

नवकम्माणायाणं पोराणविणिज्जरं सुभायाणं । चारित्तभावणाए झाणमयत्तेण य समेइ ।।३३।।

सुविदियजगस्सभावो निस्संगो निब्भओ निरासो य । वेरग्गभावियमणो झाणंमि सुनिच्चलो होइ ।।३४।।

निच्चं चिय जुवइ-पसू-नपुंसग-कुसीलवज्जियं जइणो । ठाणं वियणं भणियं विसेसओ झाणकालंमि ।।३५।।

थिर-कयजोगाणं पुण मुणीण झाणे सुनिच्चलमणाणं । गामंमि जणाइण्णे सुण्णे रण्णे व ण विसेसो ।।३६।।

---

निर्दयत्वाऽननुशयौ, बहुमानः परापदि । लिङ्गान्यत्रेत्यदो धीरै-स्त्याज्यं नरकदुःखदम् ।।१६।।

अप्रशस्ते इमे ध्याने, दुरन्ते चिरसंस्तुते । प्रशस्तं तु कृताऽभ्यासः, ध्यानमारोढुमर्हति ।।१७।।

**[अथ धर्मध्यानम्]**

भावना देशकालौ च, स्वासनाऽऽलम्बनक्रमान् । ध्यातव्यध्यात्रनुप्रेक्षा, लेश्या लिङ्गफलानि च ।।१८।।

ज्ञात्वा धर्म्यं ततो ध्याये-च्चतस्रस्तत्र भावनाः। ज्ञानदर्शनचारित्र-वैराग्याऽऽख्याः प्रकीर्तिताः ।।१९।।

निश्चलत्वमसम्मोहो, निर्जरा पूर्वकर्मणाम् । सङ्गाऽऽशंसाभयोच्छेदः, फलान्यासां यथाक्रमम् ।।२०।।

स्थिरचित्तः किलैताभि-र्याति ध्यानस्य योग्यताम् । योग्यतैव हि नाऽन्यस्य, तथा चोक्तं परैरपि ।।२१।।

चञ्चलं हि मनः कृष्ण!, प्रमाथि बलवद् दृढम् । तस्याऽहं निग्रहं मन्ये, वायोरिव सुदुष्करम्।।२२।।

असंशयं महाबाहो!, मनो दुर्निग्रहं चलम् । अभ्यासेन तु कौन्तेय!, वैराग्येण च गृह्यते ।।२३।।

असंयताऽऽत्मना योगो, दुष्प्राप इति मे मतिः। वश्याऽऽत्मना तु यतता, शक्योऽवाप्तुमुपायतः ।।२४।।

सदृशप्रत्ययाऽऽवृत्त्या, वैतृष्ण्याद् बहिरर्थतः । एतच्च युज्यते सर्वं, भावनाभाविताऽऽत्मनि ।।२५।।

स्त्रीपशुक्लीबदुःशील-वर्जितं स्थानमागमे । सदा यतीनामाज्ञप्तं ध्यानकाले विशेषतः ।।२६।।

स्थिरयोगस्य तु ग्रामे-ऽविशेषः कानने वने । तेन यत्र समाधानं, स देशो ध्यायतो मतः ।।२७।।

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

तो जत्थ समाहाणं होज्ज मणोवायकायजोगाणं । भूओवरोहरहिओ सो देसो झायमाणस्स ।।३७।।

कालोऽवि सोच्चिय जहिं जोगसमाहाणमुत्तमं लहइ । न उ दिवस-निसा-वेलाइनियमणं झाइणो भणियं ।।३८।।

जच्चिय देहावत्था जिया ण झाणोवरोहिणी होइ । झाइज्जा तदवत्थो ठिओ निसण्णो निवण्णो वा ।।३९।।

सव्वासु वट्टमाणा मुणओ जं देस-काल-चेट्ठासु । वरकेवलाइलाभं पत्ता बहुसो समियपावा ।।४०।।

तो देस-काल-चेट्ठानियमो झाणस्स नत्थि समयंमि । जोगाण समाहाणं जह होइ तहा पयइयव्वं ।।४१।।

आलंबणाइ वायण-पुच्छण-परियट्टणाऽणुचिंताओ । सामाइयाइयाइं सद्धम्मावस्सयाइं च ।।४२।।

विसमंमि समारोहइ दढदव्वालंबणो जहा पुरिसो । सुत्ताइकयालंबो तह झाणवरं समारुहइ ।।४३।।

झाणप्पडिवत्तिकमो होइ मणोजोगनिग्गहाईओ । भवकाले केवलिणो सेसस्स जहासमाहीए ।।४४।।

***आणाविजयमवाए विवागसंठाणओ वि नायव्वा ।**
**एए चत्तारि पया झायव्वा धम्मझाणस्स ।।४५।।**

सुनिउणमणाइणिहणं भूयहियं भूयभावणमणग्घं । अमियमजियं महत्थं महाणुभावं महाविसयं ।।४६।।

झाइज्जा निरवज्जं जिणाण आणं जगप्पईवाणं । अणिउणजणदुण्णेयं नय-भंग-पमाण-गमगहणं ।।४७।।

तत्थ य मइदोब्बलेणं तव्विहायरियविरहओ वावि । णेयगहणत्तणेण य णाणावरणोदएणं च ।।४८।।

हेऊदाहरणासंभवे य सइ सुट्ठु जं न बुज्झेज्जा । सव्वण्णुमयमवितहं तहावि तं चिंतए मइमं ।।४९।।

अणुवकयपराणुग्गहपरायणा जं जिणा जगप्पवरा । जियराग-दोस-मोहा य णण्णहावादिणो तेणं ।।५०।।

***सव्वनईणं जा हुज्ज वालुया सव्वोदहीण जं उदयं ।**
**इत्तो वि अणंतगुणो अत्थो इक्कस्स सुत्तस्स ।।५१।।**

---

यत्र योगसमाधानं, कालोऽपीष्टः स एव हि । दिनरात्रिक्षणादीनां, ध्यानिनो नियमस्तु न ।। २८।।

यैवाऽवस्था जिता जातु, न स्याद् ध्यानोपघातिनी । तया ध्यायेन्निषण्णो वा, स्थितो वा शयितोऽथवा ।।२९।।

सर्वासु मुनयो देश-कालावस्थासु केवलम् । प्राप्तस्तन्नियमो नाऽऽसां, नियता योगसुस्थता ।।३०।।

वाचना चैव पृच्छा च, परावृत्त्यनुचिन्तने । क्रिया चाऽऽलम्बनानीह, सद्धर्माऽऽवश्यकानि च ।।३१।।

आरोहति दृढद्रव्या-लम्बनो विषमं पदम् । तथाऽऽरोहति सद्ध्यानं, सूत्राद्याऽऽलम्बनाऽऽश्रितः ।।३२।।

आलम्बनादरोद्भूत-प्रत्यूहक्षययोगतः । ध्यानाद्यारोहणभ्रंशो, योगिनां नोपजायते ।।३३।।

मनोरोधाऽदिको ध्यान-प्रतिपत्तिक्रमो जिने । शेषेषु तु यथायोगं, समादानं प्रकीर्तितम् ।।३४।।

आज्ञाऽपायविपाकानां, संस्थानस्य च चिन्तनात् । धर्मध्यानोपयुक्तानां, ध्यातव्यं स्याच्चतुर्विधम् ।।३५।।

नयभङ्गप्रमाणाऽऽढ्यां, हेतूदाहरणाऽन्विताम् । आज्ञां ध्यायेज्जिनेन्द्राणा-मप्रामाण्याऽकलङ्किताम् ।।३६।।

---

* इयं गाथा ध्यानशतकगाथाया अधिका वर्तते ।

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

***जिणवयणमोअगस्स उ रत्तिं च दिया य खज्जमाणस्स ।**
**तत्तिं बुहा न वच्चइ हेउसहस्सोवगूढस्स ।।५२।।**

***नरनिरयतिरियसुरगणसंसारियसव्वदुक्खरोगाणं ।**
**जिणवयणमेगमोसहमपवग्गसुहक्खयफलयं ।।५३।।**

रागद्दोसकसायासवाइकिरियासु वट्टमाणाणं । इह परलोगाओ झाइज्जा वज्जपरिवज्जी ।।५४।।

पयइठिइपएसाणु-भावभिन्नं सुहासुहविहत्तं । जोगाणुभावजणियं कम्मविवागं विचिंतिज्जा ।।५५।।

जिणदेसियाइ लक्खण-संठाणासण विहाणमाणाइं । उप्पायट्ठिइभंगाइपज्जवा जे अ दव्वाणं ।।५६।।

पंचत्थिकायमइयं लोगमणाइनिहणं जिणक्खायं । णामाइभेयविहियं तिविहमहोलोगभेयाइं ।।५७।।

खिइ-वलय-दीव-सागर-नरय-विमाण-भवणाइसंठाणं । वोमाइपइट्ठाणं निययं लोगट्ठिइविहाणं ।।५८।।

उवओगलक्खणमणाइनिहणमत्थंतरं सरीराओ । जीवमरूविं कारिं भोइं च सयस्स कम्मस्स ।।५९।।

तस्स य सकम्मजणियं जम्माइजलं कसायपायालं । वसणसयसावयमणं मोहावत्तं महाभीमं ।।६०।।

अण्णाण-मारुएरियसंजोग-विजोगवीइसंताणं । संसारसागरमणोरपारमसुहं विचिंतेज्जा ।।६१।।

तस्स य संतरणसहं सम्मद्दंसणसुबंधणमणहं । णाणमयकण्णधारं चारित्तमयं महापोयं ।।६२।।

संवरकयनिच्छिद्दं तवपवणाइद्धजवणतरवेगं । वेरग्गमग्गपडियं विसोत्तियावीइनिक्खोभं ।।६३।।

---

रागद्वेषकषायादि-पीडितानां जनुष्मताम् । ऐहिकामुष्मिकाँस्ताँस्तान्, नानाऽपायान् विचिन्तयेत् ।।३७।।

ध्यायेत्कर्मविपाकं च, तं तं योगाऽनुभावजम्। प्रकृत्यादिचतुर्भेदं, शुभाऽशुभविभागतः ।।३८।।

उत्पादस्थितिभङ्गादि-पर्यायैर्लक्षणैः पृथक् । भेदैर्नामादिभिर्लोक-संस्थानं चिन्तयेद्भृतम् ।।३९।।

चिन्तयेत्तत्र कर्त्तारं, भोक्तारं निजकर्मणाम् । अरूपमव्ययं जीव-मुपयोगस्वलक्षणम् ।।४०।।

तत्कर्मजनितं जन्म-जरामरणवारिणा । पूर्णं मोहमहावर्त्त-कामौर्वानलभीषणम् ।।४१।।

आशामहाऽनिलापूर्ण-कषायकलशोच्छलत् । असद्विकल्पकल्लोल-चक्रं दधतमुद्धतम् ।।४२।।

हृदि स्रोतसिकावेला-सम्पातदुरतिक्रमम् । प्रार्थनावीचिसंतानं, दुष्पूरविषयोदरम् ।।४३।।

अज्ञानदुर्दिनं व्यापद्-विद्युत्पातोद्भवद्भयम् । कदाग्रहकुवातेन, हृदयोत्कम्पकारिणम् ।।४४।।

विविधव्याधिसम्बन्ध-मत्स्यकच्छपसङ्कुलम् । चिन्तयेच्च भवाऽम्भोधिं, चलद्दोषाऽद्रिदुर्गमम् ।।४५।।

।। पञ्चभिः कुलकम् ।।

तस्य सन्तरणोपायं, सम्यक्त्वदृढबन्धनम् । बहुशीलाऽङ्गफलकं, ज्ञाननिर्यामकाऽन्वितम् ।।४६।।

संवरास्ताश्रवच्छिद्रं, गुप्तिगुप्तं समन्ततः । आचारमण्डपोद्दीप्ता-पवादोत्सर्गभूद्वयम् ।।४७।।

---

* इयं गाथा ध्यानशतकगाथाया अधिका वर्तते ।

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

आरोढुं मुणि-वणिया महग्घसीलंग-रयणपडिपुन्नं । जह तं निव्वाणपुरं सिग्घमविग्घेण पाविंति ।।६४।।

तत्थ य तिरयणविणिओगमइयमेगंतियं निराबाहं । साभावियं निरुवमं जह सोक्खं अक्खयमुवेंति ।।६५।।

किं बहुणा ? सव्वं चिय जीवाइपयत्थवित्थरोवेयं । सव्वनयसमूहमयं झाइज्जा समयसब्भावं ।।६६।।

सव्वप्पमायरहिया मुणओ खीणोवसंतमोहा य । झायारो नाणधणा धम्मज्झाणस्स निद्दिट्ठा ।।६७।।

---

असङ्ख्यैर्दुर्धरैर्योधै-र्दुष्प्रधृष्यं सदाशयैः । सद्योगकूपस्तम्भाग्र-न्यस्ताऽध्यात्मसितांशुकम् ।।४८।।

तपोऽनुकूलपवनोद्-भूतसंवेगवेगतः । वैराग्यमार्गपतितं, चारित्रवहनं श्रिताः ।।४९।।

सद्भावनाख्यमञ्जूषा-न्यस्तसच्चित्तरत्नतः। यथाऽविघ्नेन गच्छन्ति, निर्वाणनगरं बुधाः ।।५०।।

।। पञ्चभिः कुलकम् ।।

यथा च मोहपल्लीशे, लब्धव्यतिकरे सति । संसारनाटकोच्छेदा-शङ्कापङ्काऽऽविले मुहुः ।।५१।।

सज्जीकृतस्वीयभटे, नावं दुर्बुद्धिनामिकाम् । श्रिते दुर्नीतिनौवृन्दा-रूढशेषभटाऽन्विते ।।५२।।

आगच्छत्यथ धर्मेश-भटौघे रणमण्डपम् । तत्त्वचिन्ताऽऽदिनाराच-सज्जीभूते समाश्रिते ।।५३।।

मिथो लग्ने रणाऽऽवेशे, सम्यग्दर्शनमन्त्रिणा । मिथ्यात्वमन्त्री विषमां, प्राप्यते चरमां दशाम् ।।५४।।

लीलयैव निरूद्ध्यन्ते, कषायचरटा अपि । प्रशमादिमहायोधैः, शीलेन स्मरतस्करः ।।५५।।

हास्यादिषट्कलुण्टाक-वृन्दं वैराग्यसेनया । निद्रादयश्च ताड्यन्ते, श्रुतोद्योगादिभिर्भटैः ।।५६।।

भटाभ्यां धर्मशुक्लाभ्या-मार्त्तरौद्राऽभिधौ भटौ । निग्रहेणेन्द्रियाणां च, जीयते द्रागसंयमः ।।५७।।

क्षयोपशमतश्चक्षु-र्दर्शनाऽऽवरणादयः । नश्यन्त्यसातसैन्यं च, पुण्योदयपराक्रमात् ।।५८।।

सह द्वेषगजेन्द्रेण, रागकेसरिणा तथा । सुतेन मोहभूपोऽपि, धर्मभूपेन हन्यते ।।५९।।

ततः प्राप्तमहानन्दा, धर्मभूपप्रसादतः । यथा कृतार्था जायन्ते, साधवो व्यवहारिणः ।।६०।।

विचिन्तयेत्तथा सर्वं, धर्मध्याननिविष्टधीः। ईदृगन्यदपि न्यस्त-मर्थजातं यदागमे ।।६१।।

मनसश्चेन्द्रियाणां च, जयाद्यो निर्विकारधीः। धर्मध्यानस्य स ध्याता, शान्तो दान्तः प्रकीर्तितः।।६२।।

परैरपि यदिष्टं च, स्थितप्रज्ञस्य लक्षणम् । घटते ह्यत्र तत्सर्वं, तथा चेदं व्यवस्थितम् ।।६३।।

प्रजहाति यदा कामान्, सर्वान् पार्थ ! मनोगतान् । आत्मन्येवाऽऽत्मना तुष्टः, स्थितप्रज्ञस्तदोच्यते ।।६४।।

दुःखेष्वनुद्विग्नमनाः, सुखेषु विगतस्पृहः । वीतरागभयक्रोधः, स्थितधीर्मुनिरूच्यते ।।६५।।

।। एकादशभिः कुलकम् ।।

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

एतेच्चिय पुव्वाणं पुव्वधरा सुप्पसत्थसंघयणा । दोण्ह सजोगाजोगा सुक्काण पराण केवलिणो ।।६८।।

झाणोवरमेऽवि मुणी णिच्चमणिच्चाइचिंतणापरमो । होइ सुभावियचित्तो धम्मज्झाणेण जो पुव्विं ।।६९।।

होंति कमविसुद्धाओ लेसाओ पीय-पम्म-सुक्काओ । धम्मज्झाणोवगयस्स तिव्व-मंदाइभेयाओ ।।७०।।

आगम-उवएसाऽऽणा-णिसग्गओ जं जिणप्पणीयाणं । भावाणं सद्दहणं धम्मज्झाणस्स तं लिंगं ।।७१।।

जिणसाहुगुणुक्कित्तण-पसंसणा-विणय-दाणसंपण्णो । सुअ-सील-संजमरओ धम्मज्झाणी मुणेयव्वो ।।७२।।

## [अह सुक्कज्झाणं]

अह खंति-मद्दव-ऽज्जव-मुत्तीओ जिणमयप्पहाणाओ । आलंबणाई जेहिं सुक्कज्झाणं समारुहइ ।।७३।।

तिहुयणविसयं कमसो संखिविउ मणो अणुंमि छउमत्थो । झायइ सुनिप्पकंपो झाणं अमणो जिणो होई ।।७४।।

जह सव्वसरीरगयं मंतेण विसं निरुंभए डंके ।। तत्तो पुणोऽवणिज्जइ पहाणयरमंतजोएणं ।।७५।।

तह तिहुयणतणुविसयं मणोविसं मंतजोगबलजुत्तो । परमाणुंमि निरुंभइ अवणेइ तओवि जिणवेज्जो ।।७६।।

ओसारियेंधणभरो जह परिहाइ कमसो हुयासो वा । थोविंधणावसेसो निव्वाइ तओऽवणीओ य ।।७७।।

तह विसइंधणहीणो मणोहुयासो कमेण तणुयंमि । विसइंधणे निरुंभइ निव्वाइ तओऽवणीओ य ।।७८।।

तोयमिव नालियाए तत्तायसभायणोदरत्थं वा । परिहाइ कमेण जहा तह जोगिमणोजलं जाण ।।७९।।

एवं चिय वयजोगं निरुंभई कमेण कायजोगंपि । तो सेलेसोव्व थिरो सेलेसी केवली होइ ।।८०।।

---

यः सर्वत्राऽनभिस्नेह-स्तत्तत् प्राप्य शुभाऽशुभम् ।
नाऽभिनन्दति न द्वेष्टि, तस्य प्रज्ञा प्रतिष्ठिता ।।६६।।

यदा संहरते चाऽयं, कूर्मोऽङ्गानीव सर्वशः । इन्द्रियाणीन्द्रियार्थेभ्य-स्तस्य प्रज्ञा प्रतिष्ठिता ।।६७।।

शान्तो दान्तो भवेदीदृ-गाऽऽत्मारामतया स्थितः । सिद्धस्य हि स्वभावो यः, सैव साधकयोग्यता ।।६८।।

ध्याताऽयमेव शुक्लस्या-प्रमत्तः पादयोर्द्वयोः। पूर्वविद् योग्ययोगी च, केवली परयोस्तयोः।।६९।।

अनित्यत्वाद्यनुप्रेक्षा, ध्यानस्योपरमेऽपि हि। भावयेन्नित्यमभ्रान्तः, प्राणा ध्यानस्य ताः खलु ।।७०।।

तीव्रादिभेदभाजः स्यु-र्लेश्यास्तिस्त्र इहोत्तराः। लिङ्गान्यत्राऽऽगमश्रद्धा, विनयः सद्गुणस्तुतिः।।७१।।

शीलसंयमयुक्तस्य, ध्यायतो धर्म्यमुत्तमम्। स्वर्गप्राप्तिं फलं प्राहुः, प्रौढपुण्यानुबन्धिनीम् ।।७२।।

## [अथ शुक्लध्यानम्]

ध्यायेच्छुक्लमथ क्षान्ति-मृदुत्वार्जवमुक्तिभिः । छद्मस्थोऽणौ मनो धृत्वा, व्यपनीय मनो जिनः।।७३।।

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

उप्पाय-ट्ठिइ-भंगाइपज्जयाणं जमेगदव्वंमि । नाणानयाणुसरणं पुव्वगयसुयाणुसारेणं ।।८१।।
सवियारमत्थ-वंजण-जोगंतरओ तयं पढमसुक्कं । होइ पुहुत्तवितक्कं सवियारमरागभावस्स ।।८२।।
जं पुण सुणिप्पकंपं निवायसरणप्पईवमिव चित्तं । उप्पाय-ट्ठिइ-भंगाइयाणमेगम्मि पज्जाए ।।८३।।
अवियारमत्थ-वंजण-जोगंतरओ तयं बिइयसुक्कं । पुव्वगयसुयालंबणमेगत्तवितक्कमवियारं ।।८४।।
निव्वाणगमणकाले केवलिणो दरनिरुद्धजोगस्स । सुहुमकिरियाऽनियट्टिं तइयं तणुकायकिरियस्स ।।८५।।
तस्सेव य सेलेसीगयस्स सेलोव्व णिप्पकंपस्स । वोच्छिन्नकिरियमप्पडिवाइ ज्झाणं परमसुक्कं ।।८६।।
पढमं जोगे जोगेसु वा मयं बितियमेगजोगंमि । तइयं च कायजोगे सुक्कमजोगंमि य चउत्थं ।।८७।।
जह छउमत्थस्स मणो झाणं भण्णइ सुनिच्चलो संतो । तह केवलिणो काओ सुनिच्चलो भन्नए झाणं ।।८८।।
पुव्वप्पओगओ चिय कम्मविणिज्जरणहेउतो यावि । सद्दत्थबहुत्ताओ तह जिणचंदागमाओ य ।।८९।।
चित्ताभावेवि सया सुहुमोवरयकिरियाइ भण्णंति । जीवोवओगसब्भावओ भवत्थस्स झाणाइं ।।९०।।
सुक्कज्झाणसुभावियचित्तो चिंतेइ झाणविरमेऽवि । णिययमणुप्पेहाओ चत्तारि चरित्तसंपन्नो ।।९१।।
आसवदारावाए तह संसारासुहाणुभावं च । भवसंताणमणन्तं वत्थूणं विपरिणामं च ।।९२।।
सुक्काए लेसाए दो ततियं परमसुक्कलेस्साए । थिरयाजियसेलेसं लेसाईयं परमसुक्कं ।।९३।।
अवहा-ऽसंमोह-विवेग-विउसग्गा तस्स होंति लिंगाइं । लिंगिज्जइ जेहिं मुणी सुक्कज्झाणोवगयचित्तो ।।९४।।

---

सवितर्कं सविचारं, सपृथक्त्वं तदाऽऽदिमम् । नानानयाऽऽश्रितं तत्र, वितर्कः पूर्वगं श्रुतम् ।।७४।।
अर्थव्यञ्जनयोगानां, विचारोऽन्योऽन्यसङ्क्रमः । पृथक्त्वं द्रव्यपर्याय-गुणाऽन्तरगतिः पुनः ।।७५।।
त्रियोगयोगिनः साधो-वितर्काद्यन्वितं ह्यदः । ईषच्चलत्तरङ्गाऽब्धेः, क्षोभाऽभावदशानिभम् ।।७६।।
।। त्रिभिः कुलकम् ।।

एकत्वेन वितर्केण, विचारेण च संयुतम् । निर्वातस्थप्रदीपाऽऽभं, द्वितीयं त्वेकपर्ययम् ।।७७।।
सूक्ष्मक्रियाऽनिवृत्त्याख्यं, तृतीयं तु जिनस्य तत् । अर्द्धरुद्धाऽङ्गयोगस्य, रुद्धयोगद्वयस्य च ।।७८।।
तुरीयं तु समुच्छिन्न-क्रियमप्रतिपाति तत् । शैलवन्निष्प्रकम्पस्य, शैलेश्यां विश्ववेदिनः ।।७९।।
एतच्चतुर्विधं शुक्ल-ध्यानमत्र द्वयोः फलम् । आद्ययोः सुरलोकाप्ति-रन्त्ययोस्तु महोदयः ।।८०।।
आश्रवाऽपायसंसारा-नुभावभवसन्ततीः । अर्थे विपरिणामं वाऽ-नुपश्येच्छुक्लविश्रमे ।।८१।।
द्वयोः शुक्ला तृतीये च, लेश्या सा परमा मता । चतुर्थशुक्लभेदस्तु, लेश्याऽतीतः प्रकीर्तितः ।।८२।।
लिङ्गं निर्मलयोगस्य, शुक्लध्यानवतोऽवधः । असम्मोहो विवेकश्च, व्युत्सर्गश्चाऽभिधीयते ।।८३।।

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

चालिज्जइ बीहेइ व धीरो न परीसहोवसग्गेहिं । सुहुमेसु न संमुज्झइ भावेसु न देवमायासु ।।९५।।

देहविवित्तं पेच्छइ अप्पाणं तह य सव्वसंजोगे । देहोवहिवोसग्गं निस्संगो सव्वहा कुणइ ।।९६।।

होंति सुहासव-संवर-विणिज्जराऽमरसुहाइं विउलाइं । झाणवरस्स फलाइं सुहाणुबंधीणि धम्मस्स ।।९७।।

ते य विसेसेण सुभासवादओऽणुत्तरामरसुहं च । दोण्हं सुक्काण फलं परिनिव्वाणं परिल्लाणं ।।९८।।

आसवदारा संसारहेयवो जं ण धम्म-सुक्केसु । संसारकारणाइं न तो धुवं धम्म-सुक्काइं ।।९९।।

संवर-विणिज्जराओ मोक्खस्स पहो तवो पहो तासिं । झाणं च पहाणंगं तवस्स तो मोक्खहेऊ तं ।।१००।।

अंबर-लोह-महीणं कमसो जह मल-कलंक-पंकाणं । सोज्झा-वणयण-सोसे साहेंति जलाऽणलाऽऽइच्चा ।।१०१।।

तह सोज्झाइसमत्था जीवंबर-लोह-मेइणिगयाणं । झाणजला-ऽणल-सूरा कम्ममल-कलंक-पंकाणं ।।१०२।।

तावो सोसो भेओ जोगाणं झाणओ जहा निययं । तह ताव-सोस-भेया कम्मस्स वि झाइणो नियमा ।।१०३।।

जह रोगासयसमणं विसोसण-विरेयणोसहविहीहिं । तह कम्मामयसमणं झाणाणसणाइजोगेहिं ।।१०४।।

जह चिरसंचियमिंधणमनलो पवणसहिओ दुयं दहइ । तह कम्मिंधणममियं खणेण झाणाणलो डहइ ।।१०५।।

जह वा घणसंघाया खणेण पवणाहया विलिज्जंति । झाणपवणावहूया तह कम्मघणा विलिज्जंति ।।१०६।।

ण कसायसमुत्थेहि य बाहिज्जइ माणसेहिं दुक्खेहिं । ईसा-विसाय-सोगाइएहिं झाणोवगयचित्तो ।।१०७।।

सीयाऽऽयवाइएहि य सारीरेहिं सुबहुप्पगारेहिं । झाणसुनिच्चलचित्तो न वहिज्जइ निज्जरापेही ।।१०८।।

इय सव्वगुणाहाणं दिट्ठादिट्ठसुहसाहणं झाणं । सुपसत्थं सद्धेयं नेयं झेयं च निच्चंपि ।।१०९।।

**इति ध्यानाधिकारः ।**

---

अवधादुपसर्गेभ्यः, कम्पते न बिभेति च । असम्मोहान्न सूक्ष्मार्थे, मायास्वपि न मुह्यति ।।८४।।

विवेकात् सर्वसंयोगा-द्भिन्नमात्मानमीक्षते । देहोपकरणाऽसङ्गो, व्युत्सर्गाज्जायते मुनिः ।।८५।।

एतद्ध्यानफलं शुद्धम्, मत्वा भगवदाज्ञया । यः कुर्यादेतदभ्यासम्, सम्पूर्णाऽध्यात्मविद्भवेत् ।।८६।।

**इति ध्यानस्वरूपनामकः षोडशोऽधिकारः ।**

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

# परिशिष्टम्-८

## पूज्यपादश्रीमदाचार्यइन्द्रनन्दीसूरिशिष्यमुनिसिद्धान्तसारसङ्कलित-
## दर्शनरत्नरत्नाकरे तृतीयलहर्यां चतुर्थतरङ्गे*

### ध्यानस्वरूपम् ।

तथा ध्यानचतुष्कमध्यात्तिर्यग्निरयगतिनिदानभूते आर्त्तरौद्रध्याने न विधेये, स्वर्गापवर्गहेतुभूते धर्मशुक्लध्याने वाऽहर्निशं ध्येये । यतः शुभाशुभकर्मबन्धनिबन्धनभूतं ध्यानमेव। तत्र प्रथमे दुष्कर्मबन्धस्य हेतुभूते, अपरे तु शुभकर्मबन्धस्य । [ध्या. श. ५.]

अथ **ध्यानस्वरूपमु**च्यते । यत् स्थिरमध्यवसानं तद्ध्यानम् । यत्तु चलं तच्चित्तम् । तत्तु भावनारूपमनुप्रेक्षारूपं चिन्तारूपं वा भवेत् । तत्र भावना ध्यानाभ्यासक्रिया । अनुप्रेक्षा त्वनु पश्चाद् भावे प्रेक्षणं प्रेक्षा, सा च स्मृतिर्ध्यानाद् भ्रष्टस्य चित्तचेष्टेत्यर्थः। एतदुक्तप्रकारद्वयरहिता चित्रा मनश्चेष्टा या सा चिन्ता । [ध्या. श. २]

इति ध्यानलक्षणं प्रतिपाद्य तत् **कालस्वामिस्वरूपमु**च्यते । तथाहि - छद्मस्थानामेकस्मिन् वस्तुनि चित्तावस्थानलक्षणं ध्यानमन्तर्मुहूर्त्तं यावद् भवति, ततः परं चिन्ता ध्यानान्तरं वा भवेत् । बहुवस्तुसंक्रमे तु ध्यानसन्तानः प्रभूतसमयमपि सम्भवेत् । अयं भावः - बहूनि वस्तून्यात्मगतानि-मनःप्रभृतीनि परगतानि-द्रव्यादीनि तेषु संक्रमेण चिरेणापि ध्यानप्रवाहः स्यादिति । योगनिरोध एव केवलिनां ध्यानं न तु चित्तावस्थानम्, तद्व्यापारस्याभावात् । [ध्या. श. ३, ४]

### [अथ आर्त्तध्यानम्]

इत्थं सामान्येन ध्यानलक्षणमभिधाय **तद्विशेषस्वरूपं प्र**तिपाद्यते । तथाहि - तत्रार्त्तध्यानं चतुर्विधम्। तत्र **प्रथमभेदो** विभाव्यते। तथाहि - अमनोज्ञा ये इन्द्रियविषयास्तदाधारभूतानि च यानि वस्तूनि रासभादीनि तेषां प्राप्तानां सतामत्यर्थं वियोगचिन्तनं कथं नु ममैभिर्वियोगः स्यादिति वर्तमानकालविषयं द्वेषपोषतो वियोगचिन्तनम् । वियोगे च सति सम्प्रयोगाभावानुस्मरणं कथं ममैभिः समं सदैव सम्प्रयोगो न भवेदित्यनागतकालविषयं द्वेषाद् वियोगचिन्तनम् । तथा पूर्वकाले ममाऽमुकः संयुज्य वियुक्त आदित एव वा न संयुक्तस्तद् वरमभूदिति वियुक्ताऽसंयुक्तविषयाऽतीतानुमोदनया द्वेषविशेषादतीतकालविषयमार्त्तध्यानम्। एवं यद्द्वेषात्त्रिकालविषयमार्त्तध्यानं स प्रथमो भेदः प्रथमध्यानस्य १। [ध्या. श. ६]

अथैतस्य **द्वितीयभेदो** विभाव्यते । तथाहि - शूलशिरोरोगादिवेदनाया अत्यर्थं यद्वियोगविषयदृढाध्यव-सायस्तत्प्रतीकाराकुलितचेतसो वर्त्तमानसमयविषयः। कथंचित्तदभावे सति कथं ममानयायत्यां संयोगो न भवेदिति तदसम्प्रयोगचिन्तनमनागतसमयविषयम् । तथा वरमियान् समयः समतिक्रान्तः पाश्चात्यो यत्रेयमेवंविधा वेदना न

---

* दर्शनरत्नरत्नाकरग्रन्थे ध्यानस्वरूपं दर्शयितुं ध्यानशतकग्रन्थः स्तम्भीकृतः । तदनुसारेणात्र गद्यबद्धसरलसंस्कृतभाषायां ध्याननिरूपणं कृतम् । तज्ज्ञापनार्थं प्रति पदार्थान्ते ध्यानशतकग्रन्थस्य गाथाक्रमोऽपि दर्शितोऽस्माभिः । सम्पा० ।

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

प्रादुरासीदित्यतीतकालविषयरोगादिवेदनाभावानुमोदनविषयमार्त्तध्यानमयमार्त्तध्यानस्य द्वितीयो भेदः २। [ध्या. श.७]

अथैतस्य **तृतीयभेदो** दर्श्यते । तथाहि - इष्टानां शब्दादिविषयानां तदाधारभूतानां च गायन-वनीतादीनामवियोगचिन्तनं रागाकुलितचेतोवृत्तेर्वर्त्तमानकालविषयम् । तथाऽनागतकालविषयमुत्तरकालेऽत्यर्थं तत्संयोगचिन्तनम् । अतीतकालविषयं तु प्राक्प्रवृत्ततत्संयोगानुमोदनतः। अयमार्त्तध्यानस्य तृतीयो भेदः ३। [ध्या. श. ८]

अथैतस्य **तुरीयभेदः** प्रदर्श्यते । तथाहि - देवतासार्वभौमादिपदवीप्रार्थनारूपमत्यन्तमज्ञानानुगतं निदानचिन्तनमार्त्तध्यानस्य तुर्यो भेदः। न ह्यज्ञानिनं विहायान्यः कोऽपि शिवसुखसाधकं तपःकष्टानुष्ठानादि सांसारिकसौख्यकृते विफलीकरोति । [ध्या. श. ९]

एतच्चतुर्विधमप्यार्त्तध्यानं रागद्वेषमोहमलिनीकृतस्य जन्तोः संसृतिवर्द्धनमोघतो विशेषतस्तु तिर्यग्गतिमूलम्। [ध्या. श. १०]

ननु मुनेरपि शूलादिरोगाभिभूतस्यासमाधौ तत्प्रतीकारकरणे च तद्विप्रयोगप्रणिधानापत्तेस्तथा तपःसंयमासेवने च भवसम्भवदुःखवियोगप्रणिधानादार्त्तध्यानं सम्भवेद् ? अत्रोच्यते, रागद्वेषवशवर्त्तिनः स्यादेव न पुनरन्यस्य, तथाहि - स्वकर्मपरिणामजनितमेतच्छूलादीति स्वजीवानुशासनपूर्वं सम्यक् सहमानस्य पुष्टालम्बने चाऽनवद्यमल्पसावद्यं वा तत् प्रतीकारं कुर्वतोऽपि तथा निदानरहिततपःसंयमरूपसांसारिकदुःखप्रतीकारं कुर्वाणस्य, किन्तु प्रत्युतैतद्धर्मध्यानमेवाऽवसेयम् । [ध्या. श. ११, १२]

अथार्त्तध्यानस्य **संसारवृद्धिहेतुता** भाव्यते । तथाहि – रागद्वेषमोहाः संसृतिहेतवः कीर्त्त्यते सूत्रे। ते च त्रयोऽप्यार्त्तध्याने । तेन तत् संसारशिखरिमूलम् । [ध्या. श. १३]

अथार्त्तध्यायिनो **लेश्यास्वरूपं** भाव्यते । कृष्णनीलकापोताख्यास्तिस्रो लेश्याः स्युरार्त्तध्यायिनो रौद्रध्यानापेक्षया नाऽतिसंक्लिष्टपरिणामास्ताश्च कर्मपरिणामजनिता विज्ञेयाः। [ध्या. श. १४]

अथैतद्ध्यायिनो **लिङ्गानि** कीर्त्त्यते। तथाहि - १-आक्रन्दन २-शोचन ३-परिदेवन ४-ताडनस्वरूपाणि चत्वारि लिङ्गानि भवेयुरिष्टवियोगाऽनिष्टसंयोगवेदनाजनितानि । तत्राऽऽक्रन्दनं - महता शब्देन रोदनम्, शोचनं-त्वश्रुपूर्णनयनस्य दीनता, परिदेवनं - तु क्लिष्टभाषणम्, ताडनम् - उरःशिरःकुट्टनकेशलुञ्चनादि । तथार्त्तध्यायी निजजनितान्यल्पफलानि विफलानि च शिल्पकलावाणिज्यादीनि निन्दति । तथा सकौतुकः प्रशंसति परविभूतीः प्रार्थयते च तदर्जनपरायणश्च स्यात्। प्राप्तासु च तासु तद्रक्षणप्रवणश्च भवेत् तथा शब्दादिपञ्चविषयगृद्धः सद्धर्मपराङ्मुखः प्रमादपरः श्रीमदागमानपेक्षी च भवेत् । [ध्या. श. १५, १६, १७]

अथैतद् **यत्र स्यान्न स्याच्च तद्व्यक्ति**र्दर्श्यते । तथाहि - अविरतेषु सम्यग्दृष्टिमिथ्यादृष्टिरूपेषु तथा देशविरतेषु प्रमत्तसंयतेषु च संभवेन्न पुनरप्रमत्तसंयतेषु । तस्मात् सकलप्रमादमूलमेतदार्त्तध्यानं वर्जनीयमेव यतिभिर्यत्युपासकैश्च । इत्युक्तं किञ्चिदार्त्तध्यानस्वरूपम् ।।१।। [ध्या. श. १८]

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

## [अथ रौद्रध्यानम्]

अथ **रौद्रध्यानस्वरूपं किञ्चिदुच्यते** । तथाहि - हिंसानुबन्ध्यादिभेदेन चतुर्विधं रौद्रध्यानम् । तत्र **प्रथमं** क्रोधादिग्रहग्रासतया जन्तूनां करकशलतादिभिर्वधविषये, तथा मारादिभिर्वेधविषये, तथा रज्जुभिर्बन्धविषये, तथोल्मुकादिभिर्दहनविषये, तथाऽङ्कने मारणे च यद्दृढाध्यवसायविधानं वधबन्धाद्यकुर्वतोऽपि स रौद्रध्यानस्य प्रथमो भेदः १। [ध्या. श. १९]

अथैतस्य **द्वितीयभेदो** दर्श्यते । तथाहि – मायाविनो वाणिजादेस्तथा परबन्धनप्रवृत्तस्य तथा प्रच्छन्नपापस्य पिशुनासभ्यासद्भूतभूतघातादिवचनेषु प्रवृत्तिमकुर्व्वतोऽपि यत्तद्विषये दृढाध्यवसानं स रौद्रध्यानस्य द्वितीयो भेदः । तत्र पिशुनमनिष्टसूचकवचनम् असभ्यं जकारादि। असद्भूतं तु त्रिधाऽभूतोद्भावनं १ भूतनिह्नवो२ऽर्थान्तराभिधान-३ मिति । तत्र प्रथमं सर्वगत आत्मेत्यादि । द्वितीयं तु नास्त्येवात्मेत्यादि। तृतीयं गां तुरगमित्यादि वदतः। भूतघातादिवचनं तु छिन्धि भिन्धि व्यापादयेत्यादिकम् । [ध्या. श. २०]

अथैतस्य **तृतीयभेदो** विभाव्यते । तथाहि - तीव्रक्रोधलोभाकुलस्य जन्तोः परलोकापायनिरपेक्षो भूतोपघातपरद्रव्यापहारविषये यश्चित्ताध्यवसायः स रौद्रध्यानस्य तृतीयो भेदः ३ । [ध्या. श. २१]

अथैतस्य **तुरीयभेदो** भाव्यते । तथाहि - शब्दादिपञ्चविषयसाधनधनसंरक्षणपरायणस्तथा सतामनिष्टस्तथा सर्वेषामभिशङ्कनेन न विद्मः कः किं करिष्यतीत्यादिलक्षणेन सर्वोपघातचिन्तनपरं कषायकलुषमेवंविधं यच्चित्तं स रौद्रध्यानस्य तुरीयो भेदः ४ । [ध्या. श. २२]

एतच्च चतुर्विधमपि रौद्रध्यानं करणकारणानुमतिविषयं वर्जनीयमेव। एतच्च वेद(४)मितभेदमपि रौद्रध्यानं सम्यग्दृष्टि-मिथ्यादृष्टिरूपेष्वविरतेषु देशविरतेषु च सम्भवति, न तु संयतेषु प्रमत्ताप्रमत्तगुणस्थानसंस्थितेषु । [ध्या. श. २३]

ननु प्रसन्नचन्द्रराजर्षिस्तदा तत् कथमभूद्? उच्यते - यदाऽनेन महात्मना रौद्रध्यानाधिरूढेन मनसैव सम्परायं कुर्वता सप्तमनिरययोग्यं दुष्कर्म समुपार्जितं तदैतस्मिन् द्रव्यतो यतित्वमभून्न तु भावतः । यतो भावयतिः प्रमत्तगुणस्थानस्थितोऽपि देवायुरेव बध्नाति न त्वन्यदायुस्त्रितयम्।

एतच्चतुर्विधमपि रौद्रध्यानं रागद्वेषमोहमोहितमांतरौघतः संसारपरिवर्द्धनं विशेषतस्तु निरयगतिमूलम् । [ध्या. श. २४]

**लेश्यास्तु** रौद्रध्यानध्यायिनः कर्मपरिणामजनिता अतिसंक्लिष्टा आद्या एव तिस्रो न त्वग्रेतनाः। [ध्या. श. २५]

**लिङ्गानि** त्वेतद्ध्यानध्यायिन उत्सन्नदोषबहुलदोषनानाविधदोषामरणदोषरूपाणि चत्वारि भवन्ति। तत्र १-हिंसानुबन्धिप्रभृतिरौद्रध्यानानामन्यतरस्मिन् प्रवर्तमान उत्सन्नमनुपरतं बाहुल्येन प्रवर्त्तत इत्युत्सन्नदोषः । २-सर्वेष्वपि चैवं प्रवर्त्तत इति बहुलदोषः । ३- नानाविधेषु त्वक्तक्षणनयनोत्खननादिषु हिंसाद्युपायेष्वसकृदप्येवं प्रवर्त्तत इति नानाविधदोषः । ४- आत्मनाऽमहदापद्गतोऽपि महदापद्गतोऽपि वाऽन्यस्मिन्नामरणादसञ्जातानुताप इत्यामरणदोषः । एतानि लिङ्गानि रौद्रध्यानोपगतस्य भवन्ति। एतद्ध्यानोपगतश्च परव्यसनं बहु मन्यते, निर्दयः,

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

कृतेऽपि पातके निरनुतापः, ऐहिकामुत्रिकापायनिरपेक्षश्च भवेत्, पापं च निर्माय चित्ते प्रमोदं विधत्ते । इत्युक्तं किञ्चिद् रौद्रध्यानम् ।।२।। [ध्या. श. २६, २७]

## [अथ धर्मध्यानम्]

अथ **धर्मध्यान**मुच्यते । तथाहि - भावनादेशकालासनविशेषाऽऽलम्बनक्रमध्यातव्यध्यायकानुप्रेक्षालेश्यालिङ्गफलानि विज्ञाय धर्मध्यानं विधेयम् । [ध्या. श. २८, २९]

तत्र पूर्वं भावनाभिः कृताभ्यासो धर्मध्यानस्य योग्यतामुपैति यतिः। ताश्च चतस्रो ज्ञानदर्शनचारित्रैवराग्यजनिताः। [ध्या. श. ३०]

तत्र श्रुतज्ञाने कृताभ्यासः करोति मनोधारणम्, तथा सूत्रार्थयोः शुद्धिर्भवनिर्वेदं च, तथा ज्ञाते तत्त्वे निश्चलमतिर्ध्यायेत धर्मध्यानम्। इति प्रथमा **ज्ञानभावना** १। [ध्या. श. ३१]

अथ द्वितीया **दर्शनभावना** - शङ्कादिदूषणपञ्चकविकलः प्रशमधैर्यादिगुणगणगरिष्ठस्तत्त्वान्तरेऽसम्भ्रान्तचित्तो दर्शनशुद्धिभावनया भावितो ध्यायेत सुकृतध्यानम् २। [ध्या. श. ३२]

अथ तृतीया **चारित्रभावना** - सर्वसावद्ययोगनिवृत्तिरूपक्रियाभ्यासतः प्राक्तनकर्मनिर्जरणे नवीनपापकर्माऽनादानेन च चारित्रभावनया भावितः प्राप्नोति सुकृतध्यानम् ३। [ध्या. श. ३३]

अथ तुरीया **वैराग्यभावना** - सुविदितजगत्स्वभावः, निस्सङ्गः, निर्भयः, ऐहिकामुत्रिकाशंसाविप्रमुक्तः, तथाविधक्रोधादिकषायविरहितो वैराग्यभावनाभावितो ध्यायेत धर्मध्यानम् ४। [ध्या. श. ३४]

अथ **धर्मध्यानदेशस्वरूपं** किञ्चिद् भाव्यते । तथाहि - नित्यमेव युवतिपशुपण्डकद्यूतकारादिकुशीलवर्जितं विजनं स्थानमुक्तं यतिजनस्य। विशेषस्तु धर्मध्यानसमये तु संहननधृतिभ्यां बलवन्तोऽभ्यस्तभावनादिव्यापारास्तेषां ग्रामे जनाकीर्णे शून्येऽरण्ये वा न विशेषः । ततः कारणाद् यत्र मनोवचनतनूनां समाधानं स्यात्स देशो धर्मध्यानस्य । वचनतनुसमाधानमत्र क्वोपयुज्यते? उच्यते, तत्समाधानं मनोयोगोपकारकमतस्तत्समाधानमपि ध्यानमुच्यते। यदुक्तम्-

"एवंविहा गिरा मे, वत्तव्वा एरिसा न वत्तव्वा,
इअ वेआलिअवक्कस्स भासओ वाइअं झाणं ।। १।।

सुसमाहिअकरपायस्स अकज्जे कारणम्मि जयणाए ।
किरिआकरणं जं तं, काइअझाणं भवे जइणो ।।२।।" [ध्या. श. ३५, ३६, ३७]

**काल**स्तु स एव यत्रोत्तमयोगसमाधानं लभते, न तु दिननिशावेलानियमो धर्मध्यानविषये । [ध्या. श. ३८]

**आसन**मपि तदेव यत्र स्थितस्य धर्मध्यानं वर्द्धमानं भवेत् । तच्चौर्ध्वस्थितस्य-कायोत्सर्गरूपं निषण्णस्य पर्यङ्कासनादिशयितस्य-असण्डायितांह्रिकम्। किं बहुना ? या काचिद्देहचेष्टा धर्मध्यानोपरोधिनी स्यात्तया स्थेयम् । न तु धर्मध्याने देशकालासनानां नियमः, कुतो हेतोः? उच्यते - यतः सर्वेष्वपि देशकालासनविशेषेसु वर्त्तमाना अनन्ताः प्राणिनः प्राप्ता अपुनर्भवं केवलश्रियं समासाद्य । अतो हेतोस्तेषामनियमः। [ध्या. श. ३९, ४०, ४१]

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

**अथालम्बनान्युच्यन्ते** । तथाहि - वाचनाप्रच्छनापरावर्त्तनानुप्रेक्षारूपाणि श्रुतधर्मानुगतान्यालम्बनानि । चारित्रधर्मानुगतानि तु सामायिकप्रत्युपेक्षणाद्यवश्यकरणीयरूपाणि । [ध्या. श. ४२]

यथा गृहीतदृढद्रव्यालम्बनः पुमान् विषमस्थाने समारोहति, एवं कृतवाचनाद्यालम्बनो धर्मध्यानेऽपि । [ध्या. श. ४३]

**ध्यानप्रतिपत्तिक्रमस्तु** यथा मनःस्वस्थता भवेत्तथा मनोवचनतनुनियंत्रणरूपोऽवसेयः ।[ध्या. श. ४४, ]

अथ **ध्याताव्यमुच्यते** तथाहि - आज्ञाऽपायविपाकसंस्थानविचयभेदाद्ध्यातव्यं चतुर्द्धा । तत्र सूक्ष्मद्रव्याद्युपदर्शकत्वात् सुनिपुणाम्, द्रव्यार्थनयादेशादनादिनिधनाम्, 'सव्वे जीवा न हंतव्वे'त्यादिवचनैः सर्वभूतहिताम्, भूतं सत्यं भाव्यतेऽनयेति भूतभावनामनेकान्तपरिच्छेदात्मिकामिति यावत्तथाऽनर्घ्यामपरिमितार्थाम्, शेषकुप्रावचनिकैरजिताम्, पूर्वापराविरोधित्वादनुयोगद्वारात्मकत्वात्तथागर्भत्वाच्च महार्थामचिन्त्यशक्तिसमेतत्वाच्च महानुभावाम्, सर्वद्रव्यादिविषयत्वाच्च महाविषयाम्, निरवद्यामनिपुणजनदुर्ज्ञेयाम्, नयभङ्गप्रमाणगमगहनाम्, श्रीजिनाज्ञां भावयेत् । [ध्या. श. ४५, ४६]

तत्र च मतिदुर्बलतया तद्विधकथकाचार्यवियोगेन धर्मास्तिकायादिज्ञेयगहनतया ज्ञानावरणकर्मोदयेन च कस्मिंश्चित् पदार्थे हेतुदृष्टान्तासम्भवेऽपि सम्यगवबोधश्चेन्न स्यात्तथापि 'श्रीसर्वज्ञमतमवितथमेवे'ति विचिन्तयेत् मतिमान् । यतोऽनुपकृतेऽपि परानुग्रहपरा जगत्प्रवरास्तीर्थकरा निर्जितरागद्वेषमोहा नान्यथावादिनो भवेयुरित्युक्तं **प्रथमं ध्यातव्यम्** १ । [ध्या. श. ४७, ४८, ४९]

अथ **द्वितीय**मुच्यते । तथाहि - रागद्वेषकषायाश्रवादिक्रियासु वर्त्तमानानां प्राणिनामैहिकामुत्रिकापायान् विचिन्तयेदप्रमत्ततया सावद्यपरिवर्जकः। [ध्या. श. ५०]

अथ **तृतीयमु**च्यते तथाहि - मिथ्यात्वाविरतिकषाययोगजनितं शुभमशुभं च प्रकृतिस्थित्यनुभागप्रदेशभेदतश्चतुर्विधं कर्मविपाकं ध्यायेद्धर्मध्यानं ध्याता ३। [ध्या. श. ५१]

अथ **तुरीयमु**च्यते। तथाहि - श्रीजिनप्रज्ञप्तानि धर्मास्तिकायादिद्रव्याणां गमनस्वभावादीनि लक्षणानि, तथालोकक्षेत्रापेक्षया धर्माधर्मयोः संस्थानानि, पुद्गलापेक्षया उपरिमंडलादीनि, जीवशरीरापेक्षया तु समचतुरस्रादीनि, तथा तेषामेव द्रव्याणामाधारभूतानि लोकाकाशादीनि, तथा 'धम्मत्थिकाए धम्मत्थिकायस्स देसे धम्मत्थिकायस्स पदेसे' इत्यादीनि तेषामेवं विधानानि, तथा तेषामेवात्मीयान्यतरीयानि प्रमाणानि, ध्यायेद्धर्मध्यानविधेयात्तथा तेषामेवोत्पत्तिविपत्तिस्थित्यादिपर्यायाश्च, तत्र धर्मास्तिकायो विवक्षितसमयसम्बन्धिरूपापेक्षयोत्पद्यते, तदनन्तरातीतसमयसम्बन्धरूपापेक्षया तु विनश्यति, द्रव्यात्मना तु नित्यः, एवमधर्मास्तिकायादिष्वपि भावना विधेया। [ध्या. श. ५२]

तथा पञ्चास्तिकायमयमनाद्यमनन्तं जिनोदितम् ।

"नामं ठवणा दविए, खित्ते काले भवे अ भावे अ ।
पज्जवलोए अ तहा, अट्ठविहो लोगनिक्खेवो ।।१।।"

इति गाथोक्तनामादिभेदभिन्नं, क्षेत्रलोकापेक्षया त्वधोलोकादिभेदत्रयभिन्नं लोकं चिन्तयेत्।[ध्या. श. ५३,]

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

तथा क्षेत्रलोक एव धर्माद्या ईषत्प्राग्भारान्ता वसु[८]मिता भूमींश्चिन्तयेत्, तथा घनोदधिघनवाततनुवातरूपाणि सप्तपृथिवीपरिक्षेपरूपीणि स्थितान्येकविंशति वलयानि, तथाऽसंख्येयान् द्वीपोदधींस्तथा सीमन्तकादीनप्रतिष्ठानान्तान्निरयावासकाँस्तथाज्योतिष्कवैमानिकसम्बन्धीनि विमानानि, तथा भवनपतिसम्बन्धीनि भवनानि,तथा व्यन्तरनगराणि एतेषां च चिन्तनं संस्थानमानसंख्यादिचिन्तनतोऽवसेयम्, तथाऽऽ-काशादिकप्रतिष्ठितशाश्वतलोकस्थितिस्वरूपं चिन्तयेत् । [ध्या. श. ५४]

तथोपयोगलक्षणमनादिनिधनं शरीरात् पृथग्भूतं शुभाशुभकर्मकर्त्तारम्, तद्भोक्तारममूर्त्तं च जीवं ध्यायेद्धर्मध्यानविधाता । [ध्या. श. ५५]

तस्य च जन्तोः स्वकर्मजनितं जननजरानिधननीरपरिपूर्णम्, कषायपातालकलशसङ्कुलम्, व्यसनशतश्वापदसमाकीर्णम्, मोहमहावर्त्तमज्ञानपवनप्रेरितम्, संयोगवियोगमहोर्मिमालासमाकुलम्, महाभीमकापारावारसंसारपारावारम्, विचिन्तयेत्तस्य च संसारसागरस्य तारणे समर्थं सम्यग्दर्शनं सुबन्धनमनर्घम्, ज्ञानमयनिर्यामकम्, संवरकृतनिश्छिद्रभावम्, तपःपवमानविहितवेगम्, वैराग्यमार्गे समापतितमपध्यानोर्मिमालाऽक्षोभ्यम्, चारित्रमयमहायानं विचिन्तयेत्, यं चानर्घ्यपृथिवीकायारम्भपरित्यागादिशीलाङ्गरत्ननिकरपरिपूर्णां समारुह्य सुश्रमणवणिजो यथा निर्वाणनगरं निरपायं त्वरयैव व्रजन्ति, यथा - तत्र गतानां रत्नत्रयोपार्जितमनन्तमप्रतिममेकान्तभाविसौख्यं भवेत्तथा ध्यायेत् । [ध्या. श. ५६-६१]

किं बहुना ? सर्वमेव जीवादिपदार्थविस्तरोपेतसर्वनयसमूहात्मकसमयसद्भावं ध्यायेद्धर्मध्यानध्याता । [ध्या. श. ६२]

अथ **धर्मध्यानध्यातृस्वरूप**मुच्यते । तथाहि - अप्रमादिन उपशान्तमोहाः क्षीणमोहाश्च धर्मध्यानस्य ध्यातारः। [ध्या. श. ६३]

**अथाऽनुप्रेक्षास्वरूपं** किञ्चित् प्ररूप्यते । तथाहि - यः पूर्वं धर्मध्यानेन भावितचित्तः स्यात् स धर्मध्यानोपरमेऽप्यनित्यताऽशरणतैकतासंसारासारताचिन्तनरूपाश्चतस्रोऽनुप्रेक्षा भावयेत् । [ध्या. श. ६५]

अथ **लेश्या** उच्यन्ते । तथाहि - क्रमतो विशुद्ध-विशुद्धतर-विशुद्धतमाः तेजःपद्मशुक्ललेश्या भवेयुर्धर्मध्यानध्यायिनः । [ध्या. श. ६६]

अथ लिङ्गमुच्यते । तथाहि - आगमोपदेशाज्ञानिसर्गतो यज्जिनप्रणीतभावानां सम्यक्श्रद्धानं त**द्धर्मध्यानस्य लिङ्गम्,** तथा यो जिनमुनिगुणोत्कीर्तनदानविनयसम्पन्नः श्रुतशीलसंयमरतश्च स्यात्सोऽप्येवंविधैर्लिङ्गैर्द्धर्मध्यानवानवसेयः। [ध्या. श. ६७, ६८]

अथ **फलमु**च्यते । तथाहि - धर्मध्यानस्य पुण्याश्रवरूपः शुभाश्रवस्तथाऽशुभकर्मागमनिरोधरूपः संवरस्तथा कर्मक्षयरूपा निर्जरा तथा सुकुलप्रत्यागमनपुनर्बोधिलाभभोगप्रव्रज्याऽपवर्गानुबन्धित्वाच्छुभानुबन्धीनि नरामरसुखानि फलानि भवेयुः। इत्युक्तं द्वादशभिर्द्वारैर्द्धर्मध्यानम् ।।३।। [ध्या. श. ९३]

## [अथ शुक्लध्यानम्]

अथ **शुक्लध्यानस्य स्वरूपं** किञ्चिदुच्यते । तथाहि शुक्लस्यापि भावनादीनि द्वादशद्वाराणि स्युस्तेषु

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

भावनादेशकालासनविशेषेषु न विशेष इत्यालम्बनादीनि द्वारद्वाराण्युच्यन्ते । तथाहि क्षान्तिमार्दवार्जवमुक्तयः श्रीमदर्हत्प्रवचनरहस्यभूता आलम्बनानि भवन्ति शुक्लध्यानस्य। यतस्तदालम्बन एव पुमान् शुक्लध्यानमधिरोहति। [ध्या. श. ६९]

**क्रमस्तु** शुक्लध्यानयोराद्ययोर्द्वयोर्धर्मध्यानवत् । विशेषः पुनरेष त्रिजगद्विषयं मनः क्रमेण संक्षिप्य परमाणुविषये स्थापयित्वा ध्यायति सुनिष्प्रकम्पः संश्छद्मस्थः शुक्लध्यानम् । ततोऽपि प्रयत्नविशेषात् मनोऽपनीयाऽमना जिनः स्याच्चरमयोर्द्वयोर्ध्याता । तत्राप्याद्यस्यान्तर्मुहूर्त्तेन शैलेशीमप्राप्तस्तस्यां च द्वितीयस्य, अत एव शुक्लध्यानाद्यभेदद्वयं ध्यात्वाऽतिक्रान्तस्य पञ्चमावबोधप्राप्तिः केवली च शुक्ललेश्योऽध्यानी च यावत् शैलेश्या अर्वागन्तर्मुहूर्त्तम् । तत्र च सूक्ष्मक्रियानिवृत्तिरूपं तृतीयो ध्यानभेदः। शैलेश्यां च व्युच्छिन्नक्रियानिवृत्तिरूपस्तुर्यो भेदः। [ध्या. श. ७०]

अत्राह विनेयः - कथं छद्मस्थस्त्रैलोक्यचरणशीलं चेतः संक्षिप्य परमाणौ स्थापयति ? कथं वा ततोऽप्यऽपनयति पञ्चमावबोधी ? उच्यते - यथा सर्ववपुर्विषयं विषं मंत्रबलेन निरुध्य मंत्रवादी डङ्क एव स्थापयति, तदनु प्रधानतरमंत्रबलेन च ततोऽप्यपनयति, तथा त्रिभुवनविषयं मनो जिनवचनध्यानबलेन परमाणौ धारयति, तदनु जिनमन्त्रवादी विशिष्टतरध्यानमन्त्रबलेन ततोऽप्यपनयति । [ध्या. श. ७१, ७२]

अत्रैवार्थे **दृष्टान्तान्तरमु**च्यते । तथाहि - यथा अपसारितेन्धनभरः स्तोकेन्धनावशेषे वह्निर्वह्निमात्रमेव स्यात्ततोऽप्यपनीतश्च यथा वा स निर्वाति, तथा मनोहुताशोऽपि । यथा वा नालिकायां तप्तायसभाजनोदरे वा स्थितं तोयं क्रमेण हीयमानं सन्निरवशेषतयाऽपैति तथा मनोजलमपि । एवं यथा विषादिभिर्निदर्शनैर्मनोयोगं निरुणद्धि पञ्चमावबोधी । तथा वाग्योगं तथैव च क्रमात् काययोगं योगत्रयं च रुद्धशैलेशवत् स्थिरः शैलेशी केवली भवति । इत्युक्तः शुक्लध्यानस्य क्रमः। [ध्या. श. ७३-७६]

अथ **ध्यातव्यमु**च्यते । तथाहि - ध्यातव्यं पृथक्त्ववितर्कसवीचारादिभेदेन चतुर्विधम् । तत्र पृथक्त्वेन विस्तीर्णभावेन, वितर्को विचरणम्, यस्मिंस्तत्पृथक्त्ववितर्के, सविचारमर्थव्यञ्जनयोगान्तरसङ्क्रमतः तत्राऽर्थाद्रव्यं व्यञ्जनं च शब्दोपयोगस्तु मनोयोगादिकः। अयं भावः - उत्पत्ति-स्थिति-विपत्त्यादि-पर्यायाणां यदेकस्मिन् द्रव्ये परमाणुजीवादिके द्रव्यार्थिकपर्यायार्थिकादिनानानयैश्चिन्तनं पूर्वगतश्रुतानुसारेण पूर्वविदां मरुदेव्यादीनां त्वन्यथा तत् **प्रथमं ध्यातव्यम्** १। [ध्या. श. ७७, ७८]

अथ **द्वितीयमु**च्यते । तथाहि - द्वितीयमेकत्ववितर्कमविचारम् । तत्रैकत्वेनाऽभेदेन, वितर्को व्यंजनरूपो वा, यत्र तत्तथा, अविचारस्त्वर्थव्यञ्जनयोगान्तरसङ्क्रमाभावतः। अयं भावो - निवातनिकेतनस्थितप्रदीपवदुत्पाद-स्थितिविनाशादिपर्यायाणामेकस्मिन् पर्याये यन्निश्चलं चेतस्तद् द्वितीयम् २। [ध्या. श. ७९, ८०]

**तृतीयं** तु निर्वाणगमनप्रत्यासन्नसमये केवलिनो वाङ्मनोयोगद्वयेन रुद्धे सत्यर्द्धनिरुद्धतनुयोगस्य सूक्ष्मक्रियानिवृत्तिसूक्ष्मक्रियं च तदनिवृत्ति च प्रवर्द्धमानान्तरपरिणामान्न निवर्त्ततीत्यऽनिवृत्ति उच्छ्वासनिश्वासादिस्तोककायक्रियस्य ३। [ध्या. श. ८१]

**तुरीयं** तु शैलेशीगतस्य व्युच्छिन्नक्रियाऽप्रतिपातिनिरुद्धयोगत्रयस्यावसेयम् ४। [ध्या. श. ८२]

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

एतेषु प्रथमं मनोयोगादावेकस्मिन् योगे सर्वेषु वा तत्त्वागमिकश्रुतपाठिनः । द्वितीयं त्वेकस्मिन्नेव योगान्तरसङ्क्रमाभावात् । तृतीयं तु काययोग एव। तुरीयं त्वयोगिनि शैलेशीकेवलिनि । [ध्या. श. ८३]

ननु ध्यै चिन्तायामिति धातुपाठाद्ध्यानं मनःपरिणाम एव, शुक्लध्यानोपरितनभेदद्वयं तु निरुद्धमनोयोगे केवलिनि प्रोक्तम्, कथमेतत् संगतम् ? उच्यते - यथा छद्मस्थस्य मनः सुनिश्चलं सद् ध्यानमुच्यते, तथा योगत्वाव्यभिचारात् केवलिनः काय एव सुनिश्चलः सन् ध्यानता निगद्यते । अत्र हेतवो दृश्यन्ते। तथाहि- १-पूर्वप्रयोगात् २-कर्मनिर्जराहेतुत्वात् ३-च्छब्दार्थबहुत्वात् ४- श्रीजिनागमप्रामाण्याच्च । यथा पूर्वप्रयोगात् कुलालचक्रं भ्रमणकारणदण्डादिक्रियाभावेऽपि भ्रमति तथा केवलिनो मनःप्रभृतियोगनिरोधेऽपि जीवोपयोगसद्भावतो भावचित्तस्य सद्भावाद् भवस्थस्य ध्याने । एवं शेषहेतवोऽपि योजनीयाः। विशेषस्तूच्यते - यथा क्षपकश्रेण्या कर्मनिर्जरा तथाऽत्रापि भवोपग्राहिकर्मनिर्जरेति भावः। शब्दार्थबहुत्वादिति यथा एकस्यैव हरिशब्दस्यादित्यदेवपतिप्रभृतयोऽनेकेऽर्था एवं ध्यानशब्दस्यापि 'ध्यै चिन्तायां,' 'ध्यै काययोगनिरोधे,' 'ध्यै अयोगित्वे' इत्यादि । यतो जिनागमस्य प्रमाणमत एव जिनागमोक्तत्वान्मनोयोगनिरोधेऽपि भवस्थस्य केवलिनः शुक्लध्याने। उक्तं ध्यातव्यम् । [ध्या. श. ८४, ८६]

अथ **ध्यातृस्वरूप**मुच्यते । तथाहि प्रथमसंहननसंयुताः सर्वप्रमादविरहिता यतयः क्षीणोपशान्तमोहाश्चतुर्दशपूर्वविदश्च तदुपयुक्ताः। आद्ययोः पृथक्त्ववितर्कसविचारैकत्ववितर्काविचारयोः शुक्लध्यानयोर्ध्यातारः। द्वयोश्चांतिमयोः क्रमतः सयोग्ययोगिकेवलिनः । [ध्या. श. ६३, ६४]

उक्ता ध्यातारो**ऽथानुप्रेक्षाः** प्रदर्श्यन्ते । तथाहि - शुक्लध्यानभावितचित्तश्चरितगुणगरिष्ठो यतिर्मिथ्यात्वाविरत्याद्याश्रवद्वारविहिताऽनन्तदुःखलक्षपणाय १ भवाऽशुभानुभावा२ऽनन्तभवसन्तान३वस्तुविपरिणामलक्षणाः ४ शुक्लध्यानाद्यभेदद्वयसङ्गताश्चतस्रोऽनुप्रेक्षांश्चिन्तयेत् । उक्ताऽनुप्रेक्षाः। [ध्या. श. ८७, ८८]

अथ **लेश्या** दर्श्यन्ते ! तथाहि - सामान्येन शुक्ललेश्यायामाद्ये शुक्लध्याने । तृतीयं परमशुक्ललेश्यायाम् । तुरीयं तु लेश्यातीतम्, इत्युक्ता लेश्याः। [ध्या. श. ८९]

अथ **लिङ्गान्युच्यन्ते** । अवधाऽसम्मोहविवेकव्युत्सर्गलक्षणानि चत्वारि लिङ्गानि भवन्ति शुक्लध्यानस्य। १-परीषहोपसर्गैर्न बिभेति ध्यानाच्च न तैश्चाल्यत इत्यवधलिङ्गम् । २-देवमाययाऽत्यन्तगहनेष्वपि भावेषु न सम्मुह्यतीत्यसम्मोहलिङ्गम् । ३-देहविविक्तं पश्यत्याऽऽत्मानं तथा सर्वानपि च संयोगानिति विवेकलिङ्गम् । ४-देहोपधिव्युत्सर्गः निःसंगः सन् सर्वथा करोतीति व्युत्सर्गलिङ्गम् । इत्युक्तानि लिङ्गानि। [ध्या. श. ९०-९२]

अथ **फलमु**च्यते । तथाहि - यान्येव शुभास्रवसंवरनिर्जरादीनि निगदितानि धर्मध्यानस्य फलानि तान्येव सविशेषानि शुक्लध्यानस्यापि। अनुत्तरसुरसौख्यानि च शुक्लस्यादिमयोर्भेदयोः फलं चरमयोस्तु निर्वाणम् । [ध्या. श. ९४]

अथ **सामान्येनैव फल**मुच्यते । तथाहि - संवरनिर्ज्झरे अपवर्गस्य मार्गस्तयोश्चाऽयतं तपःप्रधानं च तपोऽङ्गं ध्यानं तस्मात्तत् मुक्तिनिदानम् । अयमेवार्थः स्पष्टीक्रियते - दृष्टान्तैर्यथा सिचयकालायसवसुमतीनां मलकलङ्ककर्दमा क्रमतः शोध्यन्तेऽपनीयन्ते शोष्यन्ते च सलिलाऽनलसूर्यैस्तथा ध्यानाम्बुवह्निसूरैः कर्मणामपि

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

शोध्यादयो विधीयन्ते । यथा ध्यानतो वाक्काययोगयोस्तापशोषभेदा भवन्ति तथा कर्मणोऽपि ध्यानतस्ते भवेयुः। यथा वा रोगाणां शमनं वमनविरेचनौषधादिभिः प्रकारैर्भवेत्तथा कर्मामयशमनमपि ध्यानानशनादिभिः प्रकारैः स्यात् । यथा वा चिरसञ्चितमिन्धननिवहं हुतभुक्पवनसमन्वितो ध्रुवं दहति तथाऽमितमपि कर्मेन्धनसमूहं ध्यानवह्निर्दहति तत्क्षणादेव । यथा वा जलदपटलं प्रचण्डप्रभञ्जनप्रेरितं क्षणादेव विलीयते तथा ध्यानपवमानावधूतं कर्मघनजालमपि । [ध्या. श. ९६-१०२]

अथैतस्य **शुभध्यानद्वयस्यैहलौकिकं फल**मुच्यते । तथाहि - धर्मशुक्लध्यानाधिरूढचित्तो न बाध्यते शीतातपक्षुत्पिपासादिभिः शारीरिकैरसातैर्नापि च पीड्यते कषायसमुद्भूतैरीर्ष्याविषादादिभिर्दुःखनिवहैः ।

अतः कारणादाद्ये ध्याने अपहायान्तिमे ध्याने नित्यमेव ध्येये।

नन्वेवं निरन्तरं ध्यानविधाने शेषक्रियालोपः प्राप्नोति, नैवं क्रियाविधानस्यापि तत्त्वतो ध्यानत्वाद् । यतः सा नास्ति काचिदपि क्रिया या श्रीमदागमानुसारेण विधीयमाना मुनीनां ध्यानतया न सम्भवेत् । [ध्या. श. १०३-१०५]

**इत्युक्तं ध्यानस्वरूपम् ।**

## श्री दर्शनरत्नरत्नाकरे तृतीयलहर्यां सप्तमतरङ्गे

## ध्यानकथाः ।

अथ ध्यानस्वरूपमुच्यते। तथाहि– १-आर्त २-रौद्र ३-धर्म ४-शुक्लध्यानभेदेन ध्यानं चतुर्विधम्। तेष्वार्त्तरौद्रध्यानपरिहारपुरस्सरं निरन्तरं धर्मशुक्लध्याने विधेये । यदुक्तं त्रिंशे श्रीमदुत्तराध्ययने-

"**अट्टरुद्दाणि वज्जिता, झाइज्जा सुसमाहिए । धम्मसुक्काइं झाणाइं, झाणं तं तु बुहा वए** ।।१।।"

एषां तु स्वरूपमेतस्यामेव लहर्यां तुरीयतरङ्गे प्रोक्तम्, तेन तत एव विलोकनीयम् । एतेष्वार्त्तरौद्रध्याने तिर्यग्निरयगतिनिदाने, तेन ते वर्जनीये । धर्मशुक्लध्याने तु सुरगतिपञ्चमगतिहेतुभूते, अतस्ते विधेये ।

**अत्रार्त्तध्याने तापसश्रेष्ठिकथा** । तथाहि– कौशाम्ब्यां तापसः श्रेष्ठी नानाविधारम्भैरुपार्जिप्रभूतवित्तस्तद्बलेन कारितानेकगृहः कलत्रपुत्रादिसमीकारनिरतः प्रान्तसमयेऽप्यपरित्यक्तधनसदनस्वजनादिममत्व आर्त्तध्यानपरः परासुभूतः समुत्पन्नः शुकरतया । स्वसदनस्वजनादि निरीक्ष्य जातजातिस्मृतिः प्राग्भवपुत्रेण हतो मृत्वा स्वगृह एव समुत्पेदे सर्पतया । तत्रापि जातिस्मरणात्तद्गृहममुञ्चन् प्राग्भवसुतेन हतः केनचित् शुभाध्यवसायेन मृतः समुत्पन्नः स्वतनूद्भववल्लभाकुक्षौ । पूर्णेषु दिनेषु जातः स्वसदनादि निरीक्ष्य जातजातिस्मृतिः कथं सुतं तातं वधूं च जननीं वदामीति विचिन्त्य मूकत्वमाश्रितो नानाविधैः पितृकृतोपायैस्तद्भावमत्यजन् क्रमेण वृद्धिं गतः। साधुसङ्गाद्धर्म्मपरः क्रमेण श्रामण्यमङ्गीकृत्य देवभूयं गतः। यथैष तापसः श्रेष्ठी आर्त्तध्यानात्तिर्यग्गतिं गतस्तथान्येऽपि ततस्तां यान्ति। तस्मात्तद्धेयम् । यथैष मूकभवे धर्मध्यानात्सुरगतिमवाप तथापरैरपि सा प्राप्यते तस्माद्धर्म्मध्यानं विधेयम् ।

**रौद्रध्याने तु मणिरथपार्थिवो निदर्शनम्**। तथाहि– अवन्तिजनपदेषु सुदर्शनपुरे मणिरथो नृपस्तस्य

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

युगबाहुः सहोदरः स च युवराजा । तस्य मदनरेखा प्राणप्रिया । सा च परमश्राविका सतीशिरोरत्नम् । अन्यदा मदनरेखारूपं निरीक्ष्य मणिरथस्तया सह संयोगाभिलाषी नानाविधवसनविभूषणादि तस्या प्रेषयति। सापि ज्येष्ठप्रेषितमिति बहुमानादादत्ते । अन्यदा मणिरथेन तस्याः पुरतः स्वचेतोभावे आविर्भाविते तया स नानाविधोपदेशैस्तस्माद-कृत्यान्निवारितश्चिन्तयामास, नूनमेषा प्राणप्रिये जीवति नेतरं नरमिच्छति; तेन केनाप्युपायेनैतस्याः पतिर्मार्यते यथैषा मां प्रतिपद्यते । इति विचिन्त्य स तच्छिद्राणि गवेषयति स्म । अन्यदा मदनरेखया शशी स्वप्ने दृष्टः प्रियस्याग्रे प्रोक्तः। तेनाप्युक्तं 'तव स्वप्नानुभावान्महाराजा तनूजो भावी।' अथ च तस्या गर्भानुभावाद् ये ये प्रशस्तदोहलाः समुत्पद्यन्ते ते ते प्रियेण पूर्यन्ते स्म । अन्यदा वसन्तर्तौ सदयितो युगबाहुः क्रीडार्थमुद्याने गतस्तत्रैव कदलीगृहे प्रसुप्तस्तदा च मणिरथेन चिन्तितं साम्प्रतं चिन्तितकृतस्य मे प्रस्ताव इति चिन्त्य तेन तत्रागत्य युगबाहुर्भाणितो नात्र प्रस्तावः शयनस्य तेनोत्तिष्ठ वयं यामोऽतर्नगरमिति कथनान्तरं तौ सोदरौ पुरं प्रति गन्तुं प्रवृत्तौ, मार्गे च मणिरथेन युगबाहुः कन्धरायां खड्गेन गाढप्रहारेणाहतो निमिलितलोचनः पतितः क्षितौ । तदा च मदनरेखया पूत्कृतिः कृता तां च निशम्य धाविताः सुभटाः किमेतदिति वदन्तस्तदा च मणिरथेनोक्तं मम प्रमादादसिः कन्धरायां निपतित इत्यादिकृत्रिमशोकं कुर्वन्सेवकैः स बलान्नीतो नगरं कथितं च तत्स्वरूपं युगबाहुसूनोश्चंद्रयशसः। सोऽपि वैद्यवृन्दमादाय ययावुद्यानं वैद्यैश्चासाध्य इत्युक्ते मदनरेखया कारिताराधनो धर्मध्यानलीनमनाः स गतः स्वर्लोकम् । मणिरथोऽपि तस्यामेव रजन्यां भुजगेन दष्टो रौद्रध्यानपरो गतस्तुरीयनिरये। प्रातश्चन्द्रयशसा पितृपितृव्ययोर्दाहे कृते सामन्तादिभिः स राज्येऽभिषिक्तः। अग्रतो मदनरेखावृतान्तस्तु नात्र लिख्यते बहुविस्तरत्वात्तेन नमिप्रत्येकबुद्धचरित्रादेव सोऽवसेयः, यथा मणिरथेन रौद्रध्यानं निरयनिदानं कृतं तथा नान्यैस्तद् विधेयम् ।

अथ **धर्मध्यानेऽर्हन्नकदृष्टान्तः** । तथाहि - तगरानगर्यां दत्तो वणिक् तस्य भद्रा प्राणप्रिया पुत्रोऽर्हन्नकः। अन्यदा संवेगरङ्गपूरितो दत्तः सुतदयिताभ्यां समं सद्गुरुसमीपे श्रामण्यमङ्गीचकार । अथ च पिता मोहात्सुतं भिक्षाचर्यायां गन्तुं न ददाति स्वयं च समानीतैर्मनोज्ञाहारैः सुतं सुखिनं करोति । एवं गते कियति समये पिता पञ्चतां गतस्ततोऽर्हन्नको निदाघर्तौ भिक्षार्थं निर्गतः सुकुमालतनुरुपर्यधश्च दह्यमानश्छायायां विश्रान्तः। तदा चैक्या प्रोषितपतिकया वनितया दृष्टः स सुरुपो नवयौवनः। दृष्ट्वा च समाकार्य स मोदकैः प्रतिलाभितः। तदनु च तयोक्तं किमेतत्तारुण्यानुचितं दुश्चरं तपश्चरणम् । तेन तिष्ठ मत्सौधे भुंक्ष्व च मया समं पञ्चविधं विषयसुखम्, इति तयोक्तः परीषहपराजितस्तया समं पञ्चप्रकारवैषयिकसुखोपभुक्तिपरः स स्थितस्तत्सदने । इतश्च तत्सवित्री पुत्रशोकेनोन्मत्ता गृहाद् गृहं भ्रमन्त्यर्हन्नकः क्वासीति प्रलपन्ती समागता तत्र कियत्समयातिक्रमे अर्हन्नकेनोपलक्षिता निपतितश्च स तत्पदोः। तयाऽपि सुतमिलनेन स्वस्थीभूतचित्तया प्रोक्तं किमेतदसमञ्जसं कृतम् । अद्यापि चारित्रमङ्गीकुरु दुष्कर्मक्षयकृते इति तयोक्ते चिरसमयानुष्ठेयं चारित्रमाराधयितुमशक्तः स करोम्यनशनमित्यवादीत्तयाप्योमिति प्रोक्ते तप्तशिलोपरिकृतपादपोपगमानशनो धर्मध्यानलीनमनाः स्वल्पेनैव कालेन नवनीतवद् विलीनो गतः स स्वर्लोकम् । यथाऽनेन धर्मध्यानं तथाविधकष्टेऽपि न त्यक्तं तथान्यैरपि तन्न त्याज्यम् ।

**शुक्लध्याने तु गजसुकुमालमेतार्यस्कन्धकाचार्यविनेयमरुदेवीभरतसार्वभौमप्रसन्नचन्द्रराजर्षिपृथ्वीचन्द्र-गुणसागरप्रभृतयः** प्रतीता एव दृष्टान्ताः।

**इत्युक्तं ध्यानस्वरूपम् ।**

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

# परिशिष्टम्-९

## पूज्यपाद-उपाध्यायश्रीसकलचन्द्रगणिकृता
## ध्यानदीपिका ।

**मङ्गलं**

सर्वर्द्धिलब्धिसिद्धीशैर्योगीन्द्रैर्वृत्तमिष्टदम् । निष्पापं पापाहं वन्दे सर्वं सर्वज्ञमण्डलम् ।। १ ।।

**विषयः**

ब्रह्मज्ञानानन्दे लीनार्हत्सिद्धसाधुसन्दोहम् । स्मृत्वा ध्यानकृतेऽहं ध्यानाध्वगदीपिकां वक्ष्ये ।। २ ।।

**ध्यानार्थिमुद्दिश्य**

जैनागमार्थानवलम्ब्य मोहध्वान्तान्तकृत्री शमशुद्धिदात्री ।

ध्यानार्थिभिः स्वान्तगृहे विधेया नित्यं निजोद्योतकृते कृतीशैः ।।३।।

**हितादि**

जीवो ह्यनादिमलिनो मोहान्धोऽयं च हेतुना येन ।

शुध्यति तत्तस्य हितं तच्च तपस्तच्च विज्ञानम् ।।४ ।।

**भावनाऽऽवश्यकी**

जन्मजरामरणभयैः पीडितमालोक्य विश्वमनगाराः । निःसङ्गत्वं कृत्वा ध्यानार्थं भावनां जग्मुः ।। ५ ।।

**भावनाभूमिका**

भूतेषु भज समत्वं चिन्तय चित्ते निजात्मरूपं च ।

मनसः शुद्धिं कृत्वा भावय चित्तं च भावनया ।। ६ ।।

**भावना**

भावना द्वादशैतास्ता अनित्यादिकताः स्मृताः । ज्ञानदर्शनचारित्र्यं वैराग्याद्यास्तथा पराः ।। ७ ।।

**ज्ञानभावना**

वाचना पृच्छना साधुप्रेक्षणं परिवर्तनम् । सद्धर्मदर्शनं चेति ज्ञातव्या ज्ञानभावना ।। ८ ।।

**दर्शनभावना**

संवेगः प्रशमः स्थैर्य-मसम्मूढत्वमस्मयः । आस्तिक्यमनुकम्पेति ज्ञेया सम्यक्त्वभावना ।। ९ ।।

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

**चारित्रभावना**

ईर्यादिविषया यत्ना मनोवाक्कायगुप्तयः । परीषहसहिष्णुत्वमिति चारित्र्यभावना ।। १० ।।

**वैराग्यभावना**

विषयेष्वनभिष्वङ्गः कार्यं तत्त्वानुचिन्तनम् । जगत्स्वभावचिन्तेति वैराग्यस्थैर्यभावना ।। ११ ।।

**भावनाकार्यम्**

भावनास्वासु संलीनं विधायाध्यात्मिकं स्थिरम् । कर्म-पुद्गलजीवानां स्वरूपं च विचिन्तयेत् ।। १२ ।।

नित्यमाभिर्यदा विश्वं भावयत्यखिलं मुनिः । विश्वौदासीन्यमापन्नश्चरत्यत्रैव मुक्तवत् ।। १३ ।।

**अनित्यभावना**

सर्वे भवसम्बन्धा विनश्वरा विभवदेहसुखमुख्याः । अमरनरेन्द्रैश्वर्यं यौवनमपि जीवितमनित्यम् ।। १४ ।।

अक्षार्था पुण्यरूपा ये पूर्वं स्युस्ते क्षणेन च । अक्षाणामिष्टतां दत्त्वाऽनिष्टतां यान्त्यहो क्षणात् ।। १५ ।।

अशुभार्थः शुभार्थः स्याच्छुभार्थोप्यशुभस्तथा । रागद्वेषविकल्पेन भावनामित्यनित्यता ।। १६ ।।

**अशरणभावना**

न त्राणं न हि शरणं सुरनरहरिखेचरकिन्नरादीनाम् । यमपाशपाशितानां परलोकं गच्छतां नियतम् ।। १७ ।।

इन्द्रियभरानुभूतैरद्भूतनवरसकरैश्च निजविषयैः । श्रुतदृष्टलब्धभुक्तैर्यदि मरणं किं ततस्तैर्भोः ।। १८ ।।

नीयमानः कृतान्तेन जीवोऽत्राणोऽमरैरपि । प्रतिकारशतेनापि त्रायते नेति चिन्तयेत् ।। १९ ।।

**संसारभावना**

संसारदुःखजलधौ चतुर्गतावत्र जन्मजरावर्ते । मरणार्तिवाडवाग्नौ भ्रमन्ति मत्स्या इवाङ्गभृतः ।। २० ।।

उत्पद्यन्ते विपद्यन्ते त्रसेषु स्थावरेषु च । स्वकर्मप्रेरिता जीवाः संसारस्येति भावना ।। २१ ।।

**एकत्वभावना**

शुभाशुभानां जीवोऽयं कृतानां कर्मणां फलम् । सोऽत्रैव स्वयमेवैकः परत्रापि भुनक्ति च ।। २२ ।।

कलत्रपुत्रादिकृते दुरात्मा करोति दुष्कर्म स एव एकः ।

भुङ्क्ते फलं श्वभ्रगतः स्वयं च नायाति सोढुं स्वजनास्तदन्ते ।।२३।।

**अन्यत्वभावना**

आत्मा स्वभावेन शरीरतोऽयमन्यश्चिदानन्दमयो विशुद्धः ।

कर्माणुभिर्योऽस्ति कृतः कलङ्की स्वर्णं यथा धातुजकालिकाभिः ।। २४ ।।

सर्वथाऽन्यस्वभावानि, पुत्रमित्रधनानि च । चेतनेतरे वस्तूनि, स्वात्मरूपाद्विभावय ।। २५ ।।

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

विनैकं स्वकमात्मानं सर्वमन्यन्निजात्मनः । मत्वेतीष्टाप्तिनाशेऽङ्गिन् ! हर्षशोकौ हि मूढता ।। २६ ।।

**अशुचिभावना**

शुक्रादि बीजं निन्द्यमनेकाशुचिसम्भृतम् । मलिनं निसर्गनिःसारं लज्जागारं त्विदं वपुः ।। २७ ।।

विनश्वरं पोषितभूषितं किं यात्येव यत्तन्मिलितं ततः किम् ।

सृजति पुनः पतति ततः किं जातो मतो यो विफलस्ततः किम् ।। २८ ।।

**आश्रवभावना**

मनोवचःकायकर्म योग इत्युच्यते जिनैः । स एवाश्रव इत्युक्तः सोऽप्यशुभः शुभस्तथा ।। २९ ।।

अम्भोधौ यानपात्रस्य छिद्रं सूते यथा जलम् । योगरन्ध्रैस्तथा जीवः कर्मादत्ते शुभाशुभम् ।। ३० ।।

**संवरभावना**

अशेषाश्रवरोधो यः संवरोऽसौ निगद्यते । द्रव्यतो भावतश्चापि स द्विधेति प्रवर्तते ।। ३१ ।।

यः कर्मपुद्गलादानविच्छेदः स्यात्तपस्विनाम् । स द्रव्यसंवरो ज्ञेयो योगिभिर्भावितात्मभिः ।। ३२ ।।

यः संसारनिमित्तस्य क्रियाया विरतिः सताम् । स भावसंवरो ज्ञेयः सर्वसंवृतयोगिनाम् ।। ३३ ।।

**निर्जराभावना**

मूलभूतानि कर्माणि जन्मान्तादिव्यथातरोः । विशीर्यते यया सा च निर्जरा प्रोच्यते बुधैः ।। ३४ ।।

सा सकामा ह्यकामा च द्विविधा प्रतिपादिताः । निर्ग्रन्थानां सकामा स्यादन्येषामितरा तथा ।। ३५ ।।

स्वयं पाक उपायाच्च फलानां स्याद्यथा तरोः । तथात्र कर्मणां पाकः स्वयं चोपायतो भवेत् ।। ३६ ।।

विशुध्यति यथा स्वर्णं सदोषमपि वह्निना । तद्वच्छुध्यति जीवोऽयं तप्यमानस्तपोग्निना ।। ३७ ।।

**धर्मस्वाख्यातभावना**

जगदाधारो धर्मो दयान्वितो दशविधश्च पूतजगत् । स्वर्गापवर्गसुखदः सुदुर्लभो भाव्यते भव्यैः ।। ३८ ।।

यस्यांशमेवमुपसेव्य भजन्ति भव्या मुक्तिं वृषस्य शुचिदानदयादिज्ञातैः ।

शक्यं स्वरूपमतुलं गदितुं हि सम्यक् किं तस्य नास्तिकनरैश्च कुशास्त्रवादैः ।। ३९ ।।

**गाथा ४०-४१ बाकी**

**लोकस्वरूपभावना**

जीवादयो यत्र समस्तभावा जिनैर्विलोक्यन्त इतीह लोकः ।

उक्तस्त्रिधासौ स्वयमेव सिद्धो स्वामी च नित्यो निधनश्च चिन्त्यः ।। ४२ ।।

उत्पद्यन्ते विपद्यन्ते यत्रैते जीवराशयः । कर्मपाशातिसम्बद्धाः नानायोनिषु संस्थिताः ।। ४३ ।।

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

**बोधिदुर्लभभावना**

जीवानां योनिलक्षेषु भ्रमतामतिदुर्लभम् । मानुष्यं धर्मसामग्री बोधिरत्नं च दुर्लभम् ।। ४४ ।।

**हितवाक्यम्**

गुणोपेतं नरत्वं चेत् काकतालीयनीतितः । यद्याप्तं सफलं कुर्यात् नित्यं मोक्षार्थसाधनैः ।। ४५ ।।

**ध्यानं मोक्षसाधनम्**

मोक्षोऽतिकर्मक्षयतः प्रणीतः कर्मक्षयो ज्ञानचारित्र्यतश्च ।

ज्ञानं स्फुरद्ध्यानत एव चास्ति ध्यानं हितं तेन शिवाध्वगानाम् ।। ४६ ।।

**आत्महितम्**

मोक्षः कर्मक्षयादेव स सम्यग्ज्ञानतो भवेत् । ध्यानसाध्यं मतं तद्धि तस्मात्तद्धितमात्मनः ।। ४७।।

**ध्यानदीपिका**

अतः स्वात्मार्थसिद्ध्यर्थं धर्मध्यानं मुनिः श्रयेत् । प्रतिज्ञां प्रतिपद्येति चिन्त्यते ध्यानदीपिका ।। ४८ ।।

**विना निजार्थं वृथा सर्वम्**

अन्तेऽस्ति मृत्युर्यदि यस्य तस्य चिन्तामणिर्हस्तमितस्ततः किम् ।

सुवर्णसिद्धिस्त्वभवत्ततः किं जातं प्रभुत्वं क्षणिकं ततः किम् ।। ४९ ।।

प्राप्ता च गुर्वी पदवी ततः किं गीतं यशोऽन्यैर्न हि वा ततः किम् ।

भुक्ताश्च भोगाः सुरसास्ततः किं लब्धा च विद्याधरता ततः किम् ।। ५० ।।

शब्दादिभिर्ता ललितं ततः किं श्रियोऽर्जिता कोटिमितास्ततः किम् ।

नतं श्रुतज्ञैर्महितं ततः किं न स्वीकृतं चैव निजार्थसाध्यम् ।। ५१ ।।

**ध्यानसुधापानम्**

अतोऽसत्कल्पनाभाजं हित्वार्थं मोक्षमिच्छुभिः । समस्तगुणसंस्थानं धर्मध्यानं समाश्रितम् ।। ५२ ।।

निर्विण्णोसि यदि भ्रातर्जन्मादिक्लेशयोगतः । निःसङ्गत्वं समासृत्य धर्मध्यानरतो भव ।। ५३ ।।

अविद्यातमसं त्यक्त्वा, मोहनिद्रामपास्य च । निर्दोषोऽथ स्थिरीभूय पिब ध्यानसुधारसम् ।। ५४ ।।

**द्वारगाथा**

ध्याता ध्यानं च तद्ध्येयं फलं चेति चतुर्विधम् । सर्वं संक्षेपतो मत्वा स्वार्त्तध्यानादिकं त्यजेत् ।। ५५ ।।

**ध्याता**

निर्ग्रन्थो हि भवेद् ध्याता प्रायो ध्याता गृही न च । परिग्रहादिमग्नत्वात् तस्य चेतो यतश्चलम् ।। ५६ ।।

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

**ध्यानायोग्याः**

खरस्यापि हि किं शृङ्गं खपुष्पमथवा भवेत् । तथाङ्गनादिसक्तानां नराणां क्व स्थिरं मनः ।। ५७ ।।

तथा पाखण्डीमुख्यानां नास्तिकानां कुचक्षुषाम् । तेषां ध्यानं न शुद्धं यद्वस्तुतत्त्वाज्ञता यतः ।। ५८ ।।

सदाचाराच्च भ्रष्टानां कुर्वतां लोकवञ्चनम् । बिभ्रतां साधुलिङ्गं च तेषां ध्यानं न शुद्धिदम् ।। ५९ ।।

**अध्याता**

नित्यं विभ्रान्तचित्तानां पश्यत्वेषां कुचेष्टितम् । संसारार्थं यतित्वेऽपि तेषां यात्यफला जनिः ।। ६० ।।

**ध्यानं धर्ममूलम्**

ध्यानमेवात्मधर्मस्य मूलं मोक्षस्य साधनम् । असद्ध्यानं ततो हेयं यत् कुतीर्थिकदर्शितम् ।। ६१ ।।

**दुर्ध्यानम्**

कैश्चिन्मूढात्मभिर्ध्यानमन्यैः स्वपरवञ्चकैः । सपापं तत्प्रणीतं च दुःखदुर्गतिदायकम् ।। ६२ ।।

धनार्थं स्त्रियादिवश्यार्थं, जन्तुघातादिकारकम् । शत्रूच्चाटादिकृद् ध्यानं क्रियते दुष्टबुद्धिभिः ।। ६३ ।।

**ध्यानव्याख्या**

दृढसंहननस्यापि मुनेरान्तर्मुहूर्तिकम् । ध्यानमाहुरथैकाग्रचिन्तारोधो जिनोत्तमाः ।। ६४ ।।

**ध्यानस्वामि-काले**

छद्मस्थानां तु यद्ध्यानं भवेदान्तर्मुहूर्तिकम् । योगरोधो जिनेन्द्राणां ध्यानं कर्मौघघातकम् ।। ६५ ।।

**भावनाऽनुप्रेक्षा-चिन्ताः**

एकचिन्तानिरोधो यस्तद्ध्यानं भावनाः पराः । अनुप्रेक्षार्थचिन्ता वा ध्यानसन्तानमुच्यते ।। ६६ ।।

**प्रशस्ताप्रशस्तविभागम्**

रागद्वेषौ शमी मुक्त्वा यद्यद्वस्तु विचिन्तयेत् । तत्प्रशस्तं मतं ध्यानं रौद्राद्यं चाप्रशस्तकम् ।। ६७ ।।

**ध्यानव्याख्या**

वीतरागो भवेत् योगी यत्किञ्चिदपि चिन्तयन् । तदेव ध्यानमाम्नातमतोऽन्ये ग्रन्थविस्तराः ।। ६८ ।।

**आर्त्तरौद्रव्याख्या**

आर्त्तं रौद्रं च दुर्ध्यानं प्रत्येकं तच्चतुर्विधम् । अर्ते भवमथार्त्तं स्यात् रौद्रं प्राणातिपातजम् ।। ६९ ।।

**चतुष्प्रकारमार्त्तध्यानम्**

अनिष्टयोगजं चाद्यं परं चेष्टवियोगजम् । रोगार्त्तं च तृतीयं स्यात् निदानार्त्तं चतुर्थकम् ।। ७० ।।

**अनिष्टसंयोगजमार्त्तम्**

विषदहनवनभुजंगमहरिशस्त्रारातिमुख्यदुर्जीवैः । स्वजनतनुघातकृद्भिः सह योगेनार्त्तमाद्यं च ।। ७१ ।।

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

श्रुतैर्दृष्टैः स्मृतैर्ज्ञातैः प्रत्यासत्तिसमागतैः । अनिष्टार्थैर्मनःक्लेशे पूर्वमार्तं भवेत्तदा ।। ७२ ।।

**द्वित्तीयमार्त्तम्**

राज्यैश्वर्यकलत्रपुत्रविभवक्षेत्रस्वभोगात्यये चित्तप्रीतिकरप्रशस्तविषयप्रध्वंसभावेऽथवा ।

सत्रासभ्रमशोकमोहविवशैर्यच्चिन्त्यतेऽहर्निशम् तत्स्यादिष्टवियोगजं तनुमतां ध्यानं मनोदुःखदम् ।। ७३ ।।

दृष्टश्रुतानुभूतैस्तैः पदार्थैश्चित्तरञ्जकैः । वियोगे यन्मनःक्लेशः स्यादार्त्तं चेष्टहानिजम् ।। ७४ ।।

मनोज्ञवस्तु विध्वंसे पुनस्तत्सङ्गमार्थिभिः । क्लिश्यन्ते यत् तदेतत्स्यात् द्वितीयार्त्तस्य लक्षणम् ।। ७५ ।।

**रोगार्त्तम्**

अल्पानामपि रोगाणां मा भूत्स्वप्नेऽपि सङ्गमः । ममेति या नृणां चिन्ता स्यादार्त्तं तत् तृतीयकम् ।। ७६।।

**निदानजम्**

राज्यं सुरेन्द्रता भोगाः खगेन्द्रत्वं जयश्रियः । कदा मेऽमी भविष्यन्ति भोगार्त्तं चेति सम्मतम् ।। ७७।।

पुण्यानुष्ठानजातैरभिलषति पदं यज्जिनेन्द्रामराणाम् यद्वा तैरेव वाञ्छत्यहितजनकुलच्छेदमत्यन्तकोपात् ।

पूजासत्कारलाभादिकसुखमथवा याचते यद्विकल्पैः स्यादार्त्तं तन्निदानभवमिह नृणां दुःखदं ध्यानमार्त्तम् ।। ७८।।

**लेश्या**

लेश्यात्रयं च कृष्णादि नास्तिसंक्लिष्टकं भवेत् । आर्त्तध्यानगतस्याथ लिङ्गान्येतानि चिन्तयेत् ।। ७९ ।।

**लिङ्गानि**

शोकाक्रन्दौ मूर्च्छा मस्तकहृदयादिताडनं चिन्ता । आर्त्तं गतस्य नरस्य हि लिङ्गान्येतानि बाह्यानि ।। ८० ।।

**रौद्रध्यानम्**

दुष्टः क्रूराशयो जन्तू रौद्रकर्मकरो यतः । ततो रौद्रं मतं ध्यानं तच्चतुर्धा बुधैः स्मृतम् ।। ८१ ।।

**चतुष्प्रकारकम्**

हिंसानन्दान्मृषानन्दाच्चौर्यात्संरक्षणात्तथा । रौद्रध्यानं चतुर्धा स्याद्देहिनां निर्दयात्मनाम् ।। ८२ ।।

**हिंसानन्दम्**

पीडिते च तथा ध्वस्ते जीवोघेऽथ कदर्थिते । स्वेन वान्येन यो हर्षस्तद् हिंसारौद्रमुच्यते ।। ८३ ।।

निरन्तरं निर्दयतास्वभावः स्वभावतः सर्वकषायदीप्तः ।

मदोद्धतः पापमतिः कुशीलः स्यान्नास्तिको यः स हि रौद्रगेहम् ।। ८४ ।।

जीवानां मारणोपायान् चिन्तयेत् पूजनं तथा । गोत्रदेवीद्विजादीनां मेषादिप्राणघातनैः ।। ८५ ।।

जलस्थलखगादीनां गलनेत्रादिकर्त्तनम् । जीवानां प्राणघातादि कुर्वन् रौद्रं गतो भवेत् ।। ८६ ।।

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

**असत्यानन्दम्**

विधाय वञ्चकं शास्त्रं मार्गमुद्दिश्य हिंसकम् । प्रपात्य व्यसने लोकं भोक्ष्येऽहं वाञ्छितं सुखम् ।। ८७।।

असत्यकल्पनाकोटिकश्मलीकृतमानसः । चेष्टते यत् जनस्तद्धि मृषानन्दं हि रौद्रकम् ।। ८८ ।।

**चौर्यानन्दम्**

चौर्यार्थं जीवघातादि चिन्तार्त्तं यस्य मानसम् । कृत्वा तच्चिन्तितार्थं यत् हृष्टं तच्चौर्यमुदितम् ।। ८९ ।।

द्विपदचतुष्पदसारधनधान्यवराङ्गनासमाकीर्णम् । वस्तु परकीयमपि मे स्वाधीनं चौर्यसामर्थ्यात् ।। ९०।।

चौर्यं बहुप्रकारं ग्रामाध्वगदेशघातकरणेच्छा । सततमिति चौर्यरौद्रं भवत्यवश्यं श्वभ्रगमनम् ।। ९१ ।।

**संरक्षणानुबन्धि**

बह्वारम्भपरिग्रहसङ्ग्रामैर्जन्तुघाततो रक्षाम् । कुर्वन् परिग्रहादे रक्षारौद्रीति विज्ञेयम् ।। ९२ ।।

शस्त्रैररीणां हि शिरांसि भित्त्वा दग्ध्वा पुरग्रामगृहारिदेशान् ।

प्राप्स्येऽहमैश्वर्यमनन्यसाध्यं स्वगृह्लतां वाथ तथा करिष्ये ।। ९३ ।।

**लेश्या**

कापोतनीलकाला अतिसंक्लिष्टा भवन्ति दुर्लेश्याः । रौद्रध्यानपरस्य तु नरस्य नरकातिथेर्मोहात् ।। ९४।।

**लक्षणानि**

क्रूरता चित्तकाठिन्यं वञ्चकत्वं कुदण्डता । निस्त्रृंशत्वं च लिङ्गानि रौद्रस्योक्तानि सूरिभिः ।। ९५ ।।

**उपसंहारः**

क्वचित्क्वचिदमी भावाः प्रवर्त्तन्ते पुनरपि । प्राग्कर्मगौरवाच्चित्रं प्रायः संसारहेतवः ।। ९६ ।।

**शमाम्भोधिप्रवेशम्**

प्रविश्याथ शमाम्भोधिं योगाष्टाङ्गानि चिन्तयेत् । दुष्टानुष्ठानतो भग्नो मनःशुद्धिकृते मुनिः ।। ९७ ।।

**अष्टाङ्गयोगः**

यमनियमासनबन्धं प्राणायामेन्द्रियार्थसंवरणम् । ध्यानं ध्येयसमाधि योगाष्टाङ्गानि चेति भज ।। ९८ ।।

**प्राणायामी**

सप्तदशभेदसंयमधरो यमी शौचतादियुतनियमी । पद्मासनादिसुस्थः प्राणायामप्रयासी च ।। ९९ ।।

**प्राणायामनिषेधः**

किमनेन प्रपञ्चेन प्राणायामेन चिन्मताम् । कायहृत्क्लेशकारिणा नादृतस्तेन सूरिभिः ।। १०० ।।

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

पूरकैः कुम्भकैश्चैव रेचकैः किं प्रयोजनम् । विमृश्येति तदादेयं यन्मुक्तेर्बीजमग्रिमम् ।। १०१ ।।

**प्रत्याहारः**

इन्द्रियार्थनिरोधो यः स प्रत्याहार उच्यते । प्रत्याहारं विधायाथ धारणा क्रियते बुधैः ।। १०२ ।।

**धारणा**

ध्येयवस्तुनि संलीनं यन्मनोज्ञैर्विधीयते । परब्रह्मात्मरूपे वा गुणिनां सद्गुणेष्वपि ।। १०३ ।।

अर्हदाद्यङ्गरूपे वा, भाले नेत्रे मुखे तथा । लये लग्नं मनो यस्य, धारणा तस्य सम्मता ।। १०४ ।।

**शुभध्यानविचारः**

ध्यानं चतुर्विधं ज्ञेयं धर्मं शुक्लं च नामतः । प्रत्येकं तच्छ्रयेत् योगी विरक्तः पापयोगतः ।। १०५ ।।

**धर्मध्यानसाधनानि**

भावनादीनि धर्मस्य स्थानाद्यासनकानि वा। कालश्चालम्बनादीनि ज्ञातव्यानि मनीषिभिः ।। १०६ ।।

**भावना**

चतस्रो भावना भव्या उक्ता ध्यानस्य सूरिभिः । मैत्र्यादयश्चिरं चित्ते विधेया धर्मसिद्धये ।। १०७ ।।

**मैत्रीभावना**

प्राणभूतेषु सर्वेषु सुखदुःखस्थितेषु च । वैरिमित्रेषु जीवेषु मैत्री स्याद्धितधीः सताम् ।। १०८ ।।

**करुणाभावना**

वधबन्धनरुद्धेषु निस्त्रिंशैः पीडितेषु च । जीवितं याचमानेषु दयाधीः करुणा मता ।। १०९ ।।

**प्रमोदभावना**

जिनधर्मजुषां ज्ञानचक्षुषां च तपस्विनाम् । निःकषायजिताक्षाणां गुणे मोदः प्रमोदता ।। ११० ।।

**माध्यस्थ्यभावना**

देवगुर्वागमाचार-निन्दकेष्वात्मशंसिषु । पापिष्ठेषु च माध्यस्थ्यं सोपेक्षा च प्रकीर्तिता ।। १११ ।।

भावनास्वासु संलीनं विधायाध्यात्मिकं स्थिरम् । कर्मपुद्गलजीवानां स्वरूपं च विचिन्तयेत् ।। ११२ ।।

**भावनाकार्यम्**

नित्यमाभिर्यदा विश्वं भावयत्यखिलं मुनिः । विश्वौदासीन्यमापन्नश्चरत्यत्रैव मुक्तवत् ।। ११३ ।।

**स्थानम्**

सिद्धतीर्थादिके क्षेत्रे शुभस्थाने निरञ्जने । मनःप्रीतिप्रदे देशे ध्यानसिद्धिर्भवेन्मुनेः ।। ११४ ।।

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

**कालः**

यत्र काले समाधानं योगानां योगिनो भवेत् । ध्यानकालः स विज्ञेयो दिनादेर्नियमोऽस्ति न ।। ११५ ।।

**आसनम्**

पद्मासनादिना येनासनेनैव सुखी भवेत् । ध्यानं तेनासनेन स्यात् ध्यानिनां ध्यानसिद्धये ।। ११६ ।।

**दिक्**

पूर्वाभिमुखो ध्यानी चोत्तरामिमुखोऽथवा । प्रसन्नवदनो धीरो ध्यानकाले प्रशस्यते ।। ११७ ।।

**आलम्बनम्**

आलम्बनानि धर्मस्य वाचनाप्रच्छनादिकः । स्वाध्यायः पञ्चधा ज्ञेयो धर्मानुष्ठानसेवया ।। ११८ ।।

**क्रमः**

ध्यानानुक्रम उक्तः केवलिनां चित्तयोगरोधादि । भवकाले त्वितरेषां यथा समाधिं च विज्ञेयः ।। ११९ ।।

**धर्मध्यानभेदाः**

आज्ञापायविपाकस्य क्रमशः संस्थितेस्तथा । विचयाय पृथग् ज्ञेयं धर्मध्यानं चतुर्विधम् ।। १२० ।।

**आज्ञाविचयः**

स्वसिद्धान्तप्रसिद्धं यत् वस्तुतत्त्वं विचार्यते । सर्वज्ञाज्ञानुसारेण तदाज्ञाविचयो मतः ।। १२१ ।।

आज्ञा यत्र पुरस्कृत्य सर्वज्ञानामबाधिताम् । तत्त्वतश्चिन्तयेदर्थंस्तदाज्ञाध्यानमुच्यते ।। १२२ ।।

**अपायविचयः**

अपायविचयं ज्ञेयं ध्यानं तञ्च विचक्षणैः । अपायः कर्मणां यत्र सोऽपायः प्रोच्यते बुधैः ।। १२३ ।।

रागद्वेषकषायाश्रवक्रियावर्तमानजीवानाम् । इह-परलोकापायानपायभीरुः स्मरेत् साधुः ।। १२४ ।।

**विपाकविचयः**

चतुर्धा कर्मबन्धेन शुभेनाप्यशुभेन वा। विपाकः कर्मणां जीवैर्भुज्यमानो विचिन्त्यते ।। १२५ ।।

प्रतिक्षणसमुद्भूतो यत्र कर्मफलोदयः । चिन्त्यते चित्ररूपः स विपाकविचयो मतः ।। १२६ ।।

या सम्पदार्हतो या च विपदा नारकात्मनः । एकातपत्रता तत्र पुण्यापुण्यस्य कर्मणः ।। १२७ ।।

**संस्थानविचयः**

अनन्तानन्तमाकाशं सर्वतः सुप्रतिष्ठितम् । तन्मध्ये यः स्थितो लोको नित्यो दृष्टो जिनोत्तमैः ।। १२८ ।।

स्थित्युत्पत्तिव्ययोपेतैः पदार्थैश्चेतनेतरैः । सम्पूर्णोऽनादिसंसिद्धः स्थितं यत्र जगत्त्रयम् ।। १२९ ।।

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

**ध्याता**

ज्ञानवैराग्यसम्पन्नः संवृतात्मा स्थिराशयः । क्षीणोपशान्तमोहश्चाऽप्रमादी ध्यानकारकः ।। १३० ।।

शुद्धसम्यक्त्वदर्शी च श्रुतज्ञानोपयोगवान् । दृढसंहननो धीरः सर्वषट्जीवपालकः ।। १३१ ।।

सत्यवाक् दत्तभोजी च ब्रह्मचारी पवित्रहृत् । स्त्रीकामचेष्टयास्पृष्टो निःसङ्गो वृद्धसेवकः ।। १३२ ।।

निराशो निष्कषायी च जिताक्षो निष्परिग्रही । निर्ममः समतालीनो ध्याता स्यात् शुद्धमानसः ।। १३३।।

**स्वामी**

अप्रमत्तप्रमत्ताख्यौ मुख्यतः स्वामिनौ मतौ । चत्वारः स्वामिनः कैश्चित् उक्ता धर्मस्य सूरिभिः ।। १३४।।

**ध्येयः**

पिण्डस्थं च पदस्थं च रुपस्थं रूपवर्जितम् । इत्यन्यत्रापि सद्ध्यानं ते ध्यायन्ति चतुर्विधम् ।। १३५।।

**पिण्डस्थे पञ्चधारणा**

पिण्डस्थे पञ्च विज्ञेया धारणा तत्र पार्थिवी । आग्नेयी मारुती चापि वारुणी तत्त्वभूस्तथा ।। १३६ ।।

**पार्थिवीधारणा**

तिर्यग्लोकसमं ध्यायेत् क्षीराब्धिं तत्र चाम्बुजम् । सहस्रपत्रं स्वर्णाभं जम्बुद्वीपसमं स्मरेत् ।। १३७ ।।

तत्केसरततेरन्तः स्फुरत्पिङ्गप्रभाञ्चिताम् । स्वर्णाचलप्रमाणां च कर्णिकां परिचिन्तयेत् ।। १३८ ।।

श्वेतसिंहासनासीनं कर्मनिर्मलनोद्यतम् । आत्मानं चिन्तयेत्तत्र पार्थिवी धारणेत्यसौ ।। १३९ ।।

**आग्नेयीधारणा**

ततोऽसौ निश्चलाभ्यासात् कमलं नाभिमण्डले । स्मरत्यतिमनोहारि षोडशोन्नतपत्रकम् ।। १४० ।।

प्रतिपत्रसमासीनस्वरमालाविराजितम् । कर्णिकायां महामन्त्रं विस्फुरन्तं विचिन्तयेत् ।। १४१ ।।

रेफरुद्धं कलाबिन्दुलाञ्छितशून्यमक्षरम् । लसद्बिन्दुछटाकोटीकान्तिव्याप्तहरिन्मुखम् ।। १४२ ।।

[अर्हं] तस्य रेफाद्विनिर्यान्तीं शनैर्धूमशिखां स्मरेत् । स्फुलिङ्गसन्ततिं पश्चात् ज्वालालीं तदनन्तरम् ।। १४३।।

तेन ज्वालाकलापेन वर्धमानेन सन्ततम् । दहत्यविरतं धीरः पुण्डरीकं हृदि स्थितम् ।। १४४ ।।

तदष्टकर्मनिर्माणमष्टपत्रमधोमुखम् । दहत्येव महामन्त्रध्यानोत्थप्रबलानलः ।। १४५ ।।

ततो देहाद् बहिर्ध्यायेत् त्रिकोणं वह्निमण्डलम् । ज्वलत्स्वस्तिकसंयुक्तं वह्निबीजसमन्वितम् ।। १४६ ।।

देहं पद्मं च मन्त्रार्चिरन्तर्वह्निपुरं बहिः । कृत्वाशु भस्मसाच्छाम्येत्स्यादाग्नेयीति धारणा ।। १४७ ।।

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

**मारुतीधारणा**

ततस्त्रिभुवनाभोगं पूरयन्तं समीरणम् । चालयन्तं गिरीनब्धीन् क्षोभयन्तं विचिन्तयेत् ।। १४८ ।।

तच्च भस्मरजस्तेन शीघ्रमुद्धूय वायुना । दृढाभ्यासः प्रशान्तिं तमानयेदिति मारुती ।। १४९ ।।

**वारुणीधारणा**

स्मरेद्वर्षत्सुधासारैः घनमालाकुलं नभः । ततोऽर्धेन्दुसमकान्तं मण्डलं वारुणाङ्कितम् ।। १५० ।।

नभस्तलं सुधाम्भोभिः प्लावयेत्तत्पुरं ततः । तद्रजः कायसम्भूतं क्षालयेदिति वारुणी ।। १५१ ।।

**तत्त्वभूधारणा**

सप्तधातुविनाभूतं पूर्णेन्दुविशदद्युतिम् । सर्वज्ञकल्पमात्मानं शुद्धबुद्धिः स्मरेत्ततः ।। १५२ ।।

ततः सिंहासनासीनं सर्वातिशयभासुरम् । विध्वस्ताशेषकर्माणं कल्याणमहिमान्वितम् ।। १५३ ।।

स्वाङ्गगर्भे निराकारं स्वं स्मरेदिति तत्त्वभूः । साभ्यास इति पिण्डस्थे योगी शिवसुखं भजेत् ।। १५४।।

**पिण्डस्थध्यानफलम्**

अश्रान्तमिति पिण्डस्थे कृताभ्यासस्य योगिनः । प्रभवन्ति न दुर्विद्यामन्त्रमण्डलशक्तयः ।। १५५ ।।

शाकिन्यः क्षुद्रयोगिन्यः पिशाचा पिशिताशनाः । त्रस्यन्ति तत्क्षणादेव तस्य तेजोऽसहिष्णवः ।। १५६ ।।

दुष्टा करटिनः सिंहा शलभा पन्नगा अपि । जिघांसवोऽपि तिष्ठन्ति स्तम्भिता इव दूरतः ।। १५७ ।।

**पदस्थध्यानम्**

पुण्यमन्त्रपदान्येव तथागमपदानि वा । ध्यायन्ते यद्बुधैर्नित्यं तत्पदस्थं मतं बुधैः ।। १५८ ।।

ओमर्हादिकमन्त्राणां मायाबीजजुषां ततिम् । परमेष्ठ्यादिपदव्रातं पदस्थध्यानगः स्मरेत् ।। १५९ ।।

**रूपस्थध्यानम्**

सर्वातिशययुक्तस्य केवलज्ञानभास्वतः । अर्हतो रूपमालम्ब्य ध्यानं रूपस्थमुच्यते ।। १६० ।।

रागद्वेषमहामोहविकारैरकलङ्कितम् । शान्तकान्तं मनोहारि सर्वलक्षणलक्षितम् ।। १६१ ।।

जिनेन्द्रप्रतिमारूपमपि निर्मलमानसः । निर्निमेषदशा ध्यायन् रुपस्थध्यानवान्भवेत् ।। १६२ ।।

**ध्यानफलम्**

ध्यानी चाभ्यासयोगेन तन्मयत्वमुपागतः । सर्वज्ञीभूतमात्मानमवलोकयति स्फुटम् ।। १६३ ।।

**तन्मयता**

सर्वज्ञो भगवान् योऽयमहमेवास्मि स ध्रुवम् । एवं तन्मयतां यातः सर्ववेदीति मन्यते ।। १६४ ।।

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

**यथा आलम्बनं तथा फलम्**

वीतरागो विमुच्येत वीतरागं विचिन्तयन् । रागिणं तु समालम्ब्य रागी स्यात्क्षोभणादिकृत् ।। १६५ ।।

**दृष्टान्तः**

येन येन हि भावेन युज्यते यन्त्रवाहकः । तेन तन्मयतां याति विश्वरूपो मणिर्यथा ।। १६६ ।।

**असद्ध्यानानि न सेव्यानि**

नासद्ध्यानानि सेव्यानि कौतुकेनापि किन्त्विह । स्वनाशायैव जायन्ते सेव्यमानानि तानि यत् ।। १६७।।

**सर्वसिद्धिसिद्धिः**

सिध्यन्ति सिद्धयः सर्वाः स्वयं मोक्षावलम्बिनाम् । सन्दिग्धा सिद्धिरन्येषां स्वार्थभ्रंशस्तु निश्चितः ।। १६८।।

**रूपातीतध्यानम्**

लोकाग्रस्थं परात्मानममूर्तं क्लेशवर्जितम् । चिदानन्दमयं सिद्धमनन्तानन्दगं स्मरेत् ।। १६९ ।।

यस्यात्र ध्यानमात्रेण क्षीयन्ते जन्ममृत्यवः । उत्पद्यते च विज्ञानं स ध्येयो नित्यमात्मना ।। १७० ।।

तत्स्वरूपाहितं स्वान्तं तद्गुणग्रामरञ्जितम् । योजयत्यात्मनात्मानं स्वस्मिन् तद्रूपसिद्धये ।। १७१ ।।

इत्यजस्रं स्मरन् योगी तत्स्वरूपावलम्बितः । तन्मयत्वमवाप्नोति ग्राह्यग्राहकवर्जितः ।। १७२ ।।

अनन्यशरणीभूय स तस्मिन् लीयते तथा । ध्यातृध्यानोभयाभावे ध्येयेनैक्यं यथा व्रजेत् ।। १७३ ।।

यः परात्मा परं सोऽहं योऽहं स परमेश्वरः । मदन्यो न मयोपास्य, मदन्येन च नाप्यहम् ।। १७४ ।।

**मनसः शिक्षा**

अन्तःकरणाकर्णय स्वात्माधीशं विहाय मान्यत्वम् । ध्याने वस्त्ववतारय यतस्तदन्यश्च बन्धकरम् ।। १७५ ।।

स्वबोधादपरं किञ्चिन्न स्वान्ते क्रियते परम् । कुर्यात् कार्यवशात् किञ्चित् वाग्कायाभ्यामनादृतः ।। १७६।।

**धर्मध्यानोपसंहारः**

एवं चतुर्विधध्यानामृतमग्नं मुनेर्मनः । साक्षात्कृतजगत्तत्त्वं विधते शुद्धिमात्मनः ।। १७७ ।।

**अनुप्रेक्षा**

ध्यानोपरतोऽपि मुनिर्विविधानित्यादिभावचिन्तनतः। योऽनुप्रेक्षां धत्ते इति शश्वत् सोऽतुलो ध्यानी ।। १७८।।

अनुप्रेक्षाऽत्र धर्मस्य स्याद्यतो हि निबन्धनम् । चित्तं ततः स्थिरीकृत्य तासां रूपं निरूपयेत् ।। १७९।।

**हितवाक्यम्**

प्राणघात्युपसर्गेऽपि धन्यैर्ध्यानं न चालितम् । निर्बाधेष्वपि योगेषु सत्सु धत्से न किं स्थिरम् ।। १८०।।

स्वाक्षार्थस्य रतिं च दोषं विहाय यत्किञ्चन वस्तुजातम् । ..... मनोध सर्वं भवतीह तद्धि ।। १८१ ।।

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

**शुभध्यानी**

रम्यरामादिरूपादीन् कामार्थानपि चिन्तयन् । रूद्धस्वाक्षार्थरागादिः शुभध्यानी ह्यसावपि ।। १८२ ।।

**निर्दोषविषयसेवनम्**

यद्यात्तानीन्द्रियाण्यङ्गिन् त्वया तद्विषयान् विना । तानि तिष्ठन्ति नो त्वं तत् निर्दोषान् विषयान् भज।।१८३।।

**सिद्धिसाधनम्**

विना खान्यत्र नो जीवो विना जीवं न खान्यपि । पञ्चाक्षविषयैः पूत्यैर्विना सिद्धिर्न साध्यते ।। १८४।।

**विरागी**

अन्तःकरणनिःसङ्गी बहिःसङ्गीव चेष्टते । छायावत् निर्विकल्पोऽसौ कर्मणा नोपलिप्यते ।। १८५ ।।

**'अमना भव'**

बहिःसंसारदेहाक्षस्थित्या गत्या विनाङ्गिनः । न किञ्चिञ्चलतीति त्वं मत्वाताममना भज ।। १८६ ।।

**ध्यानदशा**

आत्मन! सिद्धात्मलग्नोऽहं यदा स्यां भोस्तदा त्वया ।
न गन्तव्यमितीच्छामि गन्तव्यं चेतदैव वा ।। १८७ ।।

**फलम्**

इति ते ध्यानसमीपे याचे मे मा भवन्तु व्याधिरुजः । अन्ते मरणसमाधिः शुभगतिर्भवतु परलोके ।। १८८ ।।

**लेश्या**

पीता पद्मा च शुक्ला च लेश्यात्रयमिति स्मृतम् । धर्मस्य क्रमशः शुद्धं कैश्चिच्छुक्लैव केवला ।। १८९।।

**स्थिति-भाव-लेश्याः**

धर्मध्यानस्य विज्ञेया स्थितिश्चान्तर्मुहूर्तिकी । क्षायोपशमिको भावो लेश्या शुक्लैव केवला ।। १९० ।।

**लिङ्गानि**

अर्हदादिगुणीशानां नतिं भक्तिं स्तुतिं स्मृतिम् । धर्मानुष्ठानदानादि कुर्वन् धर्मीति लिङ्गतः ।। १९१ ।।

अस्मिन्नितान्तवैराग्यव्यतिषङ्गतरङ्गिते । जायते देहिनां सौख्यं स्वसंवेद्यमतीन्द्रियम् ।। १९२ ।।

**फलम्**

त्यक्तसङ्गास्तनुं त्यक्त्वा धर्मध्यानेन योगिनः । ग्रैवेयकादिस्वर्गेषु भवन्ति त्रिदशोत्तमाः ।। १९३ ।।

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

**शुक्लध्यानस्वामी**

शुक्लं चतुर्विधं ध्यानं तत्राद्ये द्वे च शुक्लके । छद्मस्थयोगिनां ज्ञेये द्वे चान्त्ये सर्ववेदिनाम् ।। १९४ ।।

**आलम्बनम्**

श्रुतज्ञानार्थसम्बन्धात् श्रुतालम्बनपूर्वके । पूर्वेऽपरे जिनेन्द्रस्य निःशेषालम्बनच्युते: ।। १९५ ।।

**आद्ये शुक्लध्याने**

सवितर्कसविचारं पृथक्त्वं च प्रकीर्तितम् । शुक्लमाद्यं द्वितीयं च विपर्यस्तमतः परम् ।। १९६ ।।

**चरमे शुक्लध्याने**

सूक्ष्मक्रियाप्रतिपाति तृतीयं सर्ववेदिनाम् । समुच्छिन्नक्रियं ध्यानं तुर्यमार्यैः प्रवेदितम् ।। १९७ ।।

तत्र त्रियोगिनामाद्यं द्वितीयं त्वेकयोगिनाम् । सर्वज्ञः क्षीणकर्मासौ केवलज्ञानभास्करः ।। १९८ ।।

**कालम्**

अन्तर्मुहूर्तशेषायुस्तृतीयं ध्यातुमर्हति । शैलेशीकर्मतो ध्यानं समुच्छिन्नक्रियं भवेत् ।। १९९ ।।

**स्वामी**

अयोगयोगिनां तुर्यं विज्ञेयं परमात्मनाम् । तेन ते निर्मला जाताः निष्कलङ्का निरामयाः ।। २०० ।।

**उपसंहारः**

जन्मजानेकदुर्वारबन्धनव्यसनोज्झिताः । सिद्धा बुद्धाश्च मुक्ताश्च ये तेभ्यो मे नमो नमः ।। २०१ ।।

शाश्वतानन्दमुक्तेभ्यो रुपातीतेभ्य एव च । त्रैलोक्यमस्तकस्थेभ्यः सिद्धेभ्यो मे नमो नमः ।। २०२ ।।

**शुक्लाभावः**

अधुना शुक्लध्यानं यत्तच्चतुर्धापि नास्ति साधूनाम् । पूर्विककेवलिविरहात्तदगम्यं तेन ते तदगुः [जगदुः] ।। २०३ ।।

**ध्यानदीपिका**

चन्द्रार्कदीपालिमणिप्रभाभिः किं यस्य चित्तेऽस्ति तमोऽस्तबोधम् ।

तदन्तकर्त्री क्रियतां स्वचित्ते ज्ञान्यङ्गिनः ध्यानसुदीपिकेयम् ।। २०४ ।।

**इति पूज्यपाद-उपाध्यायश्रीसकलचन्द्रगणिकृता ध्यानदीपिका समाप्ता ।**

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

# परिशिष्टम्-१०

## पूज्यपादाचार्यश्रीमज्जिनचन्द्रसूरिविरचित-संवेगरङ्गशालायां चतुर्थ-समाधिलाभनाममूलद्वारे - ध्यानद्वारम् ।

**ध्यानद्वारम्**

समया परायणेण वि, असुहज्झाणं विहाय सज्झाणे । जइयव्वं खवगेणं ति, झाणदारं निदंसेमि ।। ९६२८ ।।

**शुभध्यानध्याता**

जियरागो जियदोसो, जिइंदिओ जियभओ जियकसाओ । अरइरइमोहमहणो कयभवदुममूलनिद्दहणो ।। ९६२९ ।।

अट्टं रोद्दं च दुवे, झाणाइं दुहमहानिहाणाइँ । निउणमईए समयाउ, बुज्झिऊणुज्झिऊणं च ।। ९६३०।।

धम्मं चउप्पयारं, सुक्कं पि चउव्विहं किलेसहरं । संसारभमणभीओ, झायइ झाणाइं सो दोण्णि ।। ९६३१ ।।

**दुर्ध्यानफलम्**

न परीसहेहिं संताविओ वि, झाएज्ज अट्टरोद्दाइं । सुट्ठुवहाणविसुद्धं पि, जेण एयाइं नासिंति ।। ९६३२।।

**चतुष्प्रकारमार्त्तम्**

अमणुन्नसंपयोगे, मणुन्नविगमम्मि वाहिविहुरत्ते । परइड्ढिपत्थणम्मि य, अट्टं चउहा जिणा बेंति ।। ९६३३।।

**चतुष्प्रकारं रौद्रम्**

हिंसाऽलियचोरिक्काऽणुबंधिं सारक्खणाऽणुबंधिं च । तिव्वकसायरउद्दं, रुद्दं पि चउव्विहं अहवा ।। ९६३४।।

**ध्यानचतुष्कस्वरूपम्**

"कामाऽणुरंजियं अट्टं, रोद्दं हिंसाऽणुरंजियं । धम्माऽणुरंजियं धम्मं, सुक्कं झाणं निरंजणं" ।। ९६३५।।

**आर्त्तरौद्रज्ञाता क्षपकसाधुः**

अट्टे चउप्पयारे रुद्दम्मि चउव्विहम्मि जे भेया । ते सव्वे परिजाणइ, संथारगओ खवगसाहू ।। ९६३६।।

**धर्मध्यानभावना**

तो भावणाहिं भाविय-चित्तो झाएइ धम्मवरझाणं । चउहा वि नाणदंसण-चरित्तवेरग्गरूवाहिं ।। ९६३७।।

**ध्यातव्यानि**

पढमं आणाविचयं, विपाकविचयं अवायविचयं च । संठाणविचयमेवं, धम्मज्झाणे झियाइ मुणी ।। ९६३८ ।।

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

### आज्ञाविचयस्वरूपम्

पउणमऽणवज्जमऽणुवम-मऽणाइनिहणं महत्थमऽवहत्थं । हियमऽजियमऽवितह-मऽविरोहमऽमोहमोहहरं ।। ९६३९ ।।

गंभीरजुत्तिगरुयं, सुइसुहयमऽवाहयं महाविसयं।
निउणं जिणाणमाऽऽणं, चिंतेइ अचिंतमाहप्पं [दारं] ।। ९६४० ।।

### अपायविचयम्

इंदियविसयकसाया-ऽऽसवाऽऽइकिरियासु वट्टमाणाणं ।
नरयाऽऽइभवाऽऽवासे, विविहाऽवाए विचिंतेज्जा [दारं] ।। ९६४१ ।।

### विपाकविचयम्

मिच्छत्ताऽऽइनिमित्तं, सुहाऽसुहं पयइठिइपएसाइं ।
कम्मविवागं चिंतेइ, तिव्वमंदाऽणुभावं सो [दारं] ।। ९६४२ ।।

### संस्थानविचयम्

पंचऽत्थिकायमइयं, लोगमऽणाइनिहणं जिणक्खायं । तिविहमऽहोलोगाई, दीवसमुद्दाइ चिंतेइ ।। ९६४३ ।।

### भावना

होइ य झाणविरमे, निच्चमऽणिच्चाइभावणाऽणुगओ ।
ताओ य सुविहियाणं, पवयणविहिणा पसिद्धाओ ।। ९६४४ ।।

### शुक्लध्यानम्

एयं समइक्कंतो, धम्मज्झाणं जया भवइ खवओ । तत्तो झायइ सुक्कं, चउभेयं सुद्धलेसागो ।। ९६४५।।

### आद्ये शुक्लध्याने

बिंति पुहत्तवियक्कं, सवियारं जिणवरा पढमसुक्कं । बीयं सुक्कज्झाणं, एगत्तवियक्कमवियारं ।। ९६४६ ।।

### चरिमे शुक्लध्याने

सुहुमकिरियानियट्टिं,सुक्कज्झाणं भणंति तइयं तु । वोच्छिन्नकिरियमऽप्पडि-वाइक्कं खु चउत्थं पि ।। ९६४७।।

### विस्तार-वितर्कस्वरूपम्

पिहु वित्थरो त्ति भण्णइ, वित्थयभावो भवे पुहत्तं ति । वित्थरओ तक्कयई, चिंतयइ तो वियक्कं ति ।। ९६४८ ।।

किह वित्थओ भण्णइ, परमाणुजियाइएगदव्वंमि । उप्पायट्ठिइभंगा, मुत्ताऽमुत्ताइपज्जाया ।। ९६४९।।

### वितर्कव्याख्या

तेसिं जं अणुसरणं, नयभेएहिं बहुप्पयारेहिं । होइ वियक्को त्ति सुयं, तो पुव्वसुयाऽणुसारेणं ।। ९६५०।।

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

### विचारस्वरूपम्

विचरण होइ विचारो, गमणं अन्नोन्नपज्जवेसुं तु । संकमणं अत्थवंजण, को अत्थो वंजणं किं वा ।। ९६५१ ।।

### अर्थ-व्यञ्जनस्वरूपम्

दव्वं तु होइ अत्थो, वंजण होअक्खरं तु नामं च । जोगो य मणाईओ, अंतरभेएसु एएसु ।। ९६५२ ।।

### सविचारम्

जं संचरणऽन्नोन्ने, सो नियमा भण्णए वियारो त्ति । सह तेण वियारेणं, तो सवियारं पढमसुक्कं ।। ९६५३ ।।

### एकत्ववितर्काविचारम्

अहुणेगत्तवियक्कं, एगत्तं नाम एगपज्जाये । उप्पायठिईभंगाऽऽइ-याणं जं होइ एगयरे ।। ९६५४ ।।

होइ वियक्कं ति सुयं, पुव्वगयं तेण तं वियक्कं ति । न वि धरइ जमऽण्णन्ने, वंजणअत्थे व जोगे वा ।। ९६५५ ।।

तो भन्नइ अवियारं, निक्कंपं तं निवायदीवो व्व । बियसुक्कमेव भणियं, एगत्तवियक्कमऽवियारं ।। ९६५६।।

### चरमे शुक्लध्याने

सुहुमम्मि कायजोगे, केवलिणो होइ सुहुमकिरियं तु । अकिरियमऽप्पडिवाई, सेलेसीए चउत्थमिणं ।। ९६५७ ।।

### आयुधस्थानीयशुक्लध्यानम्

एयं कसायजुज्झम्मि, होइ खवगस्स आउहं झाणं ।
झाणविहुणो ण जिणइ, जुज्झं व निराऽऽउहो सुहडो ।। ९६५८ ।।

### क्षपक-निर्यामकौ

इय झायंतो खवओ, जइया वोत्तुमऽसमत्थओ होइ । तइय निज्जवगाणं, साऽभिप्पायप्पयडणत्थं ।। ९६५९।।

हुंकारंऽजलिभमुहंऽगुलीहिं, अच्छीविकूणणेणं वा । सिरचालणपमुहेहि य, लिंगेहि निदंसइ सण्णं ।। ९६६०।।

तो पडियरगा खवगस्स, देंति आराहणाए उवयोगं । जाणंति सुयरहस्सा, कयसन्ना तस्स माणसियं ।। ९६६१ ।।

### गुणश्रेण्यामारोहणम्

इय समभावमुवगओ, तह झायंतो पसत्थयं झाणं । लेसाहिं विसुज्झंतो, गुणसेढिं सो समारुहइ ।। ९६६२ ।।

इय धम्मसत्थमत्थयमणीए, संवेगरंगसालाए । चउमूलद्दाराए, सोग्गइगमपउणपयवीए ।। ९६६३ ।।

### ध्यानद्वारम्

आराहणाए पडिदार-नवगमइए समाहिलाभम्मि । भणियं चउत्थदारे, छट्ठं झाणं ति पडिदारं ।। ९६६४।।

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

# परिशिष्टम्-११

## पूज्यपाद-उपाध्यायश्रीविनयविजयगणिविरचिते-
## लोकप्रकाशे सर्ग-३० मध्ये ध्यानस्वरूपम् ।

त्यक्तार्त्तरौद्रध्यानास्ते धर्मध्यानसमाहिताः । ध्यानं ध्यातुं प्रवर्त्तन्ते शुक्लं कर्मेन्धनानलम् ।। ४१० ।।

**ध्यानं** नाम मनःस्थैर्यं यावदन्तर्मुहूर्त्तकम् । आर्त्तं रौद्रं तथा धर्म्यं शुक्लं चेति चतुर्विधम् ।। ४११।।

तथोक्तं **स्थानाङ्गवृत्तौ-**

"अंतोमुहुत्तमेत्तं चित्तावत्थाणमेगवत्थुंमि ।
छउमत्थाणं **झाणं** जोगनिरोहो जिणाणं तु ।। ४१२ ।।" [ध्या. श. ३]

योगास्तत्रौदारिकादि-देहसंयोगसम्भवाः । आत्मवीर्यपरीणाम-विशेषाः कथितास्त्रिधा ।। ४१३ ।।

**इत्यावश्यकहारिभद्र्यां ध्यानशतकवृत्तौ,**

मुहूर्त्ताद्यत्परं चित्ता-वस्थानमेकवस्तुनि । सा चिन्तेत्युच्यते प्राज्ञै-र्यद्वा ध्यानान्तरं भवेत् ।। ४१४।।

तथोक्तं-

"अंतोमुहुत्तपरओ चिंता झाणंतरं व होज्जाहि ।
सुचिरंपि होज्ज बहुवत्थु-संकमे झाणसंताणो ।। ४१५ ।।" [ध्या. श. ४]

तत्रेह न ध्यानादन्यद्ध्यानान्तरं गृह्यते, किं तर्हि ? भावनाऽनुप्रेक्षात्मकं चेत इति। बहूनि च तानि वस्तूनि च बहुवस्तूनि आत्मगतपरगतानि मनःप्रभृतीनि, तेषु संक्रमः सञ्चरणमिति **हारिभद्र्याम्** ।।

गाढमालम्बने लग्नं चित्तं ध्यानं निरेजनम् । यत्तु चित्तं चलं मूढ-मव्यक्तं तन्मनो मतम् ।। ४१६।।

अव्यक्तानां मूर्छितानां मत्तानां स्वापमीयुषाम् । सद्योजातार्भकाणां चा-ऽव्यक्तं मूढं भवेन्मनः ।। ४१७ ।।

एवं ध्यानं ध्रुवं चित्तं चित्तं ध्यानं न निश्चयात् । खदिरो वृक्ष एव स्यात् स चान्यो वा तरुः पुनः ।। ४१८।।

यन्मानसः परीणामः केवलो ध्यानमिष्यत । तन्मिथ्या यज्जिनैस्त्रैधे-ष्वपि योगेषु तत्स्मृतम् ।। ४१९।।

नन्वङ्गमनसोः स्थैर्या-पादनात्सम्भवेद् द्विधा । ध्यानं कथं तृतीयं तु वाचिकं सम्भवेदिह ।। ४२० ।।

अत्रोच्यते—

यथा मानसिकं ध्यान-मेकाग्रं निश्चलं मनः । यथा च कायिकं ध्यानं स्थिरः कायो निरेजनः ।। ४२१।।

तथा यतनया भाषां भाषमाणस्य शोभनाम् । दुष्टां वर्जयतो ध्यानं वाचिकं कथितं जिनैः ।। ४२२ ।।

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

तथाहुः—

"एवंविहा गिरा मे वत्तव्वा एरिसा न वत्तव्वा । इय वेयालिअवक्कस्स भासओ वाइगं झाणं ।। ४२३ ।।"

मनोवचःकाययोगा-न्नयन्नेकाग्रतां मुनिः । वर्त्तते त्रिविधे ध्याने गणयन् भङ्गिकश्रुतम् ।। ४२४ ।।

त्रैधेष्वपीति योगेषु ध्यानत्वे किल निश्चिते । मुख्येनैकतमेनैव व्यपदेशः स्फुटो भवेत् ।। ४२५ ।।

यथा सत्स्वपि दोषेषु वातपित्तकफात्मसु । यदा भवेदुत्कटो यः कुपितः स तदोच्यते ।। ४२६ ।।

यथा गच्छन् राजमार्गे नृपतिस्सपरिच्छदः । गच्छत्ययं नृप इति मुख्यत्वाद्व्यपदिश्यते ।। ४२७ ।।

तथा चित्तस्य मुख्यत्वा-द्ध्यानं चित्तोत्थमुच्यते । वाक्काययोस्त्वमुख्यत्वा-त्तद्ध्यानं नोच्यते पृथक् ।। ४२८ ।।

ज्ञातविश्वस्वभावस्य निस्सङ्गस्य महात्मनः । निर्ममस्य विरक्तस्य भवेद्ध्याने स्थिरं मनः ।। ४२९ ।।

नित्यं यतीनां युवती-पशुक्लीबादिवर्जितम् । विजनं शस्यते स्थानं ध्यानकाले विशेषतः ।। ४३० ।।

महात्मनां हि शमिनां ध्याननिश्चलचेतसां । न विशेषो जनाकीर्णे पुरे वा निर्जने वने ।। ४३१ ।।

ततो वाक्कायमनसां समाधिर्यत्र जायते । भूतोपघातहीनोऽसौ देशः स्याद् ध्यायतो मुनेः ।। ४३२ ।।

यत्र योगसमाधान-मुत्तमं लभते मुनिः । स ध्यानकालो दिवस-निशादिनियमस्तु न ।। ४३३ ।।

ध्यानस्थैर्यं प्रजायेतासनाद्यवस्थया यया । स्थितो निषण्णः सुप्तो वा ध्यायेत्तस्यामवस्थितः ।। ४३४ ।।

यद्देशकालचेष्टास्व-वस्थासु निखिलासु च । मुनीश्वराः शिवं प्राप्ताः क्षपिताशेषकल्मषाः ।। ४३५ ।।

तद्देशकालचेष्टानां ध्याने कोऽपि न निश्चयः । यथा योगसमाधिः स्या-द्यतितव्यं तथा बुधैः ।। ४३६ ।।

अत्रार्त्तरौद्रे दुर्ध्याने स्मृते दुर्गतिदायिनी । शुभध्याने पुनर्धर्म्य-शुक्ले स्वःशिवदायिनी ।। ४३७ ।।

एषां स्वरूपं यथा—

तत्रार्त्तस्य पीडितस्य रोगा किञ्चनतादिभिः । लोभादिभिर्वा यद्ध्यानं तदार्त्तं स्याच्चतुर्विधम् ।। ४३८ ।।

शब्दादीनामनिष्टानां सम्बन्धे सति देहिनः । ध्यानं यत्तद्वियोगस्य तदार्त्तं प्रथमं भवेत् ।। ४३९ ।।

अभीष्टानां च लब्धानां शब्दादीनां निरन्तरम् । अविच्छेदस्य या चिन्ता तद् द्वितीयं प्रकीर्त्तितम् ।। ४४० ।।

आतङ्के सति तस्योप-शान्तेश्चिन्ता तृतीयकम् । भुक्तानां कामभोगानां स्मरणे स्यात्तुरीयकम् ।। ४४१ ।।

अन्ये त्वाहुश्चक्रिविष्णु-सुरशक्रादिसम्पदाम् । आशंसया निदानस्य चिन्तने तत्तुरीयकम् ।। ४४२ ।।

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

तथाहुः-

"देविंदचक्कवट्टि-त्तणाइ गुणरिद्धिपत्थणामइयं ।
अहमं नियाणचिंत्तण-मण्णाणुगयमञ्चंत्तं ति" ।। ४४३।। [ध्या. श. ९]

क्रन्दनं शोचनं चाश्रु-मोचनं परिदेवनम् । आर्त्तध्यानस्य चत्वारि लक्षणान्याहुरार्हताः ।। ४४४ ।।

तत्र-क्रन्दनं स्याद्विरवणं शोचनं दीनता मता । स्पष्टं तृतीयं तत्क्लिष्ट-वाक्याढ्यं परिदेवनम् ।। ४४५।।

आत्मवर्त्तित्वादलक्ष्यमप्येभिर्लक्षणैरदः । लक्ष्यते इत्यमून्याहु-र्लक्षणान्यस्य धीधनाः ।। ४४६ ।।

हिंसामृषाद्यतिक्रूरा-ध्यवसायात्मकं भवेत् । परप्रद्वेषजं रौद्र-ध्यानं तच्च चतुर्विधम् ।। ४४७ ।।

हिंसा १ मृषा २ स्तैन्य ३ संर-क्षणा ४ नुबन्धिभेदतः । तत्राद्यं प्राणीनां दाह-वधबन्धादिचिन्तनम् ।। ४४८ ।।

पैशून्यासभ्यवितथ-वचसां परिचिन्तनम् । अन्येषां द्रोहबुद्ध्या य-न्मृषावादानुबन्धि तत् ।। ४४९।।

तथाहुः-

"पिसुणासब्भासब्भूअ-भूयघायाइवयणपणिहाणं ।
मायाविणोऽइसंधण-परस्स पच्छन्नपावस्स ।। ४५० ।।" [ध्या. श. २०]

परद्रव्यापहरण-चिन्तनं तीव्ररोषतः । तन्नायकोपघाताद्यै-र्भवेत्स्तैन्यानुबन्धि तत् ।। ४५१ ।।

स्वीयस्वरक्षणार्थं य-च्छङ्कमानस्य सर्वतः । परोपघाताभिप्रायः संरक्षणानुबन्धि तत् ।। ४५२ ।।

तथोक्तं—

"सद्दाइविसयसाहण-धणसंरक्खणपरायणमणिट्ठं ।
सव्वाभिसंकणपरो-वघायकलुसाउलं चित्तं ।। ४५३।।" [ध्या. श. २२]

हिंसादिषु चतुर्ष्वेषु यदेका सेवनं मुहुः । रौद्रध्यानस्य तद् ज्ञेयं प्रथमं लक्षणं बुधैः ।। ४५४ ।।

चतुर्ष्वेषु प्रवृत्तिस्तु द्वितीयं तस्य लक्षणम् । तथा कुशास्त्रसंस्कारा-त्मकादज्ञानदोषतः ।। ४५५ ।।

हिंसादिकेष्वधर्मेषु धर्मबुद्ध्या प्रवर्त्तनम् । तृतीयं लक्षणं ज्ञेयं चतुर्थं तु भवेदिदम् ।। ४५६ ।।

मरणान्तेऽपि सम्प्राप्ते हिंसादेरनिवर्तनम् । महासंक्लिष्टमनसः कालसौकरिकादिवत् ।। ४५७ ।।

श्रुतचारित्रधर्माभ्या-मनपेतं तु यद्भवेत् । तद्धर्म्यं ध्यानमुक्तं त-च्चतुर्भेदं जिनोत्तमैः ।। ४५८ ।।

आज्ञाविचयसंज्ञं स्यात् श्रुतार्थचिन्तनात्मकम् । अपायविचयं त्वाश्र-वादिभ्योऽपायचिन्तनम् ।। ४५९।।

पुण्यपापफलचिन्ता-विपाकविचयाभिधम् । संस्थानविचयं तु स्या-ल्लोकाकृत्यादिचिन्तनम् ।। ४६०।।

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

तथाहुः—

"आप्तवचनं हि प्रवचन-माज्ञाविचयस्तदर्थनिर्णयनम् १ । आश्रवविकथागौरव-परीषहाद्यैरपायस्तु २ ।।४६१।।

अशुभशुभकर्मविपाका-नुचिन्तनार्थो विपाकविचयः स्यात् ३ ।
द्रव्याक्षेत्राकृत्यनु-गमनं संस्थानविचयस्तु ४ ।। ४६२।।"

रुची आज्ञानिसर्गाभ्यां सूत्रविस्तारयो रुची । चतुर्द्धा रुचयो धर्म-ध्यानचिह्नचतुष्टयम् ।। ४६३ ।।

सूत्रव्याख्यानमाज्ञा स्या-न्निर्युक्त्यादीह तत्र या । रुचिः श्रद्धानमेषाज्ञा-रुचिरुक्ता महर्षिभिः ।। ४६४।।

विनोपदेशं या तत्त्व-श्रद्धा सा स्यान्निसर्गजा । सूत्रे श्रद्धा सूत्ररुचि-स्तद्विस्तारेंऽतिमा रुचिः ।। ४६५।।

तथोक्तं—

"आगमउवएसाऽऽणा निसग्गओ जं जिणप्पणीयाणं ।
भावाणं सद्दहणं धम्मज्झाणस्स तं लिंगं ।। ४६६ ।।" [ध्या. श. ६७]

धर्मध्यानस्य चत्वारि भवन्त्यालम्बनान्यथ । सौधाद्यारोहणे रज्ज्वादिवद्यानि जिना जगुः ।। ४६७।।

वाचना च प्रच्छना च तथैव परिवर्त्तना । अनुप्रेक्षा चेत्यमूषां स्वरूपमपि कीर्त्त्यते ।। ४६८ ।।

निर्जरार्थं विनेयानां सूत्रदानादिवाचना । सूत्रादौ शङ्किते प्रश्नो गुरूणां प्रच्छना मता ।। ४६९ ।।

पूर्वाधीतस्य सूत्रादे-रविस्मरणहेतवे । निर्जरार्थं च योऽभ्यासः स भवेत्परिवर्त्तना ।। ४७० ।।

सूत्रार्थानुस्मरणं चानुप्रेक्षेत्यभिधीयते । धर्मध्याने चतस्रोऽनुप्रेक्षाः प्रोक्ता इमाः पराः ।। ४७१ ।।

अन्विति ध्यानतः पश्चात् प्रेक्षा त्वालोचनं हृदि । अनुप्रेक्षा स्यादसौ चाश्रयभेदात् चतुर्विधा ।। ४७२।।

एकत्वानित्यत्वा-शरणत्वानां भवस्वरूपस्य । चिन्ता धर्मध्याना-नुप्रेक्षाः स्युः क्रमादेताः ।। ४७३।।

एकोऽहं नास्ति मे कश्चिन्नाहमन्यस्य कस्यचित् । न तं पश्यामि यस्याहं नासौ भवति यो मम ।। ४७४।।

**इत्येकत्वानुप्रेक्षा।**

कायः सन्निहितापायः सम्पदः पदमापदाम् । समागमाः स्वप्नसमाः सर्वमुत्पादि भङ्गुरम् ।। ४७५।।

**इत्यनित्यत्वानुप्रेक्षा ।**

जन्मजरामरणभयै-रभिद्रुते व्याधिवेदनाग्रस्ते । जिनवरवचनादन्यत्र चास्ति शरणं क्वचिल्लोके ।। ४७६।।

**इत्यशरणानुप्रेक्षा ।**

माता भूत्वा दुहिता भगिनी भार्या च भवति संसारे ।
व्रजति सुतः पितृतां भ्रा-तृतां पुनः शत्रुतां चैव ।। ४७७ ।।

गर्भोत्पत्तौ महादुःखं महादुःखं च जन्मनि । मरणे च महादुःखमिति दुःखमयो भवः ।। ४७८ ।।

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

**इति संसारानुप्रेक्षा ।**

शोधयत्यष्टधा कर्म-मलं शुक्लमिति स्मृतम् । शुचं वा क्लमयतीति शुक्लं तच्च चतुर्विधम् ।। ४७९।।

सविचारं स्यात्पृथक्त्व-वितर्काख्यमिहादिमम् । तथैकत्ववितर्काख्य-मविचारं द्वितीयकम्।। ४८० ।।

सूक्ष्मक्रियं चानिवृत्ति शुक्लध्यानं तृतीयकम् । समुच्छिन्नक्रियं चैवा-प्रतिपाति चतुर्थकम् ।। ४८१।।

उत्पादादिपर्यवाणामेकद्रव्यविवर्तिनाम् । विस्तारेण पृथग्भेदै-वितर्को यद्विकल्पनम् ।। ४८२ ।।

नानानयानुसरणा-त्मकात्पूर्वगतश्रुतात् । यत्र ध्याने तत्पृथक्त्व-वितर्कमिति वर्णितम् ।। ४८३ ।। युग्मम् ।

अत्र च व्यञ्जनादर्थे तथार्थाद्वयञ्जनेऽसकृत् । विचारोऽस्ति विचरणं सविचारं तदीरितम् ।। ४८४।।

मनःप्रभृतियोगाना-मेकस्मादपरत्र च । विचारोऽस्ति विचरणं सविचारं ततोप्यदः ।। ४८५ ।।

एवं च–

यत्पृथक्त्ववितर्काढ्यं सविचारं भवेदिह । तत्स्यादुभयधर्माढ्यं शुक्लध्यानं किलादिमम् ।। ४८६ ।।

उक्तं च–

"उप्पायट्ठिइभंगाइपज्जयाणं जमेगदव्वंमि ।
नाणानयाणुसरणं पुव्वगयसुयाणुसारेणं ।। ४८७ ।।

सवियारमत्थवंजण-जोगंतरओ तयं पढमसुक्कं ।
होइ पुहुत्तवितक्कं सवियारमरागभावस्स ।। ४८८।।" [ध्या. श. ७७-७८]

अनेकेषां पर्यवाणा-मेकद्रव्यावलम्बिनाम् । एकस्यैव वितर्को यः पूर्वगतश्रुताश्रयः ।। ४८९ ।।

स च व्यञ्जनरूपोऽर्थ-रूपो वैकतमो भवेत् । यत्रैकत्ववितर्काख्यं तद्ध्यानमिह वर्णितम् ।। ४९०।।

न च स्याद्व्यञ्जनादर्थे तथार्थाद्व्यञ्जनेऽपि च । विचारोऽत्र तदेकत्व-वितर्कमविचारी च ।। ४९१।।

मनःप्रभृतियोगाना-मप्येकस्मात्परत्र नो । विचारोऽत्र तदेकत्व-वितर्कमविचारि च ।। ४९२ ।।

इदं ह्येकत्र पर्याये योगचाञ्चल्यवर्जितम् । चिरमुज्जृम्भते दीप्रं निवातगृहदीपवत् ।। ४९३ ।।

तथाहुः–

"जं पुण सुणिप्पकंपं निवायसरणप्पईवमिव चित्तं ।
उप्पायट्ठिइभंगा-इयाणमेगंमि पज्जाए ।। ४९४।।

अवियारमत्थवंजण-जोगंतरओ तयं बिइयसुक्कं ।
पुव्वगयसुयालंबण-मेगत्तवितक्कमवियारं ।। ४९५।।" [ध्या. श. ७९-८०]

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

क्रियोच्छ्वासादिका सूक्ष्मा ध्याने यत्रास्ति कायिकी । निवर्त्तते न यत्सूक्ष्म-क्रियं चैवानिवर्ति तत् ।। ४९६ ।।

स्याद्वर्द्धमान एवात्र परिणामः क्षणे क्षणे । न हीयमानस्तदिद-मनिवर्त्ति प्रकीर्त्तितम् ।। ४९७ ।।

तच्च निर्वाणगमन-काले केवलिनो भवेत् । रुद्धवाक्चित्तयोगस्य वपुर्योगार्द्धरोधिनः ।। ४९८ ।।

उक्तं च-

"निव्वाणगमणकाले केवलिणो दरनिरुद्धजोगस्स ।
सुहुमकिरियानियट्टिं तइयं तणुकायकिरियस्स ।। ४९९ ।।" [ध्या. श. ८१]

समुच्छिन्नाः क्रियाः कायि-क्याद्या योगनिरोधतः । यस्मिन् यच्चाप्रतिपाति तच्छुक्लध्यानमन्तिमम् ।। ५००।।

इदं त्ववस्थां शैलेशीं प्राप्तस्याखिलवेदिनः । निरुद्धाशेषयोगस्य शुक्लं परममीरितं ।। ५०१ ।।

सिद्धत्वेऽपि हि सम्प्राप्ते भवत्येतदवस्थितम् । न तु न्यूनाधिकं तेना- प्रतिपातीदमुच्यते ।। ५०२।।

इयं हि परमा कोटिः शुक्लध्यानस्य निश्चिता । अतः परं तन्नास्तीति परमं शुक्लमुच्यते ।। ५०३ ।।

तथोक्तं-

"तस्सेव य सेलेसीगयस्स सेलोव्व निप्पकंपस्स ।
वोच्छिन्नकिरियमप्पडिवाइ ज्झाणं परमसुक्कं ।। ५०४ ।।" [ध्या. श. ८२]

योगनिरोधपद्धतिस्तु **द्रव्यलोकतो** ज्ञेयेति ।

अव्यथं चाप्यसंमोहो विवेकः स्यात्तथा परः । व्युत्सर्गश्च भवेच्छुक्ल-ध्यानचिह्नचतुष्टयम् ।। ५०५ ।।

यद्देवाद्युपसर्गेभ्यो भयं तत्कथ्यते व्यथा । तदभावोऽव्यथं शुक्ल-ध्यानलक्षणमादिमम् ।। ५०६ ।।

देवादिमायाक्लृप्तस्य सूक्ष्मार्थजनितस्य वा । सम्मोहस्येह मौढ्यस्याऽभावोऽसम्मोह इष्यते ।। ५०७।।

जीवस्य देहात्सर्वेभ्यः संयोगेभ्यश्च शुद्धया । भिन्नत्वभावनं बुद्ध्या स विवेको विवेचनात् ।। ५०८।।

यन्निःसङ्गतयाङ्गस्य परित्यागस्तथोपधेः । स व्युत्सर्गश्चतुर्थं स्या-च्छुक्लध्यानस्य लक्षणम् ।। ५०९ ।।

यदाहुः-

"चालिज्जइ बीहेइ व धीरो न परीसहोवसग्गेहिं १ ।
सुहुमेसु न संमुज्झइ भावेसु न देवमायासु २ ।। ५१० ।।

देहविवित्तं पेच्छइ अप्पाणं तह य सव्वसंजोगे ३ ।
देहोवहिवोसग्गं निस्संगो सव्वहा कुणइ ४ ।। ५११ ।।" [ध्या. श. ९१, ९२]

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

चत्वार्यलम्बनानि स्युः शुक्लध्यानस्य च क्रमात् । कषायाणां क्षयात् क्षान्ति-मार्द्दवार्जवमुक्तयः ।। ५१२।।

आत्मनोऽनन्तवर्तित्वा-नुप्रेक्षा प्रथमा भवेत् १ । तथा विपरिणामानु-प्रेक्षा प्रोक्ता द्वितीयिका २ ।। ५१३।।

अनुप्रेक्षाऽशुभत्वस्या ३-पायानां ४ चेति नामतः। शुक्लध्याने चतस्रोऽनु-प्रेक्षाः प्रेक्षाश्रयैः स्मृताः ।।५१४।।
अनन्तकालं भ्रमतो जीवस्य भवसागरे । भावनानन्तवर्त्तित्वा-नुप्रेक्षा परिकीर्त्तिता ।। ५१५ ।।

सा चैवं-

"एसो अणाइनिहणो संसारे सागरुव्वदुत्तारे । नारयतिरिअनरामर-भवेसु परिहिंडए जीवो ।। ५१६।।"

विविधा ये परीणामा वस्तूनां तद्विभावना । भवेद्विपरिणामानु-प्रेक्षा प्रेक्षावतां प्रिया२।। ५१७ ।।

तथाहि-

"सव्वट्ठाणाइं असासयाइं इह चेव देवलोगे य । सुरअसुरनराईणं रिद्धिविसेसा सुहाइं च ।। ५१८।।"

क्षणभंगुरसंपत्ते-र्विरूपस्य भवस्य यत् । विभावनाऽशुभत्वानुप्रेक्षा सा परिकीर्त्तिता ।। ५१९ ।।

तथाहि-

"धि द्धी संसारो जंमि जुआणो परमरूवगव्वियओ ।
मरिऊण जायइ किमी तत्थेव कलेवरे नियए ।। ५२० ।।"

कषायेभ्योऽथाश्रवेभ्यः प्रमादविषयादितः । अपायभावनापाया-नुप्रेक्षा सा प्रकीर्त्तिता ।। ५२१ ।।

यथा-

"कोहो य माणो य अणिग्गहीया माया य लोहो य पवड्ढमाणा ।
चतारि एए कसिणा कसाया सिचंति मूलाइं पुणब्भवस्स ।। ५२२ ।।" [दशवैका. ८/४०] इत्यादि ।

**इदं चार्थतः प्रायस्तृतीयाङ्गगतम् ।**

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

# परिशिष्टम्-१२

## पूज्यपाद-महोपाध्यायश्रीमानविजयगणिकृतधर्मसंग्रहे, अधिकार-३, गा. ९८ वृत्तौ ध्यानस्वरूपम् ।

ध्यातिर्ध्यानं - स्थिराध्यवसानम्, मनस एकाग्रावलम्बनमित्यर्थः, कालतोऽन्तर्मुहूर्त्तमानम्, तच्चतुर्द्धा - तत्रार्त्तं - विषयानुरञ्जितम्, रौद्रं - हिंसाद्यनुरञ्जितम्, धर्मात्- क्षान्त्यादिदशविधादनपेतं धर्म्यम् जिनवचनार्थनिर्णयात्मकमित्यर्थः, शोकं क्लमयतीति निरुक्तात् शुक्लं-नीरञ्जनम्।

**तत्रार्त्तं** चतुर्द्धा - १-अमनोज्ञानां शब्दादिविषयाणां तदाधारवस्तूनां च रासभादीनां सम्प्रयोगे तद्विप्रयोगचिन्तनम् सम्प्रयोगे प्रार्थना च प्रथमम्, २-शूलादिरोगसम्भवे तद्विप्रयोगप्रणिधानम्, तद्विप्रयोगसम्भवे च तदसम्प्रयोगचिन्ता च द्वितीयम्, ३-इष्टानां शब्दादीनां विषयाणां सातवेदनायाश्चावियोगाध्यवसानं संयोगाभिलाषश्च तृतीयम्, ४-चक्रवर्त्यादिविभवप्रार्थनारूपं निदानं चतुर्थम् । आर्त्तस्य १-विलाप २-साश्रुत्व ३-दैन्यभाषण ४-शीर्षादि-कुट्टनरूपाणि ४ लिङ्गानि १।

**रौद्रं** च १-सत्त्वेषु वध-वेध-बन्धन-दहना-ऽङ्कन-मारणादिप्राणिधानं हिंसानुबन्धि, २-पिशुना-सभ्या-सद्भूतघातादिवचनप्रणिधानं मृषानुबन्धि ३-क्रोध-लोभादेः परद्रव्यहरणचित्तं स्तेयानुबन्धि, ४-सर्वाभिशङ्कनपरोपघातपरायणं शब्दादिविषयसाधकद्रव्यसंरक्षणप्रणिधानं विषयसंरक्षणं चेति चतुर्विधम्, अस्य १-चोत्सन्नदोष २-बहुलदोष ३-नानाविधदोष ४-मरणदोषा लिङ्गानि २ ।

**धर्म्यम**पि १-ज्ञान-दर्शन-चारित्र-वैराग्यभावनाभिः कृताभ्यासस्य नयादिभिरतिगहनं न बुध्यते तुच्छमतिना परं 'सर्वज्ञमतं सत्यमेवे'ति चिन्तनम् आज्ञाविचयः । २-राग-द्वेष-कषाया-श्रवादिक्रियासु प्रवर्त्तमानानामिहपरलोकयोरपायान् ध्यायेदिति अपायविचयः । ३-प्रकृत्यादि४ भेदभिन्नकर्मणः स्वरूपं ध्यायेदिति विपाकविचयः । ४-जिनोक्तषड्द्रव्याणां लक्षण-संस्थाना-ऽऽसन-विधान-मानादीनां ध्यानं संस्थानविचयश्च इति चतुर्विधम्, तत्र द्रव्याणां लक्षणं - गत्यादि, संस्थानं - लोकाकाशस्येव धर्माधर्मयोः, जीवानां समचतुरस्रादि, अजीवानां परिमण्डलादि, कालस्य मनुष्यक्षेत्राकृति, तथा आसनमाधारः सर्वेषां लोकाकाशम्, विधानानि - भेदाः, मानानि - आत्मीयप्रमाणानीति, विचयश्च - चिन्तनेन परिचयः, अस्य चागमो-१ पदेशा-२ ऽऽज्ञा-३ निसर्गतो-४ यज्जिनोक्तभावश्रद्धानं तल्लिङ्गम् ३।

**शुक्लं** च - १-पृथक्त्ववितर्कसविचारम्, २-एकत्ववितर्कमविचारम्, ३-सूक्ष्मक्रियाऽनिवर्ति, ४-व्युच्छिन्न-क्रियाऽप्रतिपाति चेति चतुर्विधम् । तत्र पृथक्त्वेन - एकद्रव्याश्रितोत्पादादिपर्यायाणां भेदेन वितर्को यत्र तत् तथा, विचारः संक्रमस्तेन सहितं ससंक्रम[सविचार]मित्यर्थः, ततः कर्मधारयः, संक्रमश्चार्थव्यञ्जनयोगान्तरतः, तत्रार्थो द्रव्यं तस्माद्व्यञ्जने शब्दे ततश्चार्थे इति, एवं योगेष्वपि त्रिषु संक्रमः। एवमेकत्ववितर्कमविचारं - पर्यायाणामभेदेन वितर्को व्यञ्जनरूपोऽर्थरूपो वा यस्य तत्तथा अविचारं चान्यतरस्मिन्नेकयोगे वर्त्तमानम्, संक्रमाभावात्,

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

इमौ भेदौ पूर्वविदः, तृतीयं तु मनोवाग्योगद्वये निरुद्धे सत्यर्द्धनिरुद्धकाययोगस्य भवति सूक्ष्मक्रियमनिवर्ति च, चतुर्थं च शैलेश्यां योगाभावाद् - व्युच्छिन्नक्रियमप्रतिपाति चानुपरतस्वभावम्, तत्र तृतीये छद्मस्थस्य निश्चलमन इव केवलिनो निश्चलकाय एव ध्यानम्, चतुर्थे च तदभावेऽपि कुलालचक्रभ्रमणवत् पूर्वप्रयोगतो जीवोपयोगसद्भावेन भावमनसो भावाद् भवस्थस्य ध्यानम्, ध्यैशब्दोऽपि चिन्तायां कायनिरोधेऽयोगित्वे चेत्यनेकार्थात्सर्वत्राविरुद्धः, अस्य १-चावधा २-ऽसम्मोह ३- विवेक ४- व्युत्सर्गा लिङ्गानि ।

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

# परिशिष्टम्-१३

## पूज्यपादश्रीमन्नेमिसाधुविरचितश्रीप्रतिक्रमणसूत्रपदविवृत्तिगतं

## ध्यानस्वरूपम् ।

तथा ध्यातिर्ध्यानं स्थिराध्यवसानं मनएकाग्रावलम्बनमित्यर्थः, कालतोऽन्तर्मूहूर्त्तमात्रं तच्चतुर्विधमार्त्तं रौद्रं धर्म्यं शुक्लमिति । तत्र ऋतं दुःखं तत्र भवमार्त्तं क्लिष्टमित्यर्थः । हिंसाद्यतिक्रौर्यानुगतो रुद्रः तस्येदं रौद्रम् । धर्मः श्रुतचारित्रलक्षणस्तस्मादनपेतं धर्म्यम् । शोधयत्यष्टप्रकारकर्ममलं शुचं वा क्लमयतीति शुक्लम्, यत उक्तम् -

'कामाणुरञ्जियं अट्टं रोद्दं हिंसाणुरञ्जियम् ।
धम्माणुरञ्जियं धम्मं सुकज्झाणं निरञ्जणम् ।।१।।

तत्र **चार्त्तं** चतुर्विधमेकं तावदमनोज्ञशब्दादिविषयसंप्रयोगे सति तद्वियोगैकतानो मनोनिरोधस्त-दसंप्रयोगानुस्मरणं चेति १ ।

द्वितीयमसद्वेदनीयं तत्प्रतीकारानुकूलमनसस्तथैव वियोगचिन्तनादिरूपम् २,

तृतीयं मनोज्ञविषयसंप्रयोगे तदविप्रयोगैकतानचित्तता ३,

चतुर्थं तु चक्रवर्त्यादिसमृद्धिदर्शनान्ममाप्यमुष्य तपसः फलमेवंविधमन्यजन्मनि स्यादिति चित्तनिरोधः ४ ।

**रौद्रम**पि चतुर्द्धा, तत्राद्यं गलकूटपाशयन्त्रादिप्राणिवधोपायचिन्तनैकतानश्चित्तनिरोधः १,

द्वितीयं कूटसाक्षित्वादिपरवञ्चनोपायैरनृतानुबन्धि २,

तृतीयं परद्रव्यापहारोपायैः स्तेयानुबन्धि ३,

चतुर्थं धनधान्यादिविषयसंरक्षणैकतानं मनोऽहर्निशमिति ४ ।

**धर्म्यम**पि चतुर्विधम्, तत्र प्रथममाज्ञाविचयाख्यं सर्वज्ञवचनमाज्ञा तदर्थनिर्णयनरूपम् १,

द्वितीयमपायविचयाख्यं दुष्टमनोवाक्काययोगादेर्जन्तोरपायबहुलताचिन्तनरूपम् २,

तृतीयं विपाकविचयाख्यमशुभशुभकर्मविपाकानुचिन्तनरूपम् ३,

चतुर्थं संस्थानविचयाख्यं जीवपुद्गलक्षेत्रसंस्थानविचिन्तनरूपमिति ४ ।

**शुक्लम**पि चतुर्विधं तद्यथा-प्रथमं पृथक्त्ववितर्कसविचारं पृथक्त्वेन भेदेन विस्तीर्णभावेनान्ये, वितर्कः - श्रुतं यस्मिन् तत्तथा, सह विचारेण वर्त्तत इति सविचारम्, विचारोऽर्थव्यञ्जनयोगसंक्रमणलक्षणोऽर्थो द्रव्यं व्यञ्जनं शब्दो योगो मनःप्रभृतिरेतद्भेदेन सविचारमर्थाद्व्यञ्जनं व्यञ्जनादर्थं संक्रामयतीति विभाषा १ ।

द्वितीयमेकत्ववितर्कमविचारमेकत्वेनाभेदेन वितर्को व्यञ्जनरूपोऽर्थरूपो वा यस्य तत्तथा । इदं च पूर्वगतश्रुतानुसारेणैव भवति, अविचारमसंक्रमं कुर्वतोऽर्थव्यञ्जनयोगान्तरत इति । उत्पादस्थितिभङ्गान्यतमैकपर्याये

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

निर्वातगृहप्रदीपवत् सुनिष्प्रकम्पचितं केवलज्ञानोत्पादकं ध्यानमिति २ ।

तृतीयं सूक्ष्मक्रियमनिवृत्ति तत्र सूक्ष्मा तन्वी उच्छ्वासनिःश्वासादिलक्षणा कायक्रिया तत्तथा निवर्त्तितुं शीलमस्येति निवर्त्ति प्रवर्द्धमानशुभपरिणामात्र निवर्त्त्यनिवर्त्ति तच्च मोक्षगमनप्रत्यासन्नसमये केवलिनो मनोवाग्योगद्वये निरुद्धे सत्यर्द्धनिरुद्धकाययोगस्य भवति ३ ।

चतुर्थं व्युपरतक्रियमनिवर्त्ति, व्युपरता - व्यवच्छिन्ना योगाभावात् क्रिया यत्र तत्तथा अनिवर्त्ति अप्रतिपाति तच्च शैलेशवत् निष्प्रकम्पस्य शैलेशावस्थायां भवतीति ४ ।

अत्र च ध्यानचतुष्टयेऽप्यश्रद्धानादिनाऽतिचारसम्भव इति ।

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

# परिशिष्टम्-१४

## अनेकभव्योपकारिग्रन्थनिर्मातृश्रीदेवेन्द्रसूरीश्वरसंदृब्धे स्वोपज्ञवृत्तियुक्ते श्राद्धदिनकृत्यसूत्रे षोडशसंवरणद्वारे

### ध्यानस्वरूपम् ।

**४५, ध्यानम्-** xxx

अट्टं रूद्दं धम्मं सुक्कं झाणं चउव्विहेक्केकं ।
अमणुन्नविसयसंगे विओगचिंता पढममट्टं ।।३०७।।

वियणाए वियोगिच्छा मणुन्नविसयावियोगकंखा य ।
इंदत्तणादिपत्थणमिय **चउहा अट्टझाणं** तु ।।३०८।।

वहबंधणाइचिंता पिसुणासब्भूयवयणपणिहाणं ।
चिंता तेन्ने धणरक्खणे य **रूद्दं** तु इइ **चउहा** ।।३०९।।

आणाविचओ सुनिउणगुणाइसंजुयजिणिंदआणाए ।
चिंतणमवायविचओ तह आसवगारवाईणं ।।३१०।।

असुहकम्मचिंता विवागविचओ य तहय लोगस्स ।
संठिइचिंता संठाणविचय इइ **चउह धम्मं** तु ।।३११।।

झायइ जं सुविचारं जोगे जोगेसु वंजणत्थं वा ।
तं तु पुहुत्तवियक्कं पढमं सुक्कं सरागसस्स ।।३१२।।

मणवयणकायजोगे अत्थंमि य वंजणे य अवियारं ।
एगत्तवियक्कक्खं बीयं सुक्कं विरागस्स ।।३१३।।

निव्वाणगमणकाले केवलिणो दरनिरूद्धजोगस्स ।
सुहुमकिरियानियट्टी तइयं तणुकायकिरियस्स ।।३१४।।

तस्सेव य सेलेसीगयस्स सेलोव्व निप्पकंपस्स ।
वोच्छिन्नकिरियमप्पडिवाइं झाणं **परमसुक्कं** ।।३१५।।

भवहेउ अट्टरूद्दाणि मोक्खहेऊणि धम्मसुक्काणि ।
झाणं अंतमुहुत्तं तो झाणंतरमहव चिंता ।।३१६।।

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

# परिशिष्टम्-१५A

## खरतरगच्छीयश्रीजिनलाभसूरिगुम्फिते आत्मप्रबोधग्रन्थे तृतीयप्रकाशे ध्यानस्वरूपम् ।

तथा ध्यानम् अन्तर्मुहूर्त्तमात्रकालमेकाग्रचित्ताध्यवसायम्, तच्चतुर्धा - आर्त्त-रौद्र-धर्म-शुक्लभेदात् । तत्र ऋते-दुःखे पीडिते वा प्राणिनि भव**मार्त्तम्,** तच्चेष्टवियोगा १, ऽनिष्टसंयोग २, रोगचिन्ता ३, ऽग्रशोचविषयम् ४, १-तत्रेष्टानां शब्दरूपरसर्शगन्धलक्षणानां विषयाणां वियोगः 'कदापि मे मा भूदि'त्यादिचिन्तनमिष्टवियोगविषयम्, २-अनिष्टानां शब्दादिविषयाणां संयोगस्याप्रार्थनमनिष्टसंयोगविषयम्, ३-रोगोत्पत्तौ सत्यां बहुचिन्ताकरणं रोगचिन्ताविषयम्, ४-देवत्वचक्रवर्त्तित्वादिऋद्धिप्रार्थनप्रभृतिकमनागतकालविषयिककार्यशोचनमग्रशोचविषयम् । एतद्ध्यानं हि शोकाक्रन्दनस्वदेहताऽनादिलक्षणलक्ष्यं तिर्यग्गतिगमनकारणं च विज्ञेयम् । अस्य सम्भवस्तु षष्ठगुणस्थानं यावद् बोध्यः ।

तथा रोदयति दुर्बलान् सत्त्वानिति रुद्रः-प्राणिवधादिपरिणत आत्मा, तस्येदं कर्म **रौद्रम्,** तच्चतुर्धा १-हिंसानुबन्धि २-मृषानुबन्धि ३-चौर्यानुबन्धि ४-परिग्रहरक्षणानुबन्धि च । १-तत्राद्यं प्राणिषु वधबन्धनदहनाङ्ककरणमारणादिचिन्तनम्, २-द्वितीयं पैशुन्यासभ्यासत्यघातादिवचनचिन्तनम्, ३-तृतीयं च तीव्रकोपलोभाकुलं प्राण्युपघाततत्परं परलोकभयनिरपेक्षं परद्रव्यापहरणचिन्तनम्, ४-चतुर्थं तु सर्वजनाभिशङ्कनपरम्परोपघातपरायणं विषयसुखसाधकं द्रव्यसंरक्षणचिन्तनम्। इदं हि प्राणिवधादिलक्षणलक्ष्यं नरकगतिगमनकारणं चावसेयम् । अस्य सम्भवस्तु पञ्चमगुणस्थानं यावद् ज्ञेयः, केचित्त्वस्य चतुर्थं प्रकारं षष्ठं [गुणस्थानं] यावदपि मन्यन्ते, इति ।

तथा धर्मः क्षमादिदशविधस्तस्मादनपेतं **धर्म्यं** धर्मयुक्तमित्यर्थः, तच्चाज्ञाविचयापायाविचय-विपाकविचयसंस्थानविचयभेदाच्चतुर्विधम् । १-तत्राद्यं श्रीमतां सर्वज्ञपुरुषाणामाज्ञाया अनुचिन्तनम्, २-द्वितीयं रागद्वेषकषायेन्द्रियवशवर्त्तिनां जन्तूनां सांसारिकापायविचिन्तनम्, ३-तृतीयं ज्ञानावरणादिषु शुभाशुभकर्मविपाकसंस्मरणम्, ४-चतुर्थं च भूवलयद्वीपसमुद्रप्रभृतिवस्तूनां संस्थानादिधर्मालोचनात्मकम् । इदं ध्यानं हि जिनोक्ततत्त्वश्रद्धानादिचिह्नगम्यं देवगत्यादिफलसाधकं च ज्ञातव्यम्। एतत्सम्भवस्तु चतुर्थात्पञ्चमाद्वा गुणस्थानादारभ्य सप्तमाष्टमे यावदवगन्तव्यः । तत्र चतुर्थे आद्यौ द्वौ भेदौ पञ्चमे तु त्रय इति विशेषः ।

तथा शोधयति अष्टप्रकारं कर्ममलमिति **शुक्लम्,** तच्च पृथक्त्ववितर्कसप्रविचार-एकत्ववितर्का-प्रविचार-सूक्ष्मक्रियाऽप्रतिपाति-समुच्छिन्नक्रियाऽनिवृत्तिभेदाच्चतुर्विधम्। १-तत्र च यस्मिन् भावश्रुतानुसारेण अन्तरङ्गध्वनिरूपो वितर्कोऽर्थादर्थान्तरे, शब्दात् शब्दान्तरे, योगाद्योगान्तरे च सङ्क्रमते, पुनर्निजशुद्धात्मद्रव्याद्

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

द्रव्यान्तरं याति, गुणाद् गुणान्तरं याति, पर्यायाद्वा पर्यायान्तरं याति तत्प्रथमम्, उक्तं च -

श्रुतचिन्ता वितर्कः स्याद्विचारः सङ्क्रमो मतः ।
पृथक्त्वं स्यादनेकत्वं, भवत्येतत्त्रयात्मकम् ।।१।।

स्वशुद्धात्मनुभूत्यात्म-भावश्रुतावलम्बनात् ।
अंतर्जल्पो वितर्कः स्यात् यस्मिंस्तत्सवितर्कजम् ।।२।।

अर्थादर्थान्तरे शब्दात्, शब्दान्तरे च सङ्क्रमः ।
योगाद्योगान्तरे यत्र, सविचारं तदुच्यते ।।३।।

द्रव्याद् द्रव्यान्तरं याति, गुणाद्याति गुणान्तरम् ।
पर्यायादन्यपर्यायं, स पृथक्त्वं भवत्यतः ।।४।।

एतच्चाष्टमगुणस्थानादारभ्य एकादशं यावद्भवति । २-यत्पुनर्निश्चलस्यैकद्रव्यस्यैकपर्यायस्य वा एकगुणस्य वा शब्दात् शब्दान्तरमित्यादिसङ्क्रमणरहितं भावश्रुतावलम्बनेन चिन्तनं तद् द्वितीयम्, इदं च द्वादश एव गुणस्थाने भवति, त्रयोदशे तु ध्यानान्तरिका भवेत् । ३-ततो यत्र केवली भगवान् अचिन्त्यात्मशक्त्या बादरकाययोगे स्वभावतः स्थितिं कृत्वा बादरवचनमनोयोगयुगलं सूक्ष्मीकरोति, ततः सूक्ष्मवचनमनसोः स्थितिं कृत्वा बादरकाययोगं सूक्ष्मत्वं प्रापयति, ततः सूक्ष्मकाययोगे पुनः क्षणमात्रं स्थितिं कृत्वा सद्यः सूक्ष्मवाक्चित्तयोः सर्वथा निग्रहं कुरुते, ततः सूक्ष्मकाययोगे क्षणं स्थितिं कृत्वा सूक्ष्मक्रियं चिद्रूपं निजात्मानं स्वयमेवानुभवति, तद्योग्यशुभपरिणामप्रतिपातं च न प्राप्नोति तत्तृतीयम्, एतच्च त्रयोदशगुणस्थानस्यान्तो भवेत् । ४-ततो यत्र सूक्ष्मक्रियाया अपि समुच्छेदो भवति, अक्रियत्वयोग्यपरमविशुद्धपरिणामनिवृत्तिश्च न स्यात् तच्चतुर्थम्, इदं तु चतुर्दशे गुणस्थाने भवति, ततो जीवः सिद्धिं याति ।

एतद्ध्यानं हि अबाधाऽसम्मोहादिलिङ्गगम्यं मोक्षादिफलसाधकं च विज्ञेयम् । एषु च धर्मशुक्लध्यानद्वयमेव निर्जरार्थत्वादाभ्यन्तरतपोरूपं बोध्यम्, आर्त्तरौद्रे तु बन्धहेतुत्वान्न तथेति सुदृष्टिभिस्तयोः सर्वथा परिहार एव कार्योऽन्यथा नन्दमणिकारकण्डरीकादिवन्महादुःखावाप्तिः स्यात् । यदि पुनश्चेतोऽतिचञ्चलत्वात्कुध्यानमुपैति तथापि धीरधीभिः प्रसन्नचन्द्रादिवत्तन्निवारणे एवात्मवीर्योल्लासो विधेयः, सद्ध्यानयोस्तु अव्यवच्छेदेनाभ्यासः कार्यः ।।

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

# परिशिष्टम्-१५B

## श्रीमद् देवचन्द्रगणिवरविरचित-विचारसारप्रकरणे ध्यानस्वरूपम् ।

**सेसे मरणं इक्कं, अट्टरूद्दा य पढमपंचगुणे ।**
**अट्टतिगं धम्मचउगं, पमत्तिअपमत्ति धम्मचउ ।।६५।।**

**वृत्ति :** x x x सांप्रतं ध्यानद्वारं गुणस्थानेषूच्यते - '**अट्टरुद्दाय**'त्ति तत्र ध्यानं चतुर्धा आर्त्तध्यानं १, रुद्रध्यानं २, धर्मध्यानं ३, शुक्लध्यानं ४ चेति ।। उक्तं च - [ध्यानशतके]

जं थिरमज्झवसाणं तं झाणं जं चलं तयं चित्तं ।
तं होज्ज भावणा वा अणुपेहा वा अहव चिंता ।।२।।

अन्तर्मुहूर्त्तप्रमाणकालमेकत्र चित्तावस्थानं ध्यानं शेषं चलं तच्चित्तं अथवा भावना अथवा अनुपेक्षा अथवा चिन्तास्मृतिः ।। उक्तं च - [ध्यानशतके]

अंतोमुहुत्तमित्तं चित्तावत्थाणमेगवत्थुंमि ।
छउमत्थाणं झाणं जोगनिरोहो जिणाणं तु ।।३।।

अन्तर्मुहूर्तात् परतः चिन्ता भवति अथवा ध्यानान्तरं वा भवति पुनः बहुवस्तुसंक्रमे संतानो भवति ।। उक्तं च - [ध्यानशतके]

अंतोमुहुत्तपरओ चिंता झाणंतरं व होज्जाहि ।
सुचिरंपि होज्ज बहुवत्थुसंकमे झाणसंताणो ।।४।।

अट्टं रुद्दं धम्मं सुक्कं झाणाइ तत्थ अंताइं ।
निव्वाणसाहणाइं भवकारणमट्ट-रुद्दाइं ।।५।।

**तत्रार्त्तध्यानं** चतुर्धा अमनोज्ञानां वियोगचिन्तनरूपं प्रथमम् । अमनोज्ञा अमनोहराः शब्दादयस्तेषां वियोगचिन्तनम्, कदा एते व्रजन्ति अथवा शत्रुप्रमुखाणां संयोगे तद्वियोगचिन्तनम् कदा एतेषां क्षय इत्यादि अनिष्टसंयोगे आतुराररतिसमुद्भवे तद्वियोगचिन्तने उपयोगस्यैकाग्रयम् अभिनवोपयोगतारूपं-ध्यानं प्रथमम् मनोज्ञविषयादिसंप्रयोगचिन्तारूपं द्वितीयम्, कदा कथं वा इष्टाः शब्दादयः-मित्रादयः संदृश्यन्ते एतच्चिन्तारूपैकाग्राऽनन्योपयोगरूपं ध्यानं द्वितीयम् इष्ट वियोगचिन्तासमुद्भवम् । तथा शूलादिरोगप्रकटने तद्विगमचिन्तारूपं तृतीयम्, एते रोगा मे कथं जाताः कथं गच्छन्ति एतच्चिन्तातन्मयत्वरूपं रोगचिन्ताख्यं तृतीयम्, रोगस्याप्यनिष्टत्वेन प्रथमभेदे एवान्तर्भावस्तथापि अनिष्टाः शत्रुप्रमुखा भिन्नक्षेत्रत्वेन रोगाणां च स्वशरीरावगाहात् एकक्षेत्रेणैव भिन्नाभिधानम् । तथा चक्रवर्त्यादिविषयाणाम्-अभिलाषेण

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

तद्विषयवाञ्छानिदानकरणरूपं चतुर्थम् । एवमार्त्तध्यानं चतुष्टयभेदं संसारवर्धनं तिर्यग्गतिमूलं ज्ञेयम्, - [ध्यानशतके]

रागो दोसो मोहो य जेण संसारहेयवो भणिया ।
अट्टंमि य ते तिण्णि वि तो तं संसारतरुबीयं ।।१३।।

लेश्या आद्या अप्रशस्तास्तिस्रः तस्य क्रन्दनशोचनपरिदेवनताडनलक्षणानि लिङ्गानि । पुनरुक्तं च - [ध्यानशतके]

सद्दाइविसयगिद्धो सद्धम्मपरम्मुहो पमायपरो ।
जिणमयमणवेक्खंतो वट्टइ अट्टंमि झाणंमि ।।१७।। इत्यार्त्तस्वरूपम् ।

तच्च वधबन्धनवहनमारणप्रणिध्यानम् अतिक्रोधग्रहग्रस्तं निर्घृणं रुद्रघोरं परिणामं **रुद्रध्यानं** चतुर्विधं हिंसानुबन्धि १ मृषानुबन्धि १ चौर्यानुबन्धि १ परिग्रहरक्षणानुबन्धिरूपम् । तत्र हिंसा द्रव्यहिंसा, सा च हिंसाकरणकारणानुमतिचिन्तनैकाग्रतारूपं प्रथमम्, एवं मृषाभाषणे त्रिकरणैकत्वोपयोगतारूपं द्वितीयम्, चौर्यचिन्तनैकत्वरूपं तृतीयम्, परिग्रहमिलनरक्षणचिन्तातन्मयत्वरूपं तूर्यरुद्रम्, आद्ये लेश्यात्रयरूपम्, अस्य लिङ्गानि मरणाभिलाषमरणेहा [उत्सन्न-बहुल-नानाविधऽऽमरणाः,] परस्य व्यसने हर्षः, निर्दयत्वं परस्य कष्टकरणे, न अनुताप इत्यादीनि रुद्रध्यानस्वरूपम् ।

**धर्मध्यानं** तस्य भावना ज्ञानदर्शनचारित्रवैराग्यलक्षणानि । तत्र गाथा - [ध्यानशतके]

णाणे णिच्चब्भासो कुणइ मणोधारणं विसुद्धिं च ।
नाणगुणमुणियसारो तो झाइ सुनिच्चलमईओ ।।३१।।

संकाइदोसरहिओ पसम-थेज्ज़ाइगुणगणोवेओ ।
होइ असंमूढमणो दंसणसुद्धीए झाणंमि ।।३२।।

नवकम्माणायाणं पोराणविणिज्जरं सुभायाणं ।
चारित्तभावणाए झाणमयत्तेण य समेइ ।।३३।।

सुविदियजगस्सभावो निस्संगो निब्भओ निरासो य ।
वेरग्गभावियमणो झाणंमि सुनिच्चलो होइ ।।३४।।

इत्यादिभावनया विशुद्धपरिणामः मुनिर्धर्मध्यानमवलम्बते । धर्मध्यानस्यालम्बनानि वाचनापृच्छनापरिवर्त्तनाऽनुप्रेक्षालक्षणानि । धर्मध्यानभेदाः - आज्ञाविचय-अपायविचय-विपाकविचय-संस्थानविचय-

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

लक्षणास्तत्र सुनिपुणम् अनाद्यनिधनं सर्वभूतहतं यथार्थभावकथनरूपम् अजितम् अमितं महार्थमहानुभावं महाविस्तारं निरवद्यं जिनाज्ञापवित्रं नयभङ्गप्रमाणगहनं जिनागमं तदर्थचिन्तनहेतूदाहरणादिस्तत्रैकत्वरूपं जिनाज्ञा-सत्यत्वोपयौगैकत्वं प्रथमं धर्मध्याम्, कदाप्यवबोधे जिनाज्ञा सत्या इति चिन्तनम् । - [ध्यानशतके]

अणुवकयपराणुग्गहपरायणा जं जिणा जगप्पवरा ।
जियराग-दोस-मोहा य णण्णहावादिणो तेणं ।।४९।। इत्येकत्वरूपं प्रथमम् ।

अपाया रागद्वेषकषायाः एते मम न युज्यन्ते, भावना च - नाहं विभावकर्त्ता, नाहं विभावभोक्ता, नाहं विभावाधारः, नाहं विभावरसिकः, नाहं विभावपरिणामी, न च पुद्गलानां स्वामी, न चाधारः, न ग्राहकः, न व्यापको, नो पुद्गलानां योगे मम सुखम् परकर्तृत्वमेव दुःखम् यच्चानन्तनिर्विकारस्वभावाद् अन्यत् तत् न मम, एते रागद्वेषमिथ्यात्वादयो दोषा अपाया एव, तेषां योगे मम न स्थातव्यं इत्यादिचिन्तनैकाग्रतोपयोगरूपं द्वितीयम् ।

विपाकविचयश्च ज्ञानावरणादीनां नाहं कर्त्ता, नाहं भोक्ता, नाहम् आदाता, नाहं कर्मणा समृद्ध इत्युपयोगचिन्तनतन्मयत्वं तृतीयं विपाकविचयाख्यम् ।

चतुर्थं लोकोलोकस्वरूपम् ऊर्ध्वाधस्तिर्यग्लोकास्थानचिन्तनम्, वस्तुतः स्वीयासंख्येयप्रदेशगुण-पर्यायावस्थानपरिणमनचिन्तनं तन्मयत्वं संस्थानविचयाख्यं धर्मध्यानम् । - [ध्यानशतके]

किं बहुणा ? सव्वं चिय जीवाइपयत्थवित्थरोवेयं ।
सव्वनयसमूहमयं झाइज्जा समयसब्भावं ।।६२।।

सव्वप्पमायरहिया मुणओ खीणोवसंतमोहा य।
झायारो नाणधणा धम्मज्झाणस्स निद्दिट्ठा ।।६३।।

इत्यनेन धर्मध्यानध्यातारस्ते निर्ग्रन्था एव, अत्र दिग्पटाश्चतुर्थे गुणस्थानके आज्ञाविचयाख्यं धर्मध्यानमिच्छन्ति तदभिप्रायापरिज्ञानाद्, आज्ञांगीकार-तद्भावनादयो भवन्ति आज्ञास्वरूपपैकत्वो-पयोगस्थिरत्वमन्तर्मुहूर्तप्रमाणम् अनन्तानुबंधि-अप्रत्याख्यान-प्रत्याख्यानकषायोदयाभावे एव भवति नार्वाग् इत्युक्तं धर्मध्यानस्वरूपम् ।

**शुक्लध्यानं** तु निर्मलक्षयोपशमोद्भवयथार्थः चेतनाप्रागल्भ्ये निमित्तावलम्बनं प्रायः स्वरूपोपयोगी स्वरूपैकत्वपरिणतस्य भवति पूर्वविदः आद्ये शुक्ले तच्च तत्कालकृतज्ञानावरणीयक्षयोपशमरूपभाव-श्रुतापेक्षवचनद्रव्यश्रुतापेक्षः नो चेन्मरुदेवीमाषतुषादिषु व्यभिचारः, तच्छुक्लध्यानं चतुर्द्धा पृथक्त्ववितर्क-सप्रविचाररूपं प्रथमम्, एकत्ववितर्कअप्रविचाररूपं द्वितीयम्, सूक्ष्मक्रियाप्रतिपातिरूपं तृतीयम्,

व्युपरतक्रियानिवृत्तिरूपं तूर्यम्, तत्राद्ये द्वे उपशान्तक्षीणकषाययोर्भवतः, अत्रोपशान्तक्षीणकषायशब्देन उपशमश्रेणिक्षपकश्रेणी प्रारभ्येते, एवं ज्ञेयं ध्यानशतकाशयादिति । तत्रात्मनः पुद्गलादिभ्यः भिन्नत्वेन स्वरूपोत्पादव्ययध्रौव्यपृथक्त्वचिन्तनेन स्वरूपगुणपर्यायपृथक्त्वचिन्तनेन वितर्कश्रुतज्ञानावलम्बिविचारो अर्थव्यञ्जनयोगसंक्रान्तिः, अर्थः पदार्थः जीवव्यंजनंतत्प्रकाशकज्ञानादिगुणव्यूहः तत्र योगो मनस एकत्वेन वाक्कायचापलरोधलक्षणः तद्रूपं ध्यानं द्रव्यात्पर्याये पर्यायात् द्रव्ये एवं सामान्यधर्मविशेषधर्मगुणपर्याययोग-परावर्त्तनेन सविकल्पं विकल्पपूर्वकं श्रद्धानज्ञानस्वरूपैकत्वात् भेदरत्नत्रयरूपं प्रथमं शुक्लध्यानम् । अर्थपदार्थे व्यञ्जने गुणपर्याये एकत्वोपयोगरूपं वितर्काख्यं श्रुतालम्बनेन अविचारं उपयोगान्तरासंक्रमणरूपं निर्विकल्पं च तेनाविचारं निर्विकल्पत्वेनाभेदरत्नत्रयीरूपं द्वितीयम् एकत्ववितर्क-अप्रविचारलक्षणं शुक्लं भवति । सूक्ष्मक्रिया सूक्ष्मयोगचलनरूपा तस्या रोधककाले अप्रतिपातिरूपं तृतीयम् । सर्वथा सक्रियत्वं क्षेत्रान्तरगमनरूपक्रियारूपं चतुर्थं व्युच्छिन्नक्रियानिवृत्तरूपं चतुर्थं शुक्लध्यानम् । एव ध्यानस्वरूपम् । तच्च गुणस्थानकेषु विभजन्नाह ।।

'**अट्टरुद्दाइ**'ति प्रथमेषु पञ्चसंख्यालक्षणेषु गुणेषु मिथ्यात्वाद् देशविरतिपर्यंतेषु आर्त्तरौद्रे द्वे ध्याने, आवश्यकनिर्युक्तौ - [ध्यानशतके]

तदविरय-देसविरया-पमायपरसंजयाणुगं झाणं ।
सव्वप्पमायमूलं वज्जेयव्वं जइजणेणं ।।१८।। इति आर्तध्याने ।

इय करण-कारणाणुमइविसयमणुचिंतणं चउब्भेयं ।
अविरय-देसासंजयजणमणसंसेवियमहण्णं ।।२३।। इति रुद्राधिकारे ।

मुनीनां धर्मध्यानमिति वाक्य त्, **तत्त्वार्थे** तु अप्रमत्तानां धर्मध्यानम्, तच्च प्रतिपद्यमानकापेक्षया अप्रमत्ते धर्मध्यानमालम्ब्य पश्चात्पतन् प्रमत्तेपि कियत्कालं यावत् धर्मध्यानी भवति, तेन आर्त्तत्रिकं धर्मचतुष्कं [च] प्रमत्ते गुणस्थानके भवति, निदानार्त्तस्य मुनीनामसंभवाद् अप्रमत्ताख्ये सप्तमे गुणे धर्मध्यानस्यैव चत्वारो भेदा भवन्ति ।।६५।।

**टबार्थ :** X X X हवे गुणठाणे ध्यान कहे छे । मिथ्यात्वथी मांडी पांच गुणठाणापर्यंत आर्त्त १ तथा रौद्र १ ए बे ध्यान छे, तेहना ८ पाया छे, आवश्यकनिर्युक्ते मुनि विना धर्मध्याननी मना छे. निदान आर्त्त विना तीन भेद, धर्मध्यानना च्यार भेद ए सात भेद प्रमत्तगुणठाणे ध्यानना छे ।

अप्रमत्तगुणठाणे धर्मध्यानना च्यार भेद छे ।।६५।।

**चउधम्म एकसुक्कं अपुव्विसेसंमि एगसुक्कं च ।**
**चरिमे दुसुक्कचरिमा, ज्झाणभेया गुणठाणे ।।६६।।**

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

**वृत्ति :** '**चउधम्म**'इत्यादि '**अपुव्वि**'इत्यादि अपूर्वकरणे अष्टमे गुणस्थानके चत्वारो धर्मध्यानस्य भेदाः, **एकश्च शुक्ल**ध्यानस्य एवं पञ्चभेदा भवन्ति । '**सेसम्मि**' शेषे अनिवृत्तिबादरसूक्ष्मसंपरायोपशांतमोह-क्षीणमोहसंयोगिकेवलिपर्यंतेषु **एक शुक्लं** भवति । तत्रोपशांतमोहं यावत् पृथक्त्ववितर्कसप्रविचाररूपं क्षीणमोहे एकत्ववितर्कअप्रविचाररूपं प्राप्यते, सयोगिकेवलिचरमभागे योगरोधकाले आवर्जीकरण-केवलिसमुद्घातानन्तरं सूक्ष्मक्रियाअप्रतिपाति प्राप्यते, '**चरिमे**'त्ति चरमे अयोगिकेवलिलक्षणे, '**दुसुक्क**'त्ति द्वौ शुक्लौ चरमौ सूक्ष्मक्रियव्युच्छिन्नक्रियलक्षणौ द्वौ शुक्लभेदौ भवतः एवं **ध्यानभेदा गुणस्थानके** ज्ञेयाः ।।६६।।

**टबार्थ :** च्यार धर्मध्याननना पाया तथा एक पहेलो पृथक्त्ववितर्कसप्रविचारनाम ए पांच भेद ध्याननना अपूर्वकरणगुणठाणे छे, शेष गुणठाणे एक शुक्लध्यान छे, नवमे दशमे अग्यारमे शुक्लनो प्रथम पायो छे, क्षीणमोहे शुक्लनो बीजो पायो छे, तेरमे शुक्लनो तीजो पायो छे, तेरमाने अंते छे, तेरमानी आदिध्यान तथा ध्यानांतरिका छे, चरिम चौदमे शुक्लना छेल्ला बे भेद छे, ध्यानभेद गुणठाणे इंम कह्या ।।६६।।

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

# परिशिष्टम्-१६

## पूर्वाचार्यमहर्षिकृतं

## त्रिषष्टिध्यानकथानककुलकम् ।

नमिऊण महावीरं, वुच्छं तेवट्ठिअसुहझाणाणं ।
आहरणसंगहमिणं, [१]सुमरणहेउं गुरुवएसा ।। १ ।।
[२]अण्णाणंझाणंमी, दिट्ठंतो [३]असगडपियपुव्वभवो ।
[४]अणायारझाणंमी, वल्लरझाणी य कुंकणओ ।। २ ।।
कुदंसणंमि [५]सोरठ-सावयदेवो [६]पवण्णमिच्छत्तो ।
कोहे पालगसासग-नालीयमाई उदाहरणा ।। ३ ।।
[७]माणंमी उ बाहुबली, विस्सभूई य संगमो देवो ।
[८]मायाए धणसिरि[९]या, भाउज्जायं [१०]परिक्खंती ।। ४ ।।
लोहंमि सिंहकेसर-साहू चेडगनिहाणविह[वणिअ]मित्तो ।
रागंमी विक्कमजसो, विण्हु[११]सिरीए य देवरइ ।। ५ ।।
दोसंमि पिप्पलादो-महुदेवो चेव नाविओ नंदो ।
मोहंमि उ बलदेवो, [१२]कण्हसरीरं परिवहंतो ।। ६ ।।
इच्छाए कविलरिसी, मिच्छंमि जमालिपमुहआहरणा ।
मुच्छाए कणगझओ, नियसुयदेहाणुवगयरो[१३] ।। ७ ।।
संकाए [१४]अव्वत्ता-साढाओ एवमित्थुदाहरणा[१५] ।
कंखाए उ मिरीई [मरीई], कविला इत्थं[१६]पिइ भणंतो ।। ८ ।।
[१७]गेहिंमि महुरमंगू-आयरिया पुण हवंति आहरणं ।
पुरनिद्धमणे जक्खो, जे जाया [१८]जिब्भदोसेणं ।। ९ ।।

---

१. सुत्ताउ गुरूवणसेणं [गुरूवएसेणं] B । २. अन्नाणझाणंमी B । ३. असगडस्स पुव्वभवो B । ४. अणयारझाणंमी B । ५. सोरवट्ठ० B । ६. त्पवन्नमिच्छत्तो B । ७. माणंमि A । ८. मायाइ B । ९. धणसिरीआ B । १०. परिखिवंती A। ११. ०सिरी चेव देवरइ B । १२. किण्ह० B । १३. ०देहणवगयरो B । १४. अव्वत्तासाढा एव० A । १५. ०दाहरणं B । १६. ०पि भासंतो B । १७. गेहंमि A । १८. रसणदोसेण B ।

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

आ[१९]साए मूलदेवो, बंभणपाहेयआससजुत्तो ।
तण्हाइ गा[२०]लदाहो, छुहाइ [२१]दमगो सिलापाई ॥ १० ॥

[२२]पंथोऽप्पकालगम्मो, पोयणमग्गंमि[२३] वक्कलच्चीरी ।
पंथाणो य महंतो, महिंदसिंहो[२४] तहिं [२५]नेओ ॥ ११ ॥

निद्दाए आहरणा, थीणद्धिगया उ पुत्तलाईया ।
[२६]नीयाणंमी उ [२७]नेया, गंगदत्ताइआहरणा ॥ १२ ॥

नेहंमी उ मरुदेवी, [२८]अरहण्णगवइर[२९]सामिमाई उ ।
कामे कुमारनंदी, हास[३०]पहासे सुमुच्छीओ ॥ १३ ॥

मायावलेव कलुस-झाणंमी अभि [३१]महापीढपीढा य ।
कलहे [३२]कमलामेला-हरणे पुण [३३]नारओ नेओ ॥ १४ ॥

जुज्झंमि कोणिओ खलु, पज्ञोओ चेव [३४]सुहुमठाणेसु ।
निजुज्झंमी य भरहो, बाहुबली चेव दिट्ठंतो ॥ १५ ॥

संगंमि उ भवदेवो, गहियवओ नागिलाइ अणुरत्तो ।
संगहझाणंमि तहा, [३५]दव्वे लुद्धुव्व मम्मणओ ॥ १६ ॥

ववहारंमि [३६]सवत्ती-जुयलं पुत्तत्थहेउ विवयंतं ।
[३७]कयविक्कयझाणंमी, कुसगाही[३८]लुद्धनंदो उ ॥ १७ ॥

तहणत्थदंडझाणे, वहगा दीवायणस्स संबाई ।
[३९]आभोग बंभदत्तो, बंभण[४०]अच्छी विकद्दंतो ॥ १८ ॥

अणाभोगझाणंमी पसन्नचंदो महारिसी नेओ ।
[४१]रिणआविलझाणंमी [४२]तिल्लग्गाहा समणभगिणी ॥ १९ ॥

वेरंमि फरुसरामो, [४३]सुदाढ तह [४४]सालसीसतावसिया ।
[४५]वीयके रज्ञनिमीत्तं, ऊहंतो चाणको नेओ ॥ २० ॥

---

१९. आसाइ B । २०. ये तण्हाइ गालदहो A । २१. मंदमगोसिलापाई B । २२. पंथप० A । २३. मग्गेसि B । २४. ०सीहो B। २५. नेउ B । २६. नीआणंमि B । २७. नेयांआ गंगदत्ताइ B । २८. अरिहन्नग० B । २९. ०सामिमाऊ अ B । ३०. ०पहासासुमुच्छिअउ B। ३१. महापीढपीढा B । ३२. कमलाहरणे A । ३३. नारउ नेउ B । ३४. बहुसठाणेसु B। ३५. दव्वातित्तुव्व B । ३६. सवित्तीजुअल B । ३७. कयविक्कय० A । ३८. ०लोहनंदुव्व B । ३९. आभोगी B । ४०. ०अच्छीणि मद्दंते B । ४१. रिणयारविल B । ४२. तिल्लग्गाही समणभगिणी B । ४३. सुदाढु B । ४४. सालि०B। ४५. वियक्के रज्ञहेउं A ।

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

[४६]हिंसाए कालसूयर, [४७]निन्नगवणिओ णेओ महेसरदत्तो ।
हासंमी चंडरुद्दस्स, [४८]भाविसीसो समित्तो य ।। २१ ।।

पहसंमि य पज्जोओ,[४९] वारत्तरिसिं[५०] समं उवहसंतो ।
[५१]पओसे कमठो गोवो, कउसिलसखवगो य वीरस्स ।। २२ ।।

फरुसे चुलणी-मणिरहे[५२]-सप्पागरिसो य सावियाइ पई ।
भयझाणंमि वि भद्दो, गयसुकुमालस्स उवघाई ।। २३ ।।

अप्पपसंसाझाणे, रहकारो [५३]अंबलुंबि तोडिंतो ।
परनिंदाए [५४]खवगो, [५५]कूरगडू पइ पडिनिविट्ठो ।। २४ ।।

परगरिहाए गुड्डा-माहिलगो पूसमित्तअहिखवगो ।
[५६]परिगहज्झाणे [५७]कुंचग-सिट्ठी तह चारुदत्तो य ।। २५ ।।

परपरिवाए सस्सू, सुभद्ददोसं असंतयं दिंती ।
परदूसणंमि रूद्दो, अंगंमि सदोषमाहिंतो ।। २६ ।।

आरंभे उद्दवए, [५८]दीवायणग्गायकरडकरडत्ति ।
संरंभे संकप्पे, [५९]खुहगकुमारो उदाहरणं ।। २७ ।।

पावाणुमोयणंमी, [६०]उवरोहावरोहिणो उवज्झस्स ।
[६१]धण्णत्ति संसगजणो, नायव्वो होइ आहरणं ।। २८ ।।

[६२]आरामादहिगरणे, नंदगमणियारसिट्ठिआहरणं ।
[६३]असमाहि-मरणंमी, खंदगं पइ पालगो नेओ[६४] ।। २९ ।।

कम्मोदयंमि कण्हो, पुव्वं [६५]सुभभावओ वि पज्जंते ।
कम्मोदयपच्चयओ,[६६] असुहंझाणं[६७] झियायंतो[६८] ।। ३० ।।

इड्ढीगारवझाणे, दसन्नभद्दो [६९]नरेसरो नेओ[७०] ।
रसगारवंमि राया, जियसत्तू उदगनाउत्तो ।। ३१ ।।

---

४६. हिंसाइ B । ४७. ०वणिउ B । ४८. भावसीसो B । ४९. ०उ B । ५०. वारित्तरिसिं A । ५१. पउसे B । ५२. ०रहस्सप्पा० B । ५३. अंबुलुंबि तोडंतो B । ५४. रववगा B । ५५. कूरगगडु पडिनिविट्ठा B । ५६. परगिह० A। ५७. कुंचिग० B । ५८. दीवायणगोअकुरडुकुरडुति B । ५९. खुहगकुमरो A । ६०. रायवरोहावराहवज्झस्स B । ६१. धन्नुत्ति B । ६२. आरामावहि० B । ६३. असमाही० B । ६४. नेउ B । ६५. सुभभावि B । ६६. पच्चयउ B । ६७. असुहझाणं A । ६८. झियायिंतो B । ६९. नरीसरो B । ७०. नेउ B ।

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

सायागारवझाणे, [७१]दिट्ठंतो इत्थ होइ नायव्वो ।
'[७२]नरयत्थो ससिराया', इव गाहुत्तो ससीराया ।। ३२ ।।

[७३]अव्वेरमणंझाणे, पुत्ताणं अविरइं [७४]अहिलसंता ।
[७५]उसुयारुत्तभिगुजसा, मूअलगभाया य विन्नेउ[७६] ।। ३३ ।।

झाणे [७७]अमुत्तिमरणंमि, मुत्तिविग्घे नियाणकरणंमि ।
चित्तेण निसिद्धो वि हु, तच्चित्तो [७८]होइ संभूओ[७९] ।। ३४ ।।

[८०]कत्थवि रूवंझाणे, अहियपयं [८१]दीसए अ तदो तंम्मि ।
[८२]सगरो [सरूवे] सणंकुमारो, पररूवे [८३]सगड गोवालो ।। ३५ ।।

इय तेवट्ठीझाणा, [यथा] [८४]सोदाहरणा य कित्तिया अ ।
केसिंचि अट्ठझाणे, [८५]अवतारो केसिं रूद्दम्मि ।। ३६ ।।

सव्वत्थ बिंदुलोवं,[८६] [८७]पाइयभावाउ इत्थ काऊणं[८८] ।
अण्णाझा[८९]णेन्ते यं, थोवं पाढो विकत्थे व ।। ३७ ।।

[९१]**त्रिषष्टिध्यानकथानककुलकं समाप्तम्** ।

।। इति वैक्रमीये २०६५ तमे वर्षे विजयकीर्तियशसूरीणा संशोधितं संपादितञ्चेदं पूर्वाचार्यमहर्षिकृतं त्रिषष्टिध्यानशतकथानककुलकं समाप्तम् ।।

---

७१. नेउ उवएसमालमज्झंमि B । ७२. निरयत्थो B । ७३. अवेरमरणझाणे A । ७४. अहिलसंता A । ७५. इसुआरत्त B । ७६. विण्णेआ A । ७७. अमुत्तिमरणं झाणे A । ७८. चेव B । ७९. संभूउ B । ८० कथवि B । ८१. दिस्सएअ B । ८२. सगरुवि B । ८३. ० रूवे अ सगडग्गुवाल A । ८४. सोया विकित्तिया अ सुहा A । ८५. अवयारो B । ८६. ०लोअं B । ८७. पायय० B । ८८. काऊण A । ८९. ०झाणुत्तिपयंते B । ९०. यं पाढो B । ९१. ध्यानकथानकगाथा समत्ता B ।

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

# परिशिष्टम्-१७

## अज्ञातकर्तृकः ध्यानचतुष्टयस्य विचारः ।

रूपस्थं च पदस्थं च, पिण्डस्थं पिण्डवर्जितम् । ध्यानं चतुर्विधं ज्ञेयम्, संसारार्णवतारकम् ।।१।।
पश्यति प्रथमं रूपम्, स्तौति ध्येयं ततः पदैः । तन्मयः स्यात्ततः पिण्डे, रूपातीतः क्रमाद्भवेत् ।।२।।
यथावस्थितमालम्ब्य-रूपं त्रिजगदीशितुः । क्रियते यन्मुदा ध्यानम्, **तद्रूपस्थं** निगद्यते ।।३।।
विद्यायां यदि वा मन्त्रे, गुरुदेवस्तुतावपि । **पदस्थं** कथ्यते ध्यानम्, पवित्रान्यपदेष्वपि ।।४।।
स्तम्भे सुवर्ण्णवर्ण्णानि, वश्ये रक्तानि तानि तु । क्षोभे[१] विद्रुमवर्ण्णानि, कृष्णवर्ण्णानि मारणे ।।५।।
द्वेषणे धुम्रवर्ण्णानि, शशिवर्ण्णानि शान्तिके । आकर्षेऽरूणवर्ण्णानि, स्मरेन्मन्त्राक्षराणि तु ।।६।।
यत्किमपि शरीरस्थम्, ध्यायते देवतादिकम् । तन्मयीभावशुद्धं तत्, **पिण्डस्थं** ध्यानमुच्यते ।।७।।
आपूर्यवाममार्गेण, शरीरं प्राणवायुना । तेनैव रेचयित्वाऽथ, नयेद् ब्रह्मपदं मनः ।।८।।
अभ्यासाद् रेचकादीनाम्, विनापीह स्वयं मरूत् । स्थिरीभवेन्मनःस्थैर्याद्, युक्ति नोक्ता ततः पृथक् ।।९।।
निमेषोऽर्द्धार्द्धमात्रेण, भुवनेषु भ्रमत्यहो । मनश्चञ्चलमद्धावम्, युक्त्या भवति निश्चलम् ।।१०।।
लीयते यत्र कुत्रापि, स्वेच्छया चपलं मनः । निराबाधताथैवास्तु, व्यालतुल्यं हि चालितम् ।।११।।
मनश्चक्षुरिदं यावद्, अज्ञानतिमिरावृतम् । तत्त्वं न वीक्षते तावद्, विषयेष्वेवं मुह्यति ।।१२।।
जन्ममृत्युधनं दौस्थ्यम्, स्वस्वकाले प्रवर्त्तते । तदस्मिन् क्रियते हन्त !, चेतस्विता कथं त्वया ।।१३।।
यथा तिष्ठति निष्कम्पः, दीपो निर्वातवेश्मगः । तथेहापि[२] पुमान्नित्यम्, क्षीणाधिः सिद्धवत्सुखी ।।१४।।
विकल्पविरहादात्मा, ज्योतिरून्मेषवान् भवेत् । तरङ्गविगमाद् दूरम्, स्फुटरत्न इवाम्बुधेः ।।१५।।
विषयेषु न युञ्जीत, विषयेभ्यो निवारयेत् । इन्द्रियाणि मनःसाम्याः, भ्राम्यन्ति स्वयमेव हि ।।१६।।
इन्द्रियाणि निजार्थेषु, गच्छन्त्येव स्वभावतः । स्वान्ते रागो[हि द्वेषो] वा, निवार्यस्तत्र धीमता ।।१७।।
यातु नामेन्द्रियग्रामः, स्वान्तादिष्टो यतस्ततः । न वालनीयः पञ्चास्य-संनिभो वालितो बलात् ।।१८।।
निर्लेपस्य निरूपस्य, सिद्धस्य परमात्मानः । चिदानन्दमयस्य स्याद्, ध्यानं **रूपविवर्जितम्** ।।१९।।

**।। इति वैक्रमीये २०६५ तमे वर्षे आचार्य-विजयकीर्तियशसूरीणा संशोधितः संपादितश्चायम् अज्ञातकर्तृकः ध्यानचतुष्टयस्य विचारः समाप्तः ।।**

---

१. क्षोभविद्रुम. (प्रतौ) २. तथेह्यापि (प्रतौ)

**[अद्यावधि अयं ग्रन्थोऽमुद्रितः । अस्मिन् ग्रन्थे रूपस्थादिनि चत्वारि ध्यानानि दर्शितानि । -सम्पा०]**

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

# परिशिष्टम्-१८

## पूज्यपादमुनिभावविजयकृत-ध्यानस्वरूपणप्रबन्धः* ।

### [ढाल-१, चउपई]

सकल जिणेसर पाय वंदेवी, समरी माता शारददेवी;
ध्यानतणो हुं कहुं विचार, श्री जिनवचनतणे अनुसार ।।१।।

जीवतणो जे थिर परिणाम,कहीये ध्यान तेहनुं नाम;
तेहतणां छे चार प्रकार, दोय अशुभ दोय शुभ मन धार ।।२।।

आर्तध्यान ने रौद्रध्यान, धर्मध्यान वली शुक्लध्यान;
दुर्गतिदायक पहेला दोय, सद्‌गति हेतु अवर दो होय ।।३।।

आर्तध्यानना चार प्रकार, तेहमां पहेलो एह विचार;
अप्रियविषयतणो संजोग, मन चिंते इम तास वियोग ।।४।।

ए कुरूप कां दीसे दैव, विरस भखे ए कुण सदैव;
फास कठोर कवण ए खमे, अशुभनाद ए कुणने गमे. ।।५।।

दुःख दुर्गंध करे बहु एह, कदा एहनो होशे छेह;
इम अप्रिय जोगे चिंतवे, एहनो योग म होजो हवे ।।६।।

अे पहेलो आरतनो भंग, बीजे वंछे विषय प्रसंग;
सुखकारी रूपादिक जेह, तेह उपर बहु धरे सनेह. ।।७।।

धन परिजन भोजन वरनारी, प्रमुख सार ध्याये संसारी;
जे देखे रूपादिकवंत, तेहनी लालचि करे अनंत ।।८।।

तेहनुं ध्यान धरे निशदिश, ते मुज कां न दीये जगदीश;
ते न मिले तो पाडे चीश, घणुं निसासे धूणे शीश ।।९।।

जे जे पामे मनोहर भोग, नितु ध्याये तेहनो अवियोग;
अणपाम्यानो आणे खेद, ए बीजो आरतनो भेद ।।१०।।

त्रीजे रोगादिक आपदा, आवे तव एम चिंते सदा;
ए दुःख देह दहे माहरुं, कवण उपाय करी संहरुं ।।११।।

---

